
ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

## त्रयोदश-चतुदर्शसंयुक्ताङ्के भवतां सर्वेषां मङ्गलाभिनन्दनम्।




www.jahnavisanskritejournal.com

त्रयोदश-चतुदर्शसंयुक्ताङ्कस्य कार्यसम्पादकाः

| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति डा. सदानन्दझा |
| **पुनर्वीक्षकाः** | आचार्य डा ॥ सुमन् के. एस्., डा. राधावल्लभशर्मा, डा. प्रज्ञादीक्षित |
| **सम्पादकाः** | प्रो. पीयूषकान्तदीक्षितः, डा. नारायणदाशः, बिपिनकुमारझा |
| **सम्पादनसहायकः** | श्रीनारायणदत्तमिश्रः |
| **प्रकाशकः** | बिपिनकुमारझा |
| **प्रकाशनसहायकाः** | डा. मुकेशकुमारझा, डा. सुमनदीक्षित, डा ॥ सुनील के. एस्. , पत्रिकायाः नियमितसदस्याश्च |
| **प्रतिनिधिः (लोकार्पणसन्दर्भे)** | डा ॥ सुनील के. एस्. |
| **तकनीकिसहायकः** | लिंगुआमार्ट, नवदेहली |

सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नल नाम्ना विश्वेऽस्मिन् प्रथितः। परिसरोऽयं



**JAHNAVI - A First Electronic Peer-reviewed Quarterly Refreed Sanskrit *Triveni* (Sanskrit, Hindi & English) Journal.**

# INDEX


| | | | |
|---|---|---|---|
| I | **प्रस्फुटम्** | | 4-9 |
| 1 | आशीर्भणितिः | श्री श्री सुगुणेन्द्रतीर्थश्रीपादाः | 4 |
| 2 | सम्पादकीयम् (नैवेद्यम्) | सदानन्द झा | 5 |
| 3 | प्रकाशकीयम् (ते हि नो दिवसाऽऽगता) | विपिनकुमारझा | 7 |
| 3 | FAQ | | 9 |
| II. | **साहित्यानुरागः** | | 12-97 |
| 1 | वेदविज्ञानस्यावश्यकता | सुनीलः के. एस. | 12 |
| 2 | विचारपूर्वाङ्गः संशयः | पीयूषकान्तदीक्षितः | 18 |
| 3 | आधुनिक विज्ञान के ऊर्जा सिद्धांत का वेदान्तीय परिशीलन | विकास सिंह | 22 |
| 4 | Lord Šiva- The Supreme Vaishṇava | Suman K S | 32 |
| 5 | परात्रिंशिकोपलब्ध्यानुत्तरशब्दविशेषव्याख्यानेऽभिनवगुप्तस्यावदानम् | नारायणदत्तमिश्रः | 35 |
| 6 | श्रीमद्भागवत् के भक्ति एवं दार्शनिक आयाम | सदानन्द झा | 42 |
| 7 | आचार्यराजशेखरानुसारं प्रतिभास्वरूपम् | हरीशचन्द्रकुकरेती | 46 |
| 8 | Analytical study of doctrinal inconsistencies | Nirmala.V | 52 |
| 9 | वाल्मिकीयरामायणे ज्योतिषशास्त्रीयतत्त्वान्वेषणम् | मधुसूदनमिश्रः | 56 |
| 10 | भारतीयसंविधानानुसारेण द्यूतसमाह्वयविवेचनम् | प्रतीकदत्तः | 63 |
| 11 | स्वप्नवासवदत्तद्दृशा समाजोत्कर्षे वासवपद्मावत्योः भूमिका | हीरालालदाशः | 69 |
| 12 | नाट्यशास्त्रस्य वैशिष्ट्यम् | गीताशुक्ला | 75 |
| 13 | श्रीमद्भागवतदिशा अद्वैतविमर्शः | मखलेशकुमारः | 79 |
| 14 | ज्योतिषशास्त्र की दृष्टि में नेत्र रोग एवं उसका उपचार | हरिनारायणधर द्विवेदी | 85 |
| 15 | प्राचीनार्वाचीनयोः उपकारयित्रिनव्यन्यायभाषायाः वर्तमानकालिकीस्थितिः | बिपिनकुमारझा | 92 |
| III | **शृङ्खला** | | 97-101 |
| 1 | चिन्तनवीथिः | अर्जुनगतौंला | 97 |
| 2 | मङ्गलसन्देशसङ्कलनम् | | 98 |
| 3 | **सूचनाः** | | 101 |

# प्रस्फुटम्



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

॥ श्री वीरविठ्ठलो विजयते ॥



**H H Sri Sri Sugunendra Theertha Swamiji**

Udupi Sri Puthige Matha. Karnataka, INDIA

## आशीर्भणितिः

जाह्नवी पत्रिका जाता संस्कृतेः संस्कृतस्य च ।
सर्वैश्च सर्वथा सेव्या सर्वदा सर्वदानतः ॥

इयं जाह्नवी नाम ज्ञानगङ्गा त्रिपथगा इव संस्कृताभिमानिनां कर्णेषु प्रवहतु । संस्कृतं गङ्गेति प्रत्यक्षमुपायनद्वयं देवलोकात् भूमेः कृते । उभयमपि भुक्तिमुक्तिदं पापनाशकम् । संस्कृतशब्दानां अर्थानाञ्च संबन्धः औत्सर्गिकः । गङ्गायां पापनाशकत्वशक्तिरपि औत्सर्गिकी । अन्यनदीनां मध्ये गङ्गायाः स्थानं यथा तथैव अन्यभाषाणां मध्ये संस्कृतस्य च । सोऽयं सन्देशः विश्वगुरुश्रीमध्वाचार्याणाम् अङ्गुलिद्वयसन्देश इवाऽऽभाति । अस्तु अन्यत् सर्वमप्रत्यक्षम् । प्रत्यक्षं गङ्गाद्वयं स्वीकुर्मः । बिहारतः प्रवहमाणे अस्मिन् गङ्गाद्वये सर्वे संस्कृतज्ञाः विहरन्तु । जाह्नवी जगद्व्यापिनी भूयात् ।

श्री श्री सुगुणेन्द्रतीर्थश्रीपादाः,
उडुपि श्रीपुत्तिगे मठः, जगद्गुरु-श्रीमध्वाचार्य-मूलमहासंस्थानम्,
उडुपि, कर्णाटकम्

# नैवेद्यम्



डॉ. सदानन्दझा[1]

सान्द्रानन्दपुरन्दरादिदिविषद् वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरम्।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दायवन्दामहे॥

अये विविधविद्याविद्योतितान्तःकरणा नानाविद्यार्थिवृन्दसमुपास्यमानचरणाज्ञानप्रभाध्वस्ताऽज्ञानाऽऽवरणा निर्मलमनसः पाण्डित्यपराजितसंस्कृतबद्धतरयः महाकवयः पाठकाश्च!

संसारस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकजाह्नव्याः त्रयोदश-चतुर्दशसंयुक्ताङ्कमिमं श्रीमतां तत्रभवतां देवभाषासमाराधनतत्पराणां पुरस्थापयन्महं नितरां प्रमोदे। विविधनिष्णातानां गीर्वाणीप्रचारप्रसारतत्पराणां सन्ततस्वाध्यायनिरतछात्रप्रियाणामनारतसत्प्रयासस्य परिणामभूतेयं जाह्नवीपत्रिका सारस्वतरङ्गस्थले नरीनृत्यमानाऽस्मद् विचारं परिपोषयति। त्वदीयाभिर्वाग्भिर्जननि तव वाचां स्तुतिरियं मत्कृते चरितार्था।

वस्तुतस्तु जाह्नवीपत्रिकाप्रचारप्रसारहेतवे प्रमुखतया विश्वविख्यातविदुषां नयैकबद्धपक्षपातानां शतशः ग्रन्थरत्नप्रणेतृणां राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदमलङ्कुर्वतां तत्रभवतां स्वनामधन्यानां विविधवुधवन्दितचरणामाचार्य राधावल्लभत्रिपाठिमहाशयानामविस्मरणीयं योगदानं वर्तते अतस्तेभ्यः सुधीभ्यः सकलजाह्नवीपरिवारः साञ्जलिं शिरसा आभारं व्यनक्ति वाक्प्रसूनाञ्जलिस्वरूपं पद्यं च समर्पयति-

देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
राधावल्लभ एव वेत्ति नितरां स्वाध्यायसेवाव्रतैः।
अब्धिर्लंघित एव बानरभटैः किन्त्वस्य गम्भीरता-
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः।।

[1] पत्रिकायाः मुख्यसम्पादकः।





प्रस्तुतसंयुक्ताङ्कस्य लोकार्पणकार्यक्रमः कर्णाटकस्थबेङ्गलुरुनगरे पूज्यस्वामिपादैः विविधकार्यक्रमव्यस्तेनापि पत्रिकालोकार्पणकृते कृपानुमतिं प्रदत्तास्ति तदर्थमेभ्यः जाह्नवीपरिवारः हृदा कृतज्ञतां ज्ञापयति।

प्रकृताङ्कोऽयं कीदृशः समीचीनासमीचीनः इति वक्तुं कुतो मे शक्तिः सम्प्रति **आपरितोषात् विदुषां न साधु मन्ये प्रयोगविज्ञानमेव** मत्कृतम् तु समुचितम्।

विदाङ्कुर्वन्त्वेव यत् सुरभारतीवाङ्मयस्य सुचिन्तकानां वैदुष्यपूर्णविचारैः संस्कृतजगल्लाभान्वितं स्यादिति जाह्नव्याः प्रकाशनोद्देश्यम्। देवभाषायाः संरक्षण-संवर्द्धनाभ्यां भारतीयानां मनसि भारतीयता ध्रुवं सुप्रतिष्ठिता स्यात् भारतीयेतराणां हृदि सद्विचारदिव्यज्योतिः प्रकाशितं भवेत्।

एतदर्थं बहूनां प्राचीनाऽर्वाचीनपण्डितानां प्रबन्धसुमनसैरलङ्कृतेयं पत्रिका मोमुद्यते सन्ततमेतदर्थं येषां सारस्वतयज्ञपुरुषाणां शास्त्रीयाः शोधपूर्णाऽऽलेखाः प्रकाशनाय सम्प्रेषिताः विद्यन्ते तान् प्रति जाह्नवीपरिवारः स्वकीयां निजां कृतज्ञतां प्रकटयति।

निबन्धकानने बभ्रम्यमाणेन मया मालाकारवदेव माल्यं संग्रथितम्। आशासे अवश्यमेव शास्त्ररसिकाः गवेषकाः लाभान्विताः भविष्यन्ति। अन्ते सकलश्च जाह्नवीपरिवारःबद्धकराञ्जलिः भगवन्तं वेङ्कटेश्वरं प्रार्थयते।

**श्रुतध्वनिमनोहरा शुभापावनी**
**स्मृताप्यतनुतापहृत् समवगाहसौख्यावहा**
**निषेव्यपदपंकजा विबुधमान्याऽमला**
**समस्तजगतीतले प्रवहतादियं जाह्नवी।**

**विद्वच्चरणचञ्चरीकः**

**झोपाख्यः सदानन्दः**

**लखनौरम्, बिहारः**
**रामनवमी, २०७०**

********************************************************

ISSN 976-8645

# ते हि नो दिवसाऽऽगताः



बिपिनकुमारझा[2]

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां
कमठपतिना मध्ये पृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह! महतां निःसीमानश्चरित्रविभूतयः॥

वसन्तः सम्प्राप्तः । कालेऽस्मिन् जीवजन्तवः हृष्यन्ति हर्षयन्ति च । वनराजिस्तावत् नववधूरिव कुड्मलकुसुमफलैः समलङ्कृता दरीदृश्यते । सम्प्रति "**वसन्ते वसन्ते ब्राह्मणमुपनयीत**" इति श्रुतिभणितिः श्रुतिपथे बोभवीति । वेदवचने द्विरुक्तिस्तु ज्ञापयति '**अवश्यम् प्रतिवसन्तं ब्राह्मणम्= ब्रह्मज्ञानिनं= वेदविज्ञानिनम् (जिज्ञासुम्) उपनयीत = समीपं नयेत इति** । ननु कस्य समीपम् ? सच्छास्त्रस्य इति शेषः । यतो हि, वसन्ततौं सस्यानि समृद्धानि भवन्ति, वृक्षाश्च फलवन्तो दृश्यन्ते । मेघाश्च अमोघवर्षाश्चकासते । ततश्च प्राणिवर्गाः सुखिनो वसन्ति । फलतः, सर्वे अपि शास्त्रनिहितमतयः अवश्यं भवन्तु न त्वलसबुद्धयः इति श्रुतिरियम् अस्मान् प्रबोधयति प्रवर्तयति च सच्छास्त्राध्ययने ।

तस्मात् अस्माभिस्सत्प्रबन्धप्रणयनविषये नूनं संलग्नधिषणैर्भाव्यम् इत्यतो शास्त्रजलधरात् पतिता इयं त्रयोदशतमा जाह्नव्याः सञ्चिका ।

अस्मिन्श्च चैत्रमासे न केवलं वयं विजयनामानं नवसंवत्सरं प्रविष्टाः परं भगवतो श्रीरामचन्द्रस्य जन्मोत्सवम् अप्याचरामः । षड्गुणैश्वर्यसम्पन्नस्तु रामः अस्मान् प्रति "**रामादिवत् प्रवर्तितव्यं न तु रावणादिवत्**" इति सार्वकालिकसन्देशं स्वस्यैव जीवनशैल्या प्रदर्शयन् भारतीयसंस्कृतेः चिरप्रत्नभाष्यमरचयत् । भगवति रामेऽस्माकं सर्वेषां भक्तिरविच्युता सर्वदास्तु इत्येवाऽऽशास्ते जाह्नवी ।

भक्ताग्रेसरस्य हनूमतश्च जयन्तीम् अस्मिन्नेव मासि आचरति आस्तिकजनस्तोमः । स च हनूमान् बुधैस्सदा शंसितस्त्वेवम् - "**महाव्याकरणाम्बोधिमन्थमानसमन्दरम् । कवयन्तं रामकीर्त्या हनूमन्तमुपास्महे**" ॥ इति ।

[2] प्रकाशकः सम्पादकश्च



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV
ISSN 976-8645


'***हनुशब्दो ज्ञानवाची*** ' इति शास्त्रवचनात् हनुमान् नाम ज्ञानवान्, विवेकवान् इत्येव साधुव्याख्या सङ्गच्छते । तस्माच्च विवेकिनः हनुमतः वयं भगवति ज्ञानभक्ती, विषयेषु च वैराग्यं प्रार्थयन्तः जीवने सार्थक्यमनुभवितुं पारयेम ।

जाह्नवी तावत् सर्वदा '***ज्ञानेनैव परं पदम्*** इति स्मृतिवचः अनुसन्धत्ते तदर्थञ्च सर्वदा प्रयतते इत्यत्र मास्तु केषाञ्चिदपि विपश्चिदपश्चिमानां स्वान्ते कोऽपि संशयः । यद्यपि बहवो विमर्शात्मकलेखाः अस्माभिः प्राप्ताः, तथापि त्रिपथगामिन्याः अस्याः जाह्नव्याः एतस्यां सञ्चिकायां सूक्ष्मेक्षिकैः मुख्यसम्पादकैः तत्रभवद्भिः विमर्शकवर्यैश्च कानिचिदेव लेखनानि समालिङ्गितानि पत्रिकाकलेवरविस्तरभिया । परमस्मत्सु विश्वासात् लेखनानि प्रेषयितृभ्यः सर्वेभ्यः पण्डितेभ्यः हार्दमभिन्दनं प्रत्यर्प्यते । सर्वेभ्यः सम्पादनसहायकेभ्यः, विमर्शकेभ्यः, लेखकेभ्यः, सहृदयाध्येतृभ्यः, जाह्नव्याः सर्वसदस्येभ्यः अभिवन्दनानि अभिनन्दनानि च ।

विशेषतो सञ्चिकामिमां कल्याणनगरेत्यपरनाम्नि बेङ्गळूरुनगरे प्राकाश्यन्नीतेभ्यः परमपूज्यस्वामिपादेभ्यः महद्भ्यः श्रीश्री सुगुणेन्द्रतीर्थगुरुचरणेभ्यः अस्मन्मित्रवर्ययोः **आचार्य डा॥ सुमन्** , **आचार्य डा॥ सुनील** महोदययोः तत्रापि विशेषतो '**जिज्ञासा**'® इति संस्थायै च सकार्तज्ञ्यं अभिवादनानि समर्पयति **जाह्नवी** ।

युष्माकं रसिकानां प्रोत्साहं सर्वदा नितराम् अपेक्षते जाह्नवी ॥

विद्वत्पादपांसुलः,



**बिपिनकुमारझा**

बलाहरः, हि.प्र.

रामनवमी, २०७०

***************************************************************

# NEW FAQ

**शोधप्रकाशित होने के लिए आवश्यक शर्त।**

(जहाँ पूर्वप्रदत्त आंग्लनियमावली से वैमत्य हो, आंग्लनियमावली ही मान्य होगी।)

1. मौलिकता
2. अन्यत्र कहीं न तो प्रकाशित हुआ हो न प्रकाशित होने के लिये भेजा गया हो। (यदि अन्यत्र कहीं प्रकाशित हुआ है और संस्कृतजगत् हेतु महान् उपकारक है तो इसे शृङ्खला प्रभाग में मूलप्रकाशक के विवरण के साथ सम्पादकमण्डली के अनुमोदन पर प्रकाशित किया जा सकेगा)
3. Undertaking form प्रेषण (यह Home page पर Form पर प्राप्य है।)
4. Essential data form पूर्ति (यह Home page पर Form पर प्राप्य है।)
5. संस्कृत में निबद्ध हो अथवा संस्कृत विषयवस्तु हो एवं संस्कृतम्, हिन्दी अथवा आंग्ल मे निबद्ध हो।
6. इस पत्रिका में प्रकाशित साहित्यानुरागः प्रभाग के निमित्त ही शैक्षिक लाभनिमित्त उपयोग करसकते हैं (UGC के सन्दर्भ में)
7. शोधपत्र, undertaking form तथा प्रयुक्त फोण्ट अनिवार्य रूप से एक Zip फोल्डर में केवल स्वयं के E-mail ID से प्रेषित किया जाय।
8. शोधसार 100 शब्द तथा शोधपत्र की सीमा 1500 शब्द है।
9. प्रेषित किये जाने बाले E mail का Subject अनिवार्य रूप से - 'Title of write up +Your name+Your DOB' हो।

**शोधपत्र कब भेजें-**

लोकार्पण- Jan, Apr, July, Oct तदर्थ तिथि क्रमशः - 1st Dec 1st Mar, 1st June, 1st Sep.

**सहयोग राशि क्या है?**

यह पत्रिका केवल और केवल संस्कृतजगत् के उत्कर्ष के लिये समर्पित है। साथ ही जो अपनी मेधा अभिव्यक्ति हेतु प्लेटफार्म की तलाश कर रहे हैं उनके प्रोत्साहन के लिये है। फिर भी पत्रिका को सुचारु रूप से चलाने के लिये नेट, सर्वर, सम्पादन आदि में जो व्यय करना होता है उसके लिये सक्षम पाठक से अपेक्षित राशि 1000/- प्रति शोधपत्र है। यह मात्र 'साहित्यानुराग' प्रभाग के लिये है। जो शोधार्थी अथवा लेखक उक्त राशि देने में सक्षम नहीं हैं उनके लिये यह अनिवार्य नहीं है।
जो स्वेच्छया उक्त राशि सहयोग के रूप में देना चाहें उनका स्वागत है

**टङ्कण सन्दर्भित समस्या है?**

यदि टङ्कणकार्य में समस्या हो रही है, तो यूनीकोड में टङ्कण हेतु सम्पर्क करसकते है- श्री आशुतोष झा- 7376194873

**शोधपत्र कैसे भेजें?**

E-mail jahnavisanskritjournal@gmail.com

**हस्तलिखित पाण्डुलिपि एवं यूनीकोड में टङ्कित सान्द्रमुद्रिका-**

Bipin Kumar Jha, Deptt. of Sahitya, Rashtriya Sanskrit Sansthan, Deptt. Of Sahitya Vedavyas Campus, Balahar, Dist Kangra, Himachal Pradesh 177108 India

**शोधपत्र का प्रारूप क्या हो?**

| क्रम | संस्कृत | हिन्दी | आंग्ल |
|---|---|---|---|
| 1 | शीर्षकः | शीर्षक | Title |
| 2 | कूटशब्दाः | कूटशब्द | Key words |
| 3 | शोधसारः | शोधसार | Abstract |
| 4 | शोधः (मुख्यांशः) | शोध (मुख्यांश) | Article |
| 5 | टिप्पणी (पाद-मध्य अथवा अन्त) | टिप्पणी (पाद-मध्य अथवा अन्त) | Foot/mid/end notes |
| 6 | सन्दर्भसूची | सन्दर्भसूची | Bibliography |



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

**किन शोधों को वरीयता दी जाती है?**

1. संस्कृत में निबद्ध
2. शोधप्रविधि अनुपालित
3. समसामयिकसन्दर्भ में उपादेय
4. विज्ञान-प्रौद्योगिकी एवं संस्कृत सन्दर्भित
5. विभन्न विश्वविद्यालयों/संस्थानों में हो रहे शोध की स्थिति/आंकडे/गुणवत्ता हेतु किये जा रहे प्रयास/गुणवत्ता हेतु सम्भावित मार्ग/विविध विषयों की जानकारी प्रभृति विषयक

**सन्दर्भ कैसे लिखें-**

इस निमित्त undertaking form में दिये प्रारूप का अनुगमन करें अथवा APA (American Psychological Association) के नियमों का अनुगमन करें।

**लोकार्पण विवरण–**

NEW **विस्तृत अन्तर्जाल पर सन्दर्भित पृष्ठ पर द्रष्टव्य है।**

| Issue | Vol | Date | Place | Person |
|---|---|---|---|---|
| 1st | I | 20.01.10 | Tirupati | **Prof. H K Shatapathi**, VC |
| 2nd | I | 20.04.10 | BHU | **Dr. K P Upadhyay**, Registrar, BHU |
| 3rd | I | 13.08.10 | Darbhanga | **Dr. Ramji Thakur**, Sahitya Akadami Awarded |
| 4th | I | 30.10.10 | Autlanta | **Dr. Dinbandhu Chandaura** |
| 5th | II | 08.02.11 | LBS | **Dr. B K Mohapatra**, Registrar, LBS |
| 6th | II | 01.05.11 | Allahabad | **Swami Nikhilatmanandaji Maharaj**, Chairman, Ramakrishna Math |
| 7th | II | 15.07.11 | Madhubani | **Dr. S D Singh**, R K College, Madhubani |
| 8th | II | 19.11.11 | Punjab University | **Dr. Shankarji Jha**, Ex. Head, Sanskrit department, PU |
| 9th | III | 02.02.12 | Kolkata | **Prof. R V Tripathi**, V C, Rashtriya Sanskrit Sansthan, New Delhi |
| 10th | III | 12.05.12 | JRRSU | **Prof. R Devanathan**, VC, JRRSU, Jaipur, Rajasthan |
| 11th & 12th | III | 10.11.12 | Lucknow | **Prof. Om Prakash Pandey**, Ex Head Deptt of Sanskrit, Lucknow University |
| 13th & 14th | IV | 4.05.13 | Bengaluru | **H.H.Shri.Sugunendra teertha Swamiji,** Puttige Matha, Karnataka |

H.H.Shri Shri SuguNendra teertha swamiji, Pontiff of Puttige Matha, Udupi,Karnataka.(**परमपूज्याः श्री श्री सुगुणेन्द्रतीर्थस्वामिनः**, मठाधीशाः, पुत्तिगे मठः, उडुपि, कर्णाटकम्)

Date- 04:05:2013 (दिनाङ्कः - ४-५-२०१३)

Time- 6:00pm. (समयः - सायं ६ वादनम्)

Venue - Shri Govardhanagiri SabhaaNgaNam, Basavanagudi, Bangalore (श्री गोवर्धनगिरि सभाङ्गणम्, गोवर्धन गिरिः, पुत्तिगे मठः, बसवनगुडि, बेङ्गळूरु.)

# साहित्यानुरागः





## वेदविज्ञानस्यावश्यकता

डा ॥ सुनीलः के. एस्.[3]

Key Words: वेदाः , चातुर्वर्ण्यम् , चतुर्विधपुरुषार्थाः , पुनर्जन्म , राष्ट्रम्, वर्णधर्माः, दायभागः ॥

विन्दन्ति जानन्ति विधेयान् धर्मार्थकाममोक्षान् विद्याः कलाः ज्ञानानि विज्ञानानि च येन जनाः स वेदः , ज्ञानम् । ज्ञानार्थात् विद्धातोरच्प्रत्यये रूपमिदम् । वेदशब्दस्य ज्ञानार्थकत्वमुपपादयति कृष्णयजुर्वेदीयभाष्यभूमिकायां श्रीसायणाचार्यः

**"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एतं विन्दन्ति वेदेन तस्मात् वेदस्य वेदता" ॥**

ज्ञानमिह नेत्रं , देहिनां परमावश्यकं चेति सर्वेषां पदार्थानां गुणानां कर्मणां च ज्ञानाय परिज्ञानाय चापि सन्तीह प्रवृत्तयो जनानाम् । पुरा जगदुत्पादनसमकालमेव विश्वस्य कर्ता लीलाविहारी परमेश्वरो जीवान् निर्माय तेभ्यो ज्ञानं ददौ । देहिनां देहेषु स ज्ञानाधिष्टनानि पञ्चज्ञानेन्द्रियाणि च प्रत्यतिष्ठिपत् । ततश्च तेषां तत्र कर्मेन्द्रियाणि निर्माय कर्माधिकारं व्यजिज्ञपत् प्रभुरीश्वरः । तस्य निःश्वासो वेदाः महर्षिणां मनस्सु परमेश्वरस्येच्छया ज्ञानमाविरकुर्वन् । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति चत्वारः सन्ति वेदाः । आम्नायः आगमः श्रुतिः इति वेदस्य पर्यायवचनानि । वेदा हि अपौरुषेयाः शाश्वताः निःशेषज्ञाननिधानानि च । सर्वज्ञानमया वेदाः । सर्वं विदुर्विदो वेदे सर्वं प्रतिष्ठितम् । नेह ज्ञानं विना कस्यापि कर्मप्रवृत्तिः नापि च कर्मसंपादनार्थं सम्भवति । यो जनः यत्कर्म कर्तुं जानाति स एव ततम्पादयितुं क्षमते , अन्यस्तु न क्षमः इति प्रतिनिवर्तते कार्यसम्पत्तेः । ज्ञानं हि कर्मसु प्रवर्तकं जनानाम् ।

वेदेषु जगतां व्यवसायै मानुषाणां कल्याणाय च – ब्राह्मणः क्षत्रियः वैश्यः शूद्रः दस्युश्चेति पञ्चभेदाः प्रतिपादताः मानुषाणां। त एव पश्चाज्जातिरूपेण व्यवहारमवाप्नुवन् । वेदेषु वर्णाः कार्यविभागाय कृताः , नतूच्चनीचभावनाय इति जातिभेदमविहाय मानुषा मिथः स्नेहेन वर्तेरन्निति वेदोपदेशः -

**"प्रियं मा कृणु देवेषु प्रिय राजसु मा कृणु ।**
**प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये" ॥ (अथर्ववेदः)**

पुरातनेषु युगेषु वेदाध्ययनमेव मुख्यमध्ययनमासीदार्याणाम् । महर्षयो वेदान् अधीत्य लोके ज्ञानस्य प्रचारमकर्वन् । वेदेषु ब्राह्मणक्षत्रियवैश्यशूद्राणामवराणां च कर्तव्यानि, धर्मार्थकाममोक्षाणां पुरुषार्थानामुद्देश्यानि, ब्रह्मचर्यगृहस्थवानप्रस्थसन्यासामाश्रमाणां च व्यवस्थाः मानुषाणां कल्याणार्थाय पदे पदे वर्णिताः सन्ति । तत्र विद्यानां कलानां यन्त्राणां ज्ञानानां विज्ञानानां च सर्वविधानां वर्तते स्थाने स्थाने वर्णनम् । तत्र जगतः उत्पत्तिः , स्थितिः लयश्च वर्णिताः सन्ति ।

[3] Asst Professor,, Department of Sanskrit, Sri Bhagawan Mahaveer Jain College, Bangalore-4

तत्र मानुषाणां भद्राणि कर्तव्यानि, हेयानि कार्याणि, लोकव्यवहारा जीवनोपाया देवोपासना मिथ: पूजाश्च बहुत्र वर्णिता: सन्ति । सर्वं ज्ञातव्यमशेषं कर्तव्यं च वर्तते वेदेषु लिखितम् । पुनर्जन्मापि वेदेषु प्रतिपादितं वर्तते , यथा –

**“यो धर्माणि प्रथम: ससाद ततो वपूंषि कुरुते पुरूणि ।**

**धस्युर्योनिं प्रथमं आविवेश यो वाचमनुदितां चिकेत”॥**

**(अथर्ववेद:)**

विश्वमिदं वेदेषु राष्ट्रमेकं वर्णितम् । राष्ट्रस्य च तस्य रक्षां कल्याणं च तत्र पदे पदे वर्तते प्रार्थितम् ।

**“ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पति : ।**

**ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ।**

**भद्रमिच्छन्त ऋषय: स्वर्विदस्तपसो दीक्षामुपनिषेदुरग्रे ।**

**ततो राष्ट्रं बलमोजश्च जातूं तदस्मै देवा उपसंनमन्तु”**

**(अथर्ववेद:)**

वेदेषु मानवानां कल्याणाय सन्ति देवप्रार्थना:, मानवजीवने समापतितानां विघ्नानां निवारणोपायाश्च तत्र विज्ञानविधय: यज्ञविधानानि, काम्यकर्मप्रकारास्तेषां साधनोपायाश्च प्रतिपादिता: सन्ति । येषामनुष्ठानेन मान्व सर्वकामानवाप्नोति । पुरातना महर्षयो वेदानधीत्य सर्वज्ञकल्पा अभवन् । ततश्च कालक्रमेण भूयो भूयो भूयो ज्ञानस्य ह्रासा: प्रारभन्त । मानुषा अल्पबुद्धय: समजायन्त । तेषां च कृते महर्षिवेदव्यासोऽन्ये चर्षयो विविधानि सरलानि शास्त्राणि लिलिखु: । येषां चाल्पबुद्धीनां जनानां वेदेषु गतिर्नासीत् ते द्विजेतरजातय: शास्त्राणि तानि पुराणानि चाधीत्य ज्ञानमुपार्जयन् ।

चतुर्षु वेदेष्वधीतनो द्विजाश्चतुर्वेदा:, त्रिषु वेदेषूपपन्ननैपुणा: त्रिवेदिन: , द्वयो: वेदयोरधीतनो द्विजवरा द्विवेदिनश्चेदानीमपि नाम्ना प्रसिद्धा: सन्ति । भारते वैदेशिकानामाप्रवेशादहितमती हानिरजायत भारतीयाया: संस्कृते: । स्वतन्त्रे भारते पुनरिदानीमार्यसनातनवैदिकधर्मानुयायिनो भारतीया वेदाध्ययनशीला भवेयु: । भारते लब्धप्रवेशा: वैदेशिका आङ्ग्ला: शर्मण्याश्च वेदानधीत्य वैज्ञानिका: समवर्तन्त इदानीन्ते ज्ञानिनो बलवन्तो धनिनो यशस्विनश्च सन्तीति तेषां वेदाध्ययनस्य फलम् ।

न केवलं भारतीयवाङ्मयं एव, किन्तु पृथिव्या: समस्तेऽपि वाङ्मये , अतिप्राचीनत्वात् अतिविस्तृतत्वात् पुरुषार्थचतुष्टयसमन्वितत्वात् व्यापकदृष्ट्या विविधगूढातिगूढविषयप्रतिपादकत्वेन अतिगम्भीरत्वाच्च वैदिकवाङ्मयस्याद्वितीयं महत्वमिति नैव तिरोहितं विपश्चिताम् । तस्यैवास्य वाङ्मयस्य तत्तद्भागक्रमेण वैदिकवाङ्मये धर्मसूत्राणि कथं सूत्रितमिति विषयमधिकृत्य प्रबन्धमालारूपेण प्रवृत्तोऽस्त्ययं विचार:॥

इदानीन्तनहिन्दूसमुदाचारविषये प्रमाणत्वेन गृह्यमाणानि मनुस्मृतिप्रभृतीनि पद्योपनिबद्धानि धर्मशास्त्राणि खलु प्राचीनतराणि कल्पसूत्राणि भृशमुपजीवन्तीति सुविदितमेव संस्कृतवाङ्मयविकासविदां विदुषाम् ।

महाभारते (१३-६६-१२) चापि शङ्खलिखितगौतमापस्तम्भादीनां धर्मसूत्रकाराणां नामानि सप्रश्रयं स्मर्यन्ते । कस्यचित् (धर्म)सूत्रकारस्य मतमुदाहरन् व्यास: प्राह –

**“अनृता: स्त्रिय इत्येवं सूत्रकारो व्यवस्यति ।**





**यदानृता: स्त्रियस्तात सहधर्म: कुत: स्मृत:” ॥**

(महा-१३,१८,६)

एवं धर्मसूत्राणि संस्कृतवाङ्मये विशिष्टां पदवीमधितिष्ठन्ति समादरं च भजन्ते ।

कालक्रमेण धर्मसूत्रस्थानां केषांचन धर्माणां जनाग्राह्यत्वे जातेऽपि , धर्मसूत्रवचसां समादरोऽद्याप्यक्षुण्ण एव । कालेन सदाचारधर्मा: परिवर्तन्ते नूतनधर्माश्चोद्भवन्तीति विषये न कस्यापि विप्रतिपत्ति: । धर्मसूत्रेषु प्रतिपदिता भूयांसो धर्मास्तु अद्यत्वेऽपि हिन्दुसमाजेन तथैव स्वीक्रियन्ते । अतिप्राचीने कालेप्यार्यास्तान् धर्मान् अन्वसरन् । एते सर्वे धर्माश्च सूत्रकारैर्न स्वयं प्रकल्पिता: , अपि तु प्रायेण प्राक्तनेभ्य: स्रोतेभ्य: संगृह्य यथामति यथाकालं च व्याख्याता: । यथा च बौधायन: प्राह - “उपदिष्टो धर्म: प्रतिवेदम् । तस्यानुव्याख्यास्याम:” (बो.ध.सू-१.१.१-२)एतदेवमतमनुसरन्नापस्तम्बो व्याचष्टे –

**“अथात: सामयाचारिकान्धर्मान्व्याख्यास्याम:”**

(आ.ध.सू १-१-१-१)

इत्थं धर्मसूत्राणि प्राकृतानानामेव धर्माणां व्याख्यानरूपाणि । सर्वे सूत्रकारा: स्मृतिकाराश्च वेदमेव धर्मस्यादिमं मूलं मन्यन्ते । परन्तु ये धर्मा: प्रत्यक्षरूपेण वेदे नोपलभ्यन्ते तेषां मूलं वेदविदां स्मृतौ शीले चान्विष्यन्ते[4] । उपरिष्टादस्य विषयस्य सविस्तरं विवेचनं करिष्याम: ।

धर्मसूत्रकारैर्मन्त्रब्राह्मणात्मको वेद: प्रमाणत्वेनाङीकृत: । अत एव ते बहुधा मन्त्रै: सह ब्राह्मणवाक्यान्यपि श्रुतिवचनेनोदाहरन्ति । काश्चिद् वैदिक्यो गाथा अपि सूत्रेषु सङ्गृह्यन्ते । अस्तु , यान्धर्मानधिकृत्य सूत्रकारै: श्रुतिवचांसि संगृहीतानि तेषां दिङ्मात्रमिह प्रदर्श्यते ।

**स्नातकधर्मा:** -

स्नातकधर्मपराणि श्रुतिवचनानि च धर्मसूत्रैरुदाह्रियन्ते । यथा हि शतपथब्राह्मणमतमुदाहरन् वसिष्ठ: प्राह – “भार्यया सह नाश्नीयादवीर्यवदपत्यं भवतीति वाजसनेयके विज्ञायते” (वा.ध.सू -१२-३१)[5]। स्नातक: सत्रादन्यत्र शिखां न वापयेदिति धर्मं व्याचक्षाण आपस्तम्ब: श्रुतिमुदाहरति[6] ।

**वर्णधर्मा:** - यदपि वर्णशब्दो ऋग्वेदे जातिं नाभिधत्ते , तदपि मन्त्रेऽस्मिन् चत्वारो वर्णा अभिधीयन्ते -“ब्राह्मणोस्य मुखमासीत् बाहूराजन्य: कृत: । ऊरू तदस्य यद्वैश्य: पद्भ्यां शूद्रो अजायत”(ऋ-१०-६०-१२)

श्रुतावन्यत्रापि वर्णविषयकोऽयं मन्त्रो दृष्यते[7] । काठकसंहितायां वर्णशब्द: स्पष्टमेव जातिमाचष्टे । यथा च काठकसंहितायां (३४,५) श्रूयते -“आर्य वर्णमुज्जापयति” इति ।ब्राह्मणेषु तु स वर्णार्थं एव प्रयुक्त: । तैत्तिरीयब्राह्मणम् (१,२,६,७) अस्मिन् विषये प्राह - “दैव्यो वै वर्णो ब्राह्मण:” “आर्य वर्णमुज्जापयन्ति” इत्येष प्रयोग: पञ्चविंशब्राह्मणे (५-५-१७)दृश्यते ।

---

[4] वेदो धर्ममूलम् । तद्विदां च स्मृतिशीले – गौतमधर्मसूत्रं-१-१-२

[5]तस्माज्जायाया अन्ते नाश्नीयाद्वीर्यवान् हास्माज्जायते ( श.ब्रा- १०,५,२,६)

[6]“अथापि ब्राह्मणम् । रिक्तो वा एषोऽनपिहितो यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति । सूत्रेषु तु वपनाद्वपनं शिखाया:”

[7]तैत्तरीयारण्यके ३-१२-५

एतादृशानि श्रुतिवाक्यान्यवष्टभ्य धर्मसूत्रकारा वर्णधर्मान् व्याचक्षते । वसिष्ठस्तु साक्षादेव वर्णविषयकं मन्त्रमुदाहरति - "प्रकृतिविशिष्टं चातुर्वर्ण्यं संस्कारविशेषाच्च" । अन्ये सूत्रकारा: शतपथब्राह्मणमनुसृत्य वर्णान् परिगणयन्ति । यथा - "चत्वारो वर्णा: ब्राह्मणक्षत्रियविड्शूद्रा:"[8] ,"चत्वारोवर्णा: ब्राह्मणक्षत्रियवैश्यशूद्रा:"[9]। परन्तु चतुर्णां वर्णानां कर्मणां पृथक्त्वं श्रुतावनेकधा दरीदृश्यते । अपि च केषुचित् कर्मसु वर्णविशेषस्यैवाधिकार: श्रूयते । यथा च ब्राह्मणवर्णस्य याजनाधिकारं प्रतिपादयच्छतपथब्राह्मणं (१३,४,१,३) प्राह –"य उ वैकश्च यजते ब्राह्मणीभूयेवैव यजते" । ब्राह्मणानां याजनाधिकारो मैत्रायणीसंहितायां एवं श्रूयते – "द्वया वै देवा यजमानस्य गृहमागच्छन्ति सोमपा अन्येऽसोमपा अन्ये, एते वै देवा आहुतादो यद् ब्राह्मणा:" (१.४.६) । दानप्रतिग्रहणे सोमपाने च ब्राह्मणानामधिकारं विदधानं ऐतरेयब्राह्मणमाचष्टे – "यद् यस्य क्षत्रियस्य पापं भवति तस्य सन्ततौ ब्राह्मणसदृश: पुत्रो जनिष्यते य: दानं प्रतिग्रहीष्यति सोमं च पास्यति"[10] । ब्राह्मणेतरवर्णानामधिकार: श्रुतौ कुत्रापि न श्रूयते । ब्राह्मणस्याधिकारा: कर्माणि च शतपथब्राह्मणे एवं विधीयन्ते –

**"प्रज्ञा वर्धमाना चतुरो धर्मान् ब्राह्मणमभिनिष्पादयति – ब्राह्मण्यम् प्रतिरूपचर्या यशो लोकपंक्तिम् ; लोक: पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मणभुनक्ति"** ।

- (११.५.६.७.१)

**द्विजातीनामध्ययनमिज्या दानम् ।**

**ब्राह्मणस्याधिका: प्रवचनयाजनप्रतिग्रहा:"**

- (गौ.ध.सू १०,१-२)

**"ब्रह्मा वै स्वं महिमानं ब्राह्मणेष्ववदधादध्ययनाध्यापनयजनयाजनदानप्रतिग्रहसंयुक्तं वेदानां गुप्त्यै"** ।

(बौ.ध.सू १,१८,२)

षड्कर्माणि ब्राह्मणस्य । स्वाध्यायाध्ययनमध्यापनं यज्ञो दानं प्रतिग्रहश्चेति[11] । उपरिनिर्दिष्ट शतपथब्राह्मणोक्तदिशा धर्मसूत्रकारा ब्राह्मणस्यावध्यत्वमाचक्षते । यथा च बौधायन: प्रब्रूते –

**"अवध्यो वै ब्राह्मणस्सर्वापराधेषु"**

(बौ.ध. १-१८.१७) ।

यद्यपि कतिपयेषु यज्ञेषु वर्णविशेषस्याधिकारो विधीयते श्रुत्या । तथापि प्रायेण सर्वेषां द्विजानां अध्ययने यज्ञे च समानोऽधिकार: श्रूयते । श्रुतौ क्वचिद् आर्यशब्दोऽपि द्विजान् अभिधत्ते । एवं सूत्रकारा अपि द्विजेभ्य आर्यशब्दं प्रयुञ्जते , इज्याध्ययनदानानि च तेभ्यो निर्विशेषं विदधति ॥

[8]बोधायनधर्मसूत्र १-१६-१

[9]आपस्तम्भधर्मसूत्र १-१-१

[10]ऐ.ब्रा –(७.२६)"त यदि सोमं ब्राह्मणानां स भक्षो ब्राह्मणांस्तेन भक्षेण जिन्विष्यति.."

[11]मनु . १०-१५; या.स्मृति – १,११८





**दायभाग:** - धर्मसूत्रकारा दायभागपरां श्रुतिमुदाहृत्य दायभागधर्माणां श्रुतिमूलत्वमुपपादयन्ति । पितैव पुत्रेभ्यो दायं विभक्तुमर्हतीति सिद्धान्तं निश्चेतुं बौधायन: श्रुतिवचनमुप्यस्यति [12] ।पिता पुत्रेभ्य एव दायं विभजेन्ननु दुहितृभ्य इत्येतदप्यस्माच्छ्रुतिवचनादायातीति सूत्राख्यातारो मन्यन्ते (बौ.ध.सू- २-३-२) ।बौधायन: स्पष्टमेवाभिधत्ते यत्पितरि जीवति पितुरनुज्ञैव दायविभाग: स्यात् ।ज्येष्ठ: पुत्रोऽधिकं दायं लभेतेति केचनाचार्या[13] मन्यन्ते स्म । एतन्मतं दृढयितुं बौधायन: श्रुतिवचनमुदाहरति – "तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीति श्रुति:" । कतिपय आचार्या[14] अमन्यन्त "यज्ज्येष्ठ: पुत्र एकल: सर्वं दायादं हरेत्"। मतमेतत्प्रत्याचक्षाण आपस्तम्बो मनुते यदेतादृशं विभाजनं शास्त्रै: (वेदै:)विप्रतिषिद्धमस्ति । अत एव सर्वे पुत्राः समं दायं विभजेरन् [15]। समदायविभागस्य श्रुतिमूलत्वं दर्शयन् आपस्तम्बस्तदेव श्रुतिवचनमुदाहरति यद् बौधायनेन प्रयोजनान्तर उदाहृतम् – "मनु: पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते" [16]। अस्माद्विवेचनात् स्पष्टमेवेदमायाति यद् धर्मसूत्रकारा: श्रुतिवाक्यानि व्याख्याय धर्मं प्रतिपादयन्ति ।

अनेकानि श्रुतिवचनानि प्रचक्षते यत् स्त्रियो दायं न भजन्ते[17]। सूत्रकारा: प्रायेण मतमेतदनुसरन्ति । बौधायनधर्मसूत्रे (२.३.४७) दायविभागपरा श्रुतिरुदाह्रियते । परन्तु मतैक्यमत्र न विद्यते । गौतममते पत्नी सपिण्डादिभि: सह रिक्तं भजते[18] । आपस्तम्बमते दुहितापि विकल्पेन दायं लभते[19] ।श्रुतिव्याख्यानभेदादेव दायविभागपरो भेद: संजात: इति मन्यामहे । यथा च यास्क: प्राह –

**"अथैतां दुहितृदायाद्य उदाहरन्ति । पुत्रदायाद्य इत्येके"**

-(निरुक्ते ३,३)

**उपसंहार:**

धर्मसूत्रकाराणां स्मृतिकारणां चैको महान् भेदो विद्यते । स्मृतिकाराणां वचांसि विधिरूपेण प्रस्तूयन्ते । ते प्रायेण कथयन्ति – धर्मान् वक्ष्यामि इति । परन्तु धर्मसूत्रकाराः प्रायेण धर्माणां व्याख्यानमेव प्रतिजानते । ते मन्यन्ते यद् धर्मा: पूर्वमेव विद्यन्ते । ते तु श्रुतिमनुसृत्य तान् व्याचक्षते । एकैव श्रुतिरनेकधा व्याख्यायते सूत्रकारैर्यथा पूर्वं निर्दिष्टम् ।

धर्मसूत्रकारा: सर्वथा श्रुतिमनुसन्धाय धर्मान् ववर्णु: । यत्किञ्चच्छ्रुते: प्रतिकूलं तत्ते प्रत्याचक्षते । धर्मसूत्रेषु प्रतिपादितानां धर्माणां श्रुतिमूलत्वप्रदर्शनार्थं भूयान्प्रयासोऽपेक्ष्यते । इह तु तस्य दिङ्मात्रं प्रदर्शितं विदुषां परितोषाय । ज्ञातात्मनो वेदाधीतिन: पूर्वजा

[12]"मनु: पुत्रेभ्यो दायं व्यभज"दिति श्रुति: (बौ.ध.सू- २-३-२)

[13] गौ.ध.सू – २८,१४

[14] मनुस्मृति: -६.१०५

[15] आ.ध.सू – २-६-१४

[16] आ.ध.सू -२-६-१४

[17] मै.सं- ४.४.६ –"तस्मात्पुमान्दायाद: स्त्र्यदायादा

[18] गौ.ध.सू – २८,२२

[19] आप.ध.सू – २-६-२४

अस्माकं दीर्घायुषो ज्ञानिनो बलवन्तो वैज्ञानिका धनिनो मनस्विनो यशस्विनश्चासन् । पदार्थवैज्ञानिके युगेऽस्मिन् अस्माभिरपि पुनर्वेदानां शास्त्राणां च गाढं ज्ञानं सम्पादनीयम् । मानवजीवने परमोपयोगिज्ञाननिधानानां वेदानामध्ययनमिदानीन्तने युगे लोकान् चमत्कारचकितान् कर्त्तुं स्वप्रसिद्धये स्वदेशप्रतिष्ठायं चातीवावश्यकम् । सोपपत्तिकं वेदानां ज्ञानमपेक्ष्यतेऽधुना । केवलं भौतिका वैज्ञानकाः पाश्चात्या विजेतव्या अस्माभिः । वेदानां सार्थकमध्ययनं बहूपकरिष्यति जनानां । यो जनो वेदान् वेदाङ्गानि च जानन्ति स सम्यक् जानाति सर्वज्ञकल्पः सञ्जायते , लभते च लोकेषु पूज्यस्थानम् । तस्मात् –

**"वेदा हि ज्ञानविज्ञानविद्यानां निधयो मताः ।**

**अत्धीत्य च मेधावी सर्वज्ञत्वाय कल्पते" ॥**

**परामृष्ट्ग्रन्थाः --**

- आपस्तम्भसूत्रवृत्ति -टि.टि.श्रीनिवासाचार्यः ,महिशूरपुरम् ओरियन्टल् लैब्ररि पब्लिकेषन्स् -१९४४-५३
- Ten principal Upanishads with shankarabhashya : Delhi MTLBDS,1964
- Madhwa' aupanishadam Darshanam -by BNK Sharma, DVSR foundation, 1986
- Aspects of political ideas and institutions in ancient India -Ram Sharan Sharma, Motilal Banarsidass Publ., 1999
- याज्ञवल्क्यस्मृतिः -Evolution of Indian polity, Rudrapatna Shama Sastri University of Calcutta, 1920
- मनुस्मृतिः- Harikrishna Printers, 1986

**********************





# विचारपूर्वाङ्गः संशयः

पीयूषकान्तदीक्षितः[20]

**कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः।**
**मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः॥**

परब्रह्मस्वरूपः परमेश्वरः स्वमायया मोहापरपर्यायया नूनं सम्पूर्णं ब्रह्माण्डं सम्मोहयत्येव। परितः समभिव्याप्तं मोहनिबिडान्धकारं समूलमुत्सारयितुकामा मनीषिणस्तत्तच्छास्त्रप्रवर्त्तका उद्योगविशेषमपि शास्त्रप्रणयनमुखेनाकुर्वन्निति सुविदितमेव विदुषाम्। यद्यपि सर्वेषु शास्त्रेषु प्रायः संशयमूलकस्यास्य मोहस्यापनयनार्थं पर्याप्तः प्रयासस्तत्र–तत्र दरीदृश्यते। तथापि यादृशो मोहावरोधप्रयासो न्यायशास्त्रे सुलभो न तथाऽन्यत्र क्वापीति निरवद्यन्तथ्यम्। मन्य अत एव किरणावलीकारेणोदयनेन निरुपमं तर्कशास्त्रमधिकृत्य समुद्घोषितम्–

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं।**
**सूते च संस्कृतपदव्यवहारशक्तिम्॥**
**शास्त्रान्तराभ्यसनयोग्यतया युनक्ति।**
**तर्कश्रमो न कुरुते किमिहोपकारम्॥**

विविधो मोहो बहुविधशास्त्रसम्बद्धो लौकिकव्यवहारेऽपि प्रतिपदमनुभूयमानस्तर्कशास्त्रेणावरुद्धो भवतीति कथनं, तर्कशास्त्राऽनर्थान्तरभूतस्य न्यायशास्त्रस्य, लक्षणस्वरूपप्रामाण्यादिभिस्सामान्यविशेषस्वरूपेण पृथक्पदार्थरूपेण च मोहप्रतिपादनपरत्वमपि दृढं प्रकाशयति।

प्रथमं न्यायसूत्रं महर्षिगौतमविरचितं सन्दर्भेऽस्मिन् परमप्रमाणभूतम्। अत्र परिगणितेषु षोडशपदार्थेषु तृतीयः संशयः सर्वविधविचारप्रवर्त्तको मोक्षसाधनत्वेन तत्त्वतो ज्ञेयतया समुपदिष्टः। आत्मतत्त्वज्ञानं मोक्षात्मकस्य परमपुरुषार्थस्य जनकमित्याञ्जस्येन स्वीकर्त्तुं शक्यं परं संशयादिपदार्थानां तात्त्विकं ज्ञानं कथं मोक्षं जनयतीति जिज्ञासां समादधता महर्षिणा वात्स्यायनेन संशयतत्त्वज्ञानस्यात्मतत्त्वज्ञानजनकतां प्रसाध्य मोक्षजनने प्रयोजकतापि सयुक्ति प्रसाधिता। अत्र संशयनिरूपणस्य मोक्षप्रयोजकतां प्रसाध्य पुनरस्य पृथक्प्रस्थानसाधनतामपि साधु व्यवस्थाप्य न्यायशास्त्रस्योपनिषद्विद्यामात्रपरताया आपत्तिरपि सविधि तावन्निराकृता मुनिनेति विशेषतोऽवधेयम्।

---

[20] Professor, Nyaya-vaisheshik Department, Director, IQAC, Shree Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha, New-Delhi, Pin- 110016

प्राय: संशयग्रस्तेऽस्मिन् विमूढे संसारे चतुर्विधा:[21] पुरुषा: सञ्चरन्ते। केचन तावत् प्रतिपन्ना: पुरुषा भवन्ति। तु विप्रतिपन्ना: सर्वथा दृश्यन्ते। पुन: केचन सन्दिग्धास्तावदनुपदं संसरन्ते। शिष्टा अन्ये खलु विपर्यस्तास्तत्र-तत्र मुग्धा: किंकर्त्तव्यविमूढा: समवलोक्यन्ते।

सूक्ष्मेक्षिकया परित: व्याप्तं संसारं साक्षात्कुर्मश्चेत् प्रायश्चतुर्धा विभक्ता: पुरुषा अनायासन्तावदाविद्वदङ्गनागोपालं प्रसिद्धा एव। एवंविधेषु पुरुषेषु मध्य आद्ययोर्द्वयो: प्रतिपन्नविप्रतिपन्नपुरुषयो: सन्दर्भे लौकिकानां विशेषत: शास्त्राणाञ्च समुत्साहो नैव परिलक्ष्यते, प्रथमस्य तत्त्वज्ञानदार्ढ्यात् द्वितीयस्य पुरुषस्य च विपरीतं प्रतिपन्नत्वात्।

अन्त्ययो: द्वयो: पुरुषयो: सन्दिग्धविपर्यस्तयोर्मोहान्धकारनिवारणार्थमेव लोके शास्त्रे च प्राय: समान: संरम्भ: समुपलभ्यते। एतेषु चतुर्विधेषु प्रसिद्धेषु पुरुषेष्वन्त्ययोरुभययो: पुरुषयोरज्ञकोटौ समावेशो मम दृष्ट्या सम्भवदुक्तिक:। अनयोरेव मूढनाम्नाऽपि लोके प्रायो व्यवहारो भवतीत्येतदपि रम्यं वच:। एषु प्रथम: प्रतिपन्नपुरुषस्तु विशेषज्ञकोटौ प्रविशतीति विज्ञेयम्। विप्रतिपन्नस्तावद्विशिष्ट: पुरुष: ज्ञानलवदुर्विदग्धसमाख्ययाऽलङ्कर्त्तुं शक्य इति मे भाति। फलत: प्रसिद्धोऽयं श्लोकोऽप्यभिमतं तथ्यं पोषयितुमलम्भवतीति ध्येयम्-

**अज्ञ: सुखमाराध्य: सुखतरमाराध्यते विशेषज्ञ:।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि तन्नरं न रञ्जयति॥**

एतावताऽज्ञा मूढा: सन्दिग्धा विपर्यस्ताश्च वा ये पुरुषा लोकेऽस्मिन् लोकान्तरे वा परिभ्रमन्ति तेषामेवोपकारधिया लोके सुधियां शास्त्रकाराणाञ्च शास्त्रसंरचनादौ प्रवृत्तिर्भवतीति सर्वमवदातम्। सन्दिग्धविपर्यस्तयो: पुरुषयोरपि सन्दिग्धस्य संशय: सारल्येनापाकर्त्तुं शक्यो विपर्यस्तस्य च पुरुषस्य शुक्तिकादौ रजतबुद्ध्यापन्नस्य विपर्यासो भ्रमो वा नेदं रजतमित्याकारकाऽऽबाधज्ञानं ब्रह्मणाऽप्यपनेतुमशक्यमेव।

मन्ये अत एव सर्वत्र शास्त्रादौ संशयाना: शिष्या विराजन्ते येषां संशयापनयनार्थं शास्त्रचर्चा नूनमहमहमिकया प्रतिपदं संशयतन्निवारणपुरस्सरा तत्त्वज्ञानार्थं प्रसरति।

[21] पुरुष: पुनश्चतुर्धा भिद्यते प्रतिपन्नोऽप्रतिपन्न: सन्दिग्धो विपर्यस्तश्चेति तत्र प्रतिपन्न: प्रतिपादयिता। इतरे सापेक्षा: सन्त: प्रतिपाद्या:। ते यदेन्द्रियादिसन्निकर्षमपेक्षन्ते तदा प्रत्यक्षेण, यदा लिऽङ्गदर्शनस्मृत्याद्यपेक्षन्ते तदाऽनुमानेन यदा पुनरुपदेशमपेक्षन्ते तदा शास्त्रं प्रवर्त्तते। न्या.द.भा.वा., अ.1 आ.1 सू01पृ.5

भवति च चतुष्प्रकार: पुरुष:; अज्ञ:, सन्दिग्ध:, विपर्यस्त:, निश्चितमतिश्चेति। तत्र निश्चितमतिरेव मुनि: अमुना शास्त्रेण अज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं व्युदस्यतीति तान् प्रति युक्त: शास्त्रारम्भ:। कुत: पुनरस्य मुने: निश्चितमतित्व जातम्, उच्यते- भवति तावदेष निश्चितमति:, स तु तप: प्रभावाद्वा देवताराधनाद्वा शास्त्रान्तराभ्यासाद्वा भवतु। किमनेन? तत्रैतत् स्यात्, तत एव शास्त्रान्तरादस्मदादेरपि तत्त्वाधिगमो भविष्यतीति किमक्षपादप्रणीतेन शास्त्रेण? परिहृतमेतत् सङ्क्षेपविस्तरविधया शास्त्रप्रणयनस्य साफल्यात्, विचित्रचेतसश्च भवन्ति पुरुषा इत्युक्तम् । येषामित एवाज्ञानसंशयविपर्यया विनिवर्त्तन्ते, तान् प्रत्येतत् प्रणयनं सफलमितीदं प्रणीतवानाचार्य:।
न्या.मं.आ.1पृ. 4-12





न्यायदर्शनकर्त्तुर्मुनेरक्षपादस्यादिमं न्यायसूत्रं श्रुत्वा शिष्यस्य संशयो जागर्ति किं षोडशतत्त्वानां तत्त्वज्ञानात् साक्षान्नि:श्रेयसाधिगतिर्भवति? संशयस्यास्य निरसनार्थं 'दु:खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायाद् अपवर्ग:' इति सूत्रमवतरति।

वैशेषिकदर्शनकर्त्तु: कणभक्षस्यादिमं सूत्रम् 'अथाऽतो धर्मं व्याख्यास्याम:' इति विश्रुत्य 'सूत्रनिर्दिष्टो 'धर्म' शब्द: पुण्यवाचक: पदार्थधर्मवाचको वा' इति तावदन्तेवासिनो संशय: समुदेति यस्य निरासार्थं 'यतोऽभ्युदयनि:श्रेयससिद्धि: स धर्म:' इति द्वितीयं वैशेषिकसूत्रमवतरति।

महर्षिजैमिनिप्रणीतायां द्वादशलक्षण्यां 'अथाऽतो धर्मजिज्ञासा' इति पूर्वमीमांसारम्भोपपादनपरस्यादिमस्याधिकरणस्य प्रथमं सूत्रम्। मीमांसाशास्त्रे पञ्चावयवमधिकरणं नितान्तं प्रथितम्। अत्राधिकरणे पञ्चावयवास्तावद् विषयसंशयपूर्वपक्षसिद्धान्तसङ्गतिभेदेनाभ्युपगता: सन्ति। उक्तञ्च-

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥**

अत्र कुमारिलभट्टानुरोधेन प्रस्तुतस्याधिकरणस्य विषयस्तु 'स्वाध्यायोऽध्येतव्य:' इति वेदवाक्यमेव। 'चोदनालक्षणोऽर्थो धर्म:' इति द्वितीयजैमिनिसूत्रादारभ्य 'अन्वाहार्ये च दर्शनात्' इति द्वादशाध्यायस्थसूत्रपर्यन्तञ्जैमिनीयं धर्मशास्त्रमनारभ्यमारभ्यम्वा' इति सन्देह:। सन्देहस्तावदयमधिकरणघटको धर्मविचारणायामनितरसाधारणं महत्त्वमावहतीति विदुषामपरोक्षमेव।

वेदान्ताऽपरपर्यायायामुत्तरमीमांसायामपि 'अथाऽतो ब्रह्मजिज्ञासा' इति ब्रह्ममीमांसारम्भोपपादनपरस्य जिज्ञासाभिधस्य प्रथमाधिकरणस्यादिमं सूत्रम्। अधिकरणस्यास्य विषय: 'आत्मा वा अरे द्रष्टव्य:'[22] इति वाक्यमेवाऽस्ति। ब्रह्मजिज्ञास्यं न वेत्यत्र सन्देह:। सन्देहोऽयं वेदान्तविचारप्रसारणे विशिष्टां भूमिकामाधत्त इति वेदान्तविदामतिरोहितमेव।

साङ्ख्यदर्शनेऽपि दु:खत्रयाभिघाताज्जिज्ञासा तावत्तदपघातके हेतौ सहजतया जायते। सन्दर्भेऽस्मिन् शिष्याणां भवति सहज: सन्देह: 'दु:खत्रयापघातको हेतु: दृष्टोपाय:, अदृष्टोपाय: एतदतिरिक्तो व्यक्ताऽव्यक्तज्ञज्ञानरूपो वा' इति। एवं विधानां सन्देहानां समाधानमुखेनैव समग्रं साङ्ख्यशास्त्रं स्वीयं विलक्षणं वितानमातनोति।

साङ्ख्यप्रवचनापरनामके योगशास्त्रेऽपि प्रथमं महर्षिपतञ्जलिप्रणीतं योगसूत्रं 'अथ योगाऽनुशासनम्' इत्यास्ते। अत्र योग: किं लक्षणक इति प्रश्ने जिज्ञासायां सन्देहे वा 'योगश्चित्तवृत्तिनिरोध:' द्वितीयं सूत्रमाविर्भवति। एवमग्रेऽपि बलेष्वनुमतस्य योगस्य शास्त्ररूपेण प्रसार: सन्देहसमाधानाभ्यां प्रसारमाप्नोतीति नितरामवितथं तथ्यम्।

[22] बृह. उ. 2.4.5

एवं सर्वेषु वादप्रवणेषु ग्रन्थेषु सिद्धान्तस्थापनदिशि संशयस्य विद्यते निरुपमं योगदानमिति निरातङ्कं सिद्ध्यति। अस्माकं समग्रो भारतीयः संस्कृतवाङ्मयः शास्त्रार्थसङ्कुलः वादकथास्वरूपेण राराजते। न्यायदर्शनदिशा 'प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः' इति सूत्राधारेण समग्रेऽपि भारतीये शास्त्रे कस्यापि विषयस्य विजिज्ञासितस्य, प्रमाणैः तर्कैश्च साधनं निषेधः वा क्रियते उपक्रमेऽस्मिन् सिद्धान्तविरोधः नैव सह्यते। वादेऽस्मिन् पक्षप्रतिपक्षपरिग्रहपुरस्सरा या चर्चा प्रवर्त्तते सा नियमितं पञ्चावयववाक्योपपन्ना भवतीति विशेषतो ज्ञेयम्।

यस्य संशयस्य प्रभावेण विचारः प्रवर्त्तते तत्रापि संशयपुरस्सरो विचारो नितान्तमावश्यक इति तावन्निर्विवादं तथ्यम्। लक्षणस्वरूप्रामाण्यादिभिः संशये विज्ञात एव संशयकरण–निराकरणपाटवं विज्ञातुं शक्यत इति ध्येयम्।





# आधुनिक विज्ञान के ऊर्जा सिद्धांत का वेदांतीय परिशीलन

**विकास सिंह**[23]

Key words: ऊर्जा संबंधी सिद्धांत, वेदांत, सापेक्षिकता के सिद्धांत, थ्योरी ऑफ फोटो इलेक्ट्रिक इफेक्ट, थ्योरी ऑफ फोटो इलेक्ट्रिक इफेक्ट

**सारांश : इस शोध पत्र के माध्यम से आधुनिक विज्ञान के ऊर्जा संबंधी सिद्धांत का वेदांत की दृष्टि से परिशीलन किया जायेगा ताकि वेदांत दर्शन की वैज्ञानिकता विद्वत् वर्ग के सम्मुख आ सके। हिरण्यगर्भ सूक्त के आदि मंत्र की भांति एक सघन पिण्ड से सृष्टि के उद्भव के समान आधुनिक विज्ञान भी सृष्टि उत्पत्ति का बिग-बैंग सिद्धान्त स्वीकार करता है जिसमें संलयन प्रक्रिया के परिणाम स्वरूप ऊर्जा आविर्भावित होती है जो सूर्य तथा अन्य तारों की ऊर्जा का स्रोत है। आईंस्टीन ने 1905 में सापेक्षिकता के सिद्धांत (Special Theory of Relativity) के माध्यम से पदार्थ व ऊर्जा को समतुल्य मानते हुए पदार्थ के ऊर्जा में, ऊर्जा के पदार्थ में परिवर्तन के बारें में बताया। वर्नर हाइज़नबर्ग जो जर्मन भौतिकविद् थे ने अनिश्चितता का सिद्धांत (Theory of Uncertainty) प्रस्तुत किया। इसके अनुसार यदि किसी मूल तत्त्व की स्थिति ज्ञात होती है तो उसका वेग अनिश्चित होगा और यदि उसका वेग ज्ञात होता है तो उसकी स्थिति अनिश्चित होगी। इसका मूल कारण ऊर्जा है क्योंकि इसी के कारण उसके वेग में अधिकता अथवा न्यूनता आ जाने पर उसकी स्थिति या वेग का निश्चित ज्ञान नहीं कर पाते।**

**उपनिषद्, श्रीमद्भगवद्गीता व ब्रह्मसूत्रों इन तीनों को मिलाकर वेदान्त दर्शन का निर्माण होता है। यह पारमार्थिक दृष्टि से ब्रह्म की ही एकमात्र सत्ता स्वीकार करता है। माया शब्द का वेदान्त मे बड़ा महत्व है। अज्ञान, अविद्या ये माया के पर्याय हैं। माया ईश्वर की शक्ति है। ईश्वर अपनी इस शक्ति के माध्यम से ही इस नानारूपात्मक जगत् का निर्माण करता है। अद्वैत वेदान्त सृष्टि उत्पत्ति का मूल कारण जहाँ माया को मानता है, वहीं आधुनिक विज्ञान इसे ऊर्जा के रूप में स्वीकार करता है। हाइजेनवर्ग ने जब नील्सबोर से पूछा कि इलेक्ट्रॉन क्या होता है तो नील्सबोर ने प्रत्युत्तर में इलेक्ट्रॉन क्या है? यह तो नहीं बताया किन्तु वेदान्त-विषयक भाषा में इसके अस्तित्व मात्र को ही इंगित किया। सम्पूर्ण ब्रह्माण्ड ऊर्जा का विस्तार है तथा पदार्थ ऊर्जा के अतिरिक्त कुछ भी नहीं है।**

**नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।**

**किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥** [24]

ऋग्वेद के नासदीय सूक्त के इस मंत्र में सृष्टि से पूर्व की अवस्था को इंगित करते हुए कहा गया है कि प्रलय दशा में न तो नाम रूपादि रहित अवस्था थी, और न नामरूपात्मक अवस्था थी, न अन्तरिक्ष अथवा कोई लोक था, जो सबसे पर या ऊपर है, ऐसा

[23] शोध-छात्र, विशिष्ट संस्कृत अध्ययन केन्द्र, जवाहरलाल नेहरू विश्वविद्यालय, नई दिल्ली

[24] *ऋग्वेद*, 10/129/1

वह आकाश भी नहीं था। ऐसी स्थिति में क्या आवृत्त किये हुए था अथवा आवरण था अर्थात् क्या अवशिष्ट था? वह कहाँ था? किसके संरक्षण में था? क्या उस समय अथाह गहरा जल अथवा शून्य था?

सृष्टि विषयक गुत्थी को सुलझाने के लिये मानव प्राचीन काल से ही प्रयास करता रहा है। ऋग्वेद के मंत्रों में यत्र तत्र सृष्टि विषयक सामग्री प्राप्त होती है किन्तु वह अस्पष्ट तथा गूढ है। यह विविध सृष्टि कहाँ से अर्थात् किस उपादान कारण[25] से और किससे अर्थात् किस निमित्त कारण[26] या कर्ता से उत्पन्न हुई, यह यथार्थ रूप से कौन जानता है। देव इस जगत् की सृष्टि से बाद के हैं अथवा पहले के, कोई नहीं जानता। यह सृष्टि कहाँ से या किस कर्ता से उत्पन्न हुई है, यह भी कोई नहीं जानता।[27] इन प्रश्नों का उत्तर भी हम वेद में निहित पाते हैं। ऋग्वेद के हिरण्यगर्भ सूक्त में ऋषि सृष्टि उत्पत्ति के बारे में बताते हैं –

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकरासीत्।**

**स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥** [28]

अर्थात् हिरण्यगर्भ सबसे पहले उत्पन्न हुआ, वह उत्पन्न होते ही समस्त प्राणियों का एक मात्र स्वामी था। उसने अन्तरिक्षलोक, द्युलोक और पृथिवी लोक को धारण किया। तब ऐसे देव को छोड़कर किस देव को हम हवि प्रदान करें? हिरण्यगर्भ क्या है इस पर विद्वानों में एकमतता का अभाव पाया जाता है। वेदभाष्यकार सायणाचार्य जहाँ हिरण्यगर्भ का आशय स्वर्णिम अण्डे से उत्पन्न प्रजापति से बताते हैं वहीं पीटर्सन महोदय स्वर्णिम बीज से।

हिरण्यगर्भ सूक्त के आदि मंत्र की भांति आधुनिक विज्ञान भी सृष्टि उत्पत्ति का बिग-बैंग सिद्धान्त स्वीकार करता है जो बहुत प्रसिद्ध व प्रामाणिक है। इस सिद्धान्त को बेल्जियम के खगोलशास्त्री एवं पादरी एडवर्ड जार्ज लैमित्रे ने 1927 में समझाया। उनके मतानुसार ब्रह्माण्ड की उत्पत्ति 15 अरब वर्ष पूर्व हुई। प्रारम्भ में यह विश्व अत्यन्त घनीभूत स्थिति में परमाणु से भी छोटा अति सूक्ष्म कण था, जो बाद में ठण्डा होने पर फुटबॉल के रूप में परिवर्तित हो गया। इसमें अचानक एक महा विस्फोट हुआ जिससे अति सघन पिण्ड छिन्न-भिन्न हो गया और टूटे हुए अंश अन्तरिक्ष में दूर-दूर छिटक गये। वे वहाँ अभी तक हजारों किलोमीटर प्रति सेकण्ड की दर से गतिमान हैं। इन्ही गतिशील अंशों से आकाशगंगायें निर्मित हुई। यह सतत् सृष्टि सिद्धान्त है जिसके अनुसार आकाशगंगायें आपस में दूर तो होती जाती हैं, किन्तु उनका आकाशीय घनत्व अपरिवर्तित रहता है। तात्पर्य यह है कि पुरानी आकाशगंगाओं के एक दूसरे से दूर हो जाने के कारण उत्पन्न रिक्त स्थल में नई आकाशगंगाओं का प्रादुर्भाव होता चलता

25 वह द्रव्य जिसके द्वारा कार्य का निर्माण होता है, उपादान कारण कहलाता है। जैसे मिट्टी घट का उपादान कारण है।

26 वह कारण निमित्त कारण कहलाता है जो द्रव्य से कार्य उत्पन्न करने में सहायक होता है। जैसे कुम्भकार इत्यादि घट निर्माण में निमित्त कारण हैं।

27 को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः। अर्वाग् देवा अस्य विसर्जनेनाथ को वेद यत आ बभूव॥ ऋ.वे. 10/129/6

28 ऋ.वे. 10/121/1





है। ये नई आकाश गंगायें नये पदार्थों से पैदा होती चलती हैं। जो अति सूक्ष्म कण थे उन्हें वैज्ञानिक भाषा में 'क्वार्क' कहते हैं जिनके संलयन के बाद सूक्ष्मतम परमाणु हाइड्रोजन का निर्माण हुआ, तत्पश्चात् हाइड्रोजन परमाणुओं के संलयन के कारण हीलियम गैस बनी। संलयन प्रक्रिया के परिणाम स्वरूप ऊर्जा आविर्भावित होती है जो सूर्य तथा अन्य तारों की ऊर्जा का स्रोत है।

अब प्रश्न जन्म लेता है कि यह ऊर्जा क्या है? यह उत्पन्न होती है या नहीं? इसे विविध रूपों में परिवर्तित किया जा सकता है या नहीं, इसके भेद कितनें हैं? इन सब प्रश्नों का समाधान वैज्ञानिकों नें सम्पूर्णता के साथ किया है।

ऊर्जा शब्द का प्रयोग प्रायः हमारे दैनिक जीवन में होता रहता है, किन्तु विज्ञान में इसका एक निश्चित एवं परिशुद्ध अर्थ है। ऊर्जा का एनर्जी(Energy) आंग्ल पर्याय है। यह ग्रीक भाषा के एनर्जिया(Energeia) से बना है, जिसका अर्थ गतिविधि से है। दूसरी तरफ यह लैटिन भाषा के एनर्जोस(Energos) से बना है जिसका अर्थ सक्रिय हो सकता है।[29]

अरस्तू ने अपनी पुस्तक *एथिक्स(Ethics)* में चौथी शताब्दी ई.पू. ग्रीक शब्द एनर्जिया(Energia) का प्रयोग कार्य विशेष के अर्थ में किया था। 1021 ई. में अरब भौतिक शास्त्री अल्हज़न(Alhazen) ने ऊर्जा शब्द का प्रयोग प्रकाश के छोटे भागों के अर्थ में किया,[30] आइजैक न्यूटन ने ऊर्जा संबंधी यादृच्छिक प्रस्ताव बताया। बाद में आइन्सटीन ने ऊर्जा की अवधारणा को सुनियोजित ढंग से व्याख्यायित कर $E = MC^2$ का समीकरण दिया।

ऊर्जा क्या है? इसे उदाहरण से जान सकते हैं। जब तीव्र वेग से गतिमान क्रिकेट की गेंद स्थिर विकटों से टकराती है, तो विकेट दूर जा गिरते हैं। हथौडा जब किसी कील पर प्रहार करता है, तो वह कील को लकडी में ठोंक देता है, इस तरह स्पष्ट है कि इन वस्तुओं नें विभिन्न प्रकार से, कार्य करने की क्षमता अर्जित कर ली है। किसी वस्तु की कार्य करने की क्षमता के आधार पर कहा जाता है कि इसमें ऊर्जा है। जो वस्तु कार्य करती है उसमें ऊर्जा की हानि होती है तथा जिस वस्तु पर कार्य किया जाता है उसमें ऊर्जा की वृद्धि होती है।[31]

1922 में नोबेल पुरस्कार विजेता नील्सबोर ने अपने परमाणु के मॉडल में सैद्धांतिक रूप से तत्त्वों की संरचना की व्याख्या की। उन्होंने बताया कि इलेक्ट्रॉन केवल कुछ निश्चित कक्षाओं में ही चक्कर लगा सकते हैं, जिन्हें विविक्त कक्षा कहते हैं। जब इलेक्ट्रॉन इस विविक्त कक्षा में चक्कर लगाते हैं, तो उनकी ऊर्जा का विकिरण नहीं होता है।

महान् वैज्ञानिक आईंस्टीन ने 1905 में ***सापेक्षिकता का सिद्धांत(Special Theory of Relativity)*** प्रस्तुत किया जिसमें उन्होंने पदार्थ व ऊर्जा को समतुल्य माना तथा पदार्थ के ऊर्जा में, ऊर्जा के पदार्थ में परिवर्तन के बारें में बताया। दोनों के बीच का

29 http://www.etymonline.com/index.php?term=energy

30 Online Encyclopedia of the History of Arabic Science, P.55

31 विज्ञान(कक्षा-9), एन.सी.आर.टी.(N.C.E.R.T.), दिल्ली, 2006

संबंध $E = MC^2$ व्यञ्जक से स्पष्ट किया। इस व्यञ्जक के अनुसार यदि हम किसी एम(M) = पदार्थ(Matter) को सी(C) = प्रकाश की गति (Speed of light = $3x10^8$) में ऊर्जा में प्रेषित करेंगे तो 10 वर्ष बाद वस्तु वापिस ऊर्जा से पदार्थ में परिवर्तित होगी तो कोई परिवर्तन नहीं होगा अर्थात 10 वर्ष पूर्व की तरह यथावत् रहेगा।

मैक्स प्लेन्क ने क्वाण्टम सिद्धांत की खोज की। क्वाण्टम का हिन्दी पर्यायः अधिकांश विद्वान् कणभौतिकी करते हैं किन्तु अद्वैत कहीं ज्यादा ठीक है। क्योंकि क्वाण्टम ऊर्जा की मूलभूत ईकाई है तथा इसे विभाजित नहीं किया जा सकता। यह ऊर्जा का परमाणु है जिसे फॉटोन कहा के नाम से जाना जाता है।

आईस्टीन को 1921 में ***थ्योरी ऑफ फोटो इलेक्ट्रिक इफेक्ट** (Theory of Photo-Electric Effect)* पर नोबेल पुरस्कार मिला। फॉटोन ऊर्जा का सूक्ष्म कण है जब इसका प्रभाव विद्युत पर पड़ता है तभी वह प्रकाश देता है। ऊर्जा के कारण ही जितना अधिक प्रभाव पडेगा, उतना अधिक वह प्रकाश देगा। आईस्टीन के अनुसार हमारे शरीर में जितने अवयव हैं वह ऊर्जा के कारण एक-दूसरे से जुडे हुए हैं। शरीर को जलाने पर जो अवयव बचते हैं, वे ऊर्जा रूप हैं।

वर्नर हाइज़नबर्ग जर्मन भौतिकविद् थे जिन्होंने ***अनिश्चितता का सिद्धांत** (Theory of Uncertainty)* प्रस्तुत किया। इसके अनुसार यदि किसी मूल तत्त्व की स्थिति ज्ञात होती है तो उसका वेग अनिश्चित होगा और यदि उसका वेग ज्ञात होता है तो उसकी स्थिति अनिश्चित होगी। इसका मूल कारण ऊर्जा है क्योंकि इसी के कारण उसके वेग में अधिकता अथवा न्यूनता आ जाने पर उसकी स्थिति या वेग का निश्चित ज्ञान नहीं कर पाते।[32]

जिस व्यवहार जगत् में मानव, पशु- पक्षी इत्यादि रहते हैं, उसमें ऊर्जा अनेक रूपों में विद्यमान है यथा- स्थितिज ऊर्जा, गतिज ऊर्जा, ऊष्मीय ऊर्जा, रासायनिक ऊर्जा, विद्युत ऊर्जा तथा प्रकाश ऊर्जा आदि। क्या ऊर्जा के विभिन्न रूप परस्पर परिवर्तनीय हैं? इस प्रश्न का उत्तर सकारात्मक है। ऊर्जा एक रूप से दूसरे रूप में परिवर्तित हो सकती है। ऊर्जा रूपान्तरण की प्रक्रिया में निकाय की कुल ऊर्जा अपरिवर्तित रहती है। यह ऊर्जा संरक्षण का नियम है जिसके अनुसार ऊर्जा केवल एक रूप से दूसरे रूप में रूपांतरित हो सकती है, न तो इसकी उत्पत्ति होती है और न ही विनाश। उदाहरण के तौर पर किसी पिण्ड के मुक्त रूप से गिरते समय, इसके पथ में किसी बिंदु पर स्थितिज ऊर्जा में जितनी कमी होती है, गतिज ऊर्जा में उतनी वृद्धि हो जाती है। किन्तु द्रव्यमान में कमी तो आती है। यदि दो चुम्बकें पृथक्-पृथक् हैं तो बराबर द्रव्यमान वाली होंगी। जब एक चुम्बक के दक्षिणी छोर को दूसरी के उत्तरी छोर से सटाते हैं तो दोनों के द्रव्यमान में कुछ कमी आ जाती है। क्योंकि जुडने पर कुछ ऊर्जा निस्तारित होती है तथा वह ऊर्जा द्रव्यमान से ही परिवर्तित होती है।

---

32 वेदांत व आईस्टीन, पृ. 37-38.



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

वेदान्त उपनिषदों को कहते हैं। ये ब्रह्मविद्या के स्थान हैं। उपनिषद्, श्रीमद्भगवद्गीता व ब्रह्मसूत्रों इन तीनों को मिलाकर वेदान्त दर्शन का निर्माण होता है। यह पारमार्थिक दृष्टि से ब्रह्म की ही एकमात्र सत्ता स्वीकार करता है। नाना रूपात्मक विचारों का निषेध करने के पश्चात् जिस अविकारी, शाश्वत्, नित्य तत्त्व की प्राप्ति होती है, वही शंकराचार्य के अनुसार सत् है, वही ब्रह्म है जो स्वत: सिद्ध व स्वयं प्रकाश्य है।

**अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।** [33]

वेदान्त के अनुसार केवल ब्रह्म ही नित्य वस्तु है, जो शुद्ध चैतन्य है, इसके अतरिक्त सम्पूर्ण जगत् अनित्य है। यह विवेचन वेदान्त में नित्यानित्य वस्तु विवेक कहलाता है-

**नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यद्-अखिलं नित्यमिति विवेचनम्।** [34]

उपनिषदों में भी इसी प्रकार के अनेक वाक्य मिलते हैं, जैसे-

नित्यं विभुं सर्वगतं सूक्ष्मम्[35]

**अजो नित्य: शाश्वत:**[36]

**सत्यं ज्ञानमनन्तं ब्रह्म**[37]

**विज्ञानमानन्दं ब्रह्म**[38]

**आनन्दो ब्रह्मेति व्यजानात्** [39]

इस तरह वेदान्त में शुद्ध चैतन्य ब्रह्म मात्र स्वरूप है। तथा इसी संसार का उपादान व निमित्त कारण भी है। जैसे एक मकड़ी अपने तन्तुरूप कार्य (जाल) के प्रति चैतन्यप्रधानता के कारण निमित्तकारण है और अपने शरीर की प्रधानता के कारण उपादानकारण भी है, उसी प्रकार अज्ञानोपहित आत्मा चैतन्यप्रधानता के कारण इस जगत् रूपी प्रपञ्च का निमित्तकारण है तथा अज्ञानप्रधानता के कारण उपादान कारण भी है।[40] मुण्डकोपनिषद् में भी बताया गया है कि जिस प्रकार मकड़ी अपने जाले को

---

33 वेदान्तसारः, पृ. 1

34 वही, पृ. 6

35 मुण्डकोपनिषद्, 1.1.6

36 कठोपनिषद्, 2.18

37 तैत्तिरीयोपनिषद्, 2.1.1

38 बृहदारण्डकोपनिषद्, 3.9.28

39 तैत्तिरीयोपनिषद्, 3.6.1

40 शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति। वेदान्तसार, पृ. 30

बनाती है तथा निगल जाती है, जैसे पृथ्वी में औषधियाँ उत्पन्न होती हैं, जैसे सजीव पुरूष से केश, लोम इत्यादि उत्पन्न होते हैं उसी प्रकार उस अक्षर से यह विश्व प्रकट होता है।[41]

मैत्रायणी उपनिषद् में कहा गया है कि ब्रह्म अपर व पर भेद से दो प्रकार के हैं। अपर को जानकर पर की प्राप्ति होती है।[42] ब्रह्म की सत्ता त्रिकालाबाधित है। वेदान्त दर्शन में तमस् प्रधान विक्षेप शक्तियुक्त, अज्ञानोपाधि से उपहितचैतन्य से आकाश, आकाश से वायु, वायु से अग्नि , अग्नि से जल, और जल से पृथ्वी की उत्पत्ति मानी गयी है।[43]

माया शब्द का वेदान्त मे बड़ा महत्व है। अज्ञान, अविद्या ये माया के पर्याय हैं। माया ईश्वर की शक्ति है। ईश्वर अपनी इस शक्ति के माध्यम से ही इस नानारूपात्मक जगत् का निर्माण करता है। अद्वैत वेदान्त सृष्टि उत्पत्ति का मूल कारण जहाँ माया को मानता है, वहीं आधुनिक विज्ञान इसे ऊर्जा के रूप में स्वीकार करता है अत यह कहा जा सकता है -

**माया = ऊर्जा(Energy)**

शंकराचार्य ने माया के बारे में स्व-ग्रन्थ विवेकचूडामणि में कहा है कि माया परमेश्वर की शक्ति है जो अव्यक्त है। अव्यक्त का अर्थ है अभिन्न। अर्थात् माया परमेश्वर से पृथक न होकर उसी की अभिव्यक्ति मात्र है। यथा एक बीज अंकुरित होकर अपने आप को वृक्ष रूप में अभिव्यक्त करता है, वैसे ही माया ब्रह्म से अभिव्यक्त होकर सृष्टि के रूप में दृश्यमान होती है।[44] श्वेताश्वतर उपनिषद् में कहा गया है-

**मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरं। तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥**[45]

यह माया शक्ति आदि रहित है विवेकचूडामणि पर अद्वैतामृतबोधिनीभाषा टीका लिखने वाले अरविन्दानन्दयति ने जीव, ईश्वर, शुद्धब्रह्म, जीव ब्रह्म का भेद, अविद्या और अविद्या चेतन का संबन्ध इन छ: को अनादि माना है।[46] यह माया अविद्या शब्द से भी अभिहित है। माया सत्त्व, रजस्, व तमस् इन तीनों गुणों से मिलकर बनी है। सृष्टि से पूर्व ये तीनों साम्यावस्था (Undifferentiated state) में अभिन्न थे। जब यह साम्यावस्था बाधित हुई तब भिन्नावस्था(Differentiated state) आयी और यह सृष्टि कहलाई। अधुनिक खगोलज्ञ भी ऐसा ही मानते हैं। भेद केवल इतना है कि आधुनिक सन्दर्भ में सत्त्व, रजस्

41 यथोर्णनाभि: सृजते गृहते च यथा पृथिव्यामोषधय: सम्भवन्ति
यथा सत: पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वम्॥ मुण्डकोपनिषद्, 1.1.7

42 द्वे ब्राह्मणी वेदितव्ये शब्दब्रह्म परम् च यत्। शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति॥ मैत्रायणी उपनिषद्

43 तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते। वेदान्तसार, पृ. 34

44 अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा। कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते॥ विवेकचूडामणिः, कारिका-110

45 श्वेताश्वतरोपनिषद्, 4.10

46 जीवेशौ हि विशुद्धा चिद्विभागस्तु तयोर्द्वयो:। अविद्यातच्चितोर्योग: षडस्माकमनादय:॥ शंकराचार्यप्रणीतः विवेकचूडामणिः, अद्वैतामृतबोधिन्याख्यभाषाटीकाकार, पृ. 117.





व तमस् ये शब्द नहीं हैं। माया कारण रूप होने से कार्य रूप सृष्टि से श्रेष्ठ व परा है। एक विशाल वृक्ष एक बीज के भीतर समाहित, अव्यक्त रूप में रहता है और जब वह बीज अंकुरित होता है, तब उसका कार्य रूप वृक्ष फलित होता है। यही कारण से कार्य रूप फल आने की प्रक्रिया है जो आरोपण(Projection) कहलाती है। इसे सृष्टि नहीं, अपितु आरोप मात्र कह सकते हैं। माया के कार्यों से माया का अनुमान किया जाता है। कार्य के द्वारा कारण का अनुमान किया जा सकता है। इसी तरह आधुनिक खगोलज्ञ भी मानते हैं कि ब्रह्माण्ड आदि में सुव्यवस्थित सघन गेंद (Dense Compact Ball) के समान था। इसका केवल अनुमान मात्र किया जा सकता है। यह माया कार्यों के द्वारा अनुमेय है। इसका अनुमान तो कोई विद्वान् ही कर सकता है। इस स्थूल विविध जगत् रूप कार्य के सूक्ष्म कारण को जानने का कार्य कोई तीक्ष्ण बुद्धि युक्त विद्वज्जन ही कर सकता है, यह सामान्य जन की सीमा में नहीं है। माया से ही यह सम्पूर्ण ब्रह्माण्ड उद्भूत हुआ है। इसी को आधुनिक विज्ञान की शब्दावली में बिग बैंग थ्योरी (Big Bang Theory) के नाम से जाना जाता है।

माया-सिद्धान्त के आधार पर ही **ब्रह्म सत्यं जगन्मिथ्या** का तात्त्विक एवं सारगर्भित सिद्धान्त शंकराचार्य ने प्रस्तुत किया। अज्ञान से निहित होकर मनुष्य रज्जु को सर्प समझकर जिस प्रकार से भयभीत हो उठता है वैसे ही सत्य ब्रह्म को न देखते हुए मूर्ख व्यक्ति जगत् को ही सत्य रूप में देखता रहता है। माया के स्वरूप के सन्दर्भ में योगवाशिष्ठ में कहा गया है -

**ईदृशीनाम मामेयं या स्वनाशेन हर्षदा। न लक्ष्यते स्वभावोऽस्या: प्रेक्षमाणैव नश्यति॥**

**प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्। गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिन:॥**

माया के स्वरूप के बारे में आचार्य शंकर ने विवेकचूडामणि में व्याख्या की है-

**सन्नाप्यसन्नाप्युभयात्मिका नो, भिन्नाप्यभिन्नाप्युभयात्मिका नो।**

**साङ्गाप्यनङ्गाप्युभयात्मिका नो, महाद्भुतानिर्वचनीयरूपा॥**[47]

माया न सत् है और न असत् तथा न दोनों है क्योंकि यदि वह सत् होती तो किसी भी पल इसका विनाश न होता। यदि असत् होती तो किसी भी क्षण विद्यमान न रहती। इसके विपरीत माया की विद्यमानता के कारण ही भौतिक जगत् का दर्शन हो रहा है। इसी तरह वह न भिन्न है, न अभिन्न और न दोनों है। न यह अङ्गयुक्त है, न अङ्गरहित है और न दोनों है। यह माया अद्भुत है तथा अनिर्वचनीय रूप है। अर्थात् इसे शब्दों में व्यक्त नहीं किया जा सकता है। केवल उसके स्वरूप मात्र को बताने का प्रयास किया जा सकता है।

आधुनिक विज्ञान में इलेक्ट्रॉन सबसे सूक्ष्म कण है जो जानने योग्य है। इसके विषय में भी माया के समान कुछ नहीं कहा जा सकता है। परमाणु के इलेक्ट्रॉन, प्रोटॉन एवं न्यूट्रॉन ये भेद किये गये हैं। हाइजेनवर्ग ने जब नील्सबोर से पूछा कि इलेक्ट्रॉन क्या

47 विवेकचूडामणि, कारिका 111

होता है तो नील्सबोर ने प्रत्युत्तर में इलेक्ट्रॉन क्या है? यह तो नहीं बताया किन्तु वेदान्त-विषयक भाषा में इसके अस्तित्व मात्र को ही इंगित किया—

**यह है!(It is to be!) यह है!(It is to be!) यह है!(It is to be!)**

कठोपनिषद् में भी ऋषि ने आत्मा के बारें में समान विचार दिये हैं। उनके अनुसार 'आत्मा है' इस प्रकार के ज्ञान की उपलब्धि होनी चाहिये तथा उसे तत्त्वभाव से ही जाना चाहिये। जिस व्यक्ति को 'आत्मा है' इस प्रकार की उपलब्धि हो जाती है उसे तत्त्वज्ञान भी प्राप्त हो जाता है।[48]

इस तरह कहा जा सकता है कि माया ही इस प्रपञ्चात्मक जगत् की उत्पत्ति का मूल कारण है। माया ब्रह्म की अभिव्यक्ति मात्र है। माया के विषय में महादेव शास्त्री का मत है कि माया व्यावहारिक सत्ता का ऐसा नामधेय है जो वर्ण्यविषय से बाहर है। वस्तुतः किसी वस्तु विशेष को इंगित करके ऐसा नहीं कहा जा सकता कि अमुक वस्तु माया है। वह विरोधी तत्त्वों यथा सदसत, साङ्गानङ्ग इत्यादि का मिश्रण रूप है। आईस्टीन ने इसे एक उदाहरण से स्पष्ट करते हुए कहा है कि एक बालक पुस्तकालय जाता है। वह वहाँ पुस्तकें देखता है, किंतु नाम नहीं जानता। किंतु यह जानता है कि पुस्तकें हैं। वैसे ही व्यवहार में हम देखते हैं कि इस जगत् में सृष्टि है किन्तु क्या है यह ज्ञात नहीं, पर यह ज्ञात है कि जगत् है।

माण्डूक्योपनिषद् में ओम् को ब्रह्म[49] मानते हुए ब्रह्म की चार अवस्थाओं को ओम् के अकार, उकार, मकार तथा ऊँकार के माध्यम से क्रमशः जाग्रतावस्था, स्वप्नावस्था, सुप्तावस्था तथा ब्रह्मावस्था बताया गया है।

जहाँ प्रेक्षक स्व- ज्ञानेन्द्रियों के माध्यम से स्थूल ब्रह्माण्ड का प्रेक्षण करता है, उसे जाग्रत या काय-अवस्था कहते हैं। 20 वीं सदी से पूर्व ब्रह्माण्ड, पदार्थ (ठोस, द्रव, गैस) ऊर्जा के विभिन्न रूपों (गतिज, स्थितज, प्रकाश, विद्युत इत्यादि) व न्यूटन की गति के नियमों से चलता था। जो सब कुछ यांत्रिक संरचना थी जिसे वेदान्त ने भी जाग्रतावस्था कहा।[50]

प्रेक्षक की दूसरी अवस्था स्वप्न है जिसमें ज्ञानेन्द्रियाँ सोई रहती हैं किन्तु मस्तिष्क क्रियाशील रहता है जिसे मन भी कहते है। इसे आंइस्टीन ने सापेक्षीय भौतिकी तथा मैक्स प्लांक ने क्वांटम भौतिकी कहा है, क्योंकि काया इन दोनों को नहीं समझ सकती। इन्हें मन ही समझ सकता है।[51]

48 अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः। अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति॥ कठोपनिषद्, 3.13

49 ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव॥ मा.उ.1

50 वेदांत व आईंस्टीन, पृ. 51.

51 वही, पृ. 51





प्रेक्षक की तीसरी अवस्था स्वप्नरहित सुप्तावस्था है। इस समय प्रेक्षक के काया व मन जाग्रत रहतें हैं किंतु प्रज्ञा उस समय जाग्रत रहती है। अहं जो काया, मन व प्रज्ञा का संकलन है, अपने को पूर्ण से भिन्न समझता है। प्रेक्षक की इसी अवस्था को प्रज्ञा कहते हैं जो कि पदार्थ , ऊर्जा व आकाश का अवनाभिकीय विन्यास है(Sub Nuclear Configuration) यही वह बिन्दु है जहाँ 20 वीं सदी का भौतिक विज्ञान लडखडा रहा है।[52] अन्तिम चौथी अवस्था ब्रह्म की है। सभी बलों का अवबोधन मिट जाना चाहिए और सभी अचरों को न्यूनीकृत करके शून्य या असीमता में विलीन कर दिया जाना आवश्यक।[53] लार्ज हैडन कोलाईडर का जो महाप्रयोग हो रहा है, वह इसी ब्रह्म-स्थिति की गुत्थी को सुलझाने के लिए हो रहा है। मशीनी तंत्र से इसे नहीं देखा जा सकता, क्योंकि यह तो अनुभवगम्य है।

ईशावास्योपनिषद् के मंगलाचरण में कहा गया है कि ब्रह्म पूर्णमय है।[54] ग्राण्ड यूनिफाइड थ्योरी(Grand Unified Theory) के अनुसार चेतना का निर्माण नहीं किया जा सकता, न ही इसे नष्ट किया जा सकता है। केवल इसका अस्तित्व विभिन्न रूपों में है और चेतना की चार अवस्थायें चेतना की एकल अवस्था का ही प्रकटीकरण मात्र है। उपनिषदों में इस एकल व्यवस्था को ब्रह्म कहते हैं। आधुनिक विज्ञान द्वारा प्रतिपादित ऊर्जा संबंधी सिद्धांत के वेदांतीय अध्ययनोपरांत यह कहा जा सकता है कि सम्पूर्ण ब्रह्माण्ड ऊर्जा का विस्तार है तथा पदार्थ ऊर्जा के अतिरिक्त कुछ भी नहीं है। वेदान्त इसे माया शब्द से अभिहित करता है। तैत्तिरीयोपनिषद् में कहा गया है—

**यतो वा इमानि भूतानि जायन्ते।**[55]

अर्थात् जिससे प्राणी उत्पन्न होते हैं वह शुद्ध चैतन्य ब्रह्म है जो प्रधान रूप से तमो गुण से युक्त होने पर माया रूप में व्यक्त होता है व सृष्टि अभिव्यक्त होती है। माया या ऊर्जा के सिद्धांत को मशीनों द्वारा सिद्ध नहीं किया जा सकता, इसे अनुभव किया जा सकता है।

## संदर्भग्रंथसूची


- *ऋग्वेद-संहिता (श्रीमत्सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशसहिता) चतुर्थो भागः*, सं. श्रीमत् मोक्षमूलरभट्टः, 1983, कृष्णदास अकादमी, वाराणसी, द्वितीय संस्करण (भारतीय).
- *अष्टाविंशत्युपनिषत्संग्रहः*, 2004, चौखम्बा विद्याभवन, वाराणसी.


52 वही, पृ. 51-52

53 वही, पृ. 56

54 पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ईशावास्योपनिषद्, मंगलाचरण।

55 तैत्तिरीयोपनिषद्, 3.1

- शंकराचार्यप्रणीतः विवेकचूडामणिः, *अद्वैतामृतबोधिन्याख्यभाषाटीका*-कार- अरविन्दानन्दयति, हिन्दी व्या. नृसिंहदेव शर्मा, 1998, चौखम्बा विद्याभवन, वाराणसी.
- श्रीसदानन्दप्रणीतः *वेदान्तसारः, भावबोधिनी* संस्कृत-हिन्दीव्याख्याकार- श्री रामशरणत्रिपाठी शास्त्री, 2002, चौखम्बा विद्याभवन, वाराणसी.
- भटनागर, अनिल, *वेदांत व आईंस्टीन*, हि. अनु. देवेन्द्रकुमार अग्निहोत्री, 1998, विश्वविद्यालय प्रकाशन, वाराणसी.
- विज्ञान (कक्षा-9), 2006, एन.सी.आर.टी.(N.C.E.R.T.), दिल्ली.
- Capra, Fritjof, *The Tao of Physics*. Flamingo Publication, London, 1991.
- Online Encyclopedia of the History of Arabic Science.
- http://www.etymonline.com/index.php?term=energy


*********************





# Lord Šiva- The Supreme Vaishnava

डा ॥ सुमन् के. एस.[56]

The Universal truth revealed in Vedic literature and justified by Vyasa Sahithya & Dasa Sahithya confirms the deliverance or celestial abode only to such an Atma who attains knowledge of Hari Sarvottamatwa & Vaju jeevottamatwa through the devotion of Maharudradeva. It is indeed Kapardee the one who proclaims himself to be the greatest devotee of Lord Sriraama while conversing with Parvatee devee. He also advises parvatee about the greatness of RaamaNaama saying –

**'श्रीराम राम रामेति रमे रामे मनोरमे । सहस्रनाम तत्तुल्यं श्रीरामनाम वरानने' ॥**

Accordingly, it says that `No Human shall compare Lord shiva with the supreme deity Vishnu. This is also justified in a daasavaNee with an illustration -

***'Hariyadhika haranadhika endu hOraaDadiri hariharara bhaktare saakshi lOkadoLu ।***
***hariya baagila kaayda bali bhaagyayutanaada harana baagila kaayda baaNanaLida ॥***

In fact Shiva not only dislikes or hates himself to be compared with Lord Shrihari by his devotees but even disregards them instead of acknowledging their devotion.

Shri Purandaradaasaru, the father of Carnatic music denigrates the idea of equalizing Hari with hara -

***'Harihararu samarembaru ariyadaj~jnaanigaLu harana hrudayadoLiruva hariya taavariyaru' ॥***

An exemplary example to prove lord Shiva as great devotee of lord Vishnu is none other than sacred river ganga being respectfully & gracefully adorned on his head after having understood her manifestation from the holy feet of Lord Vishnu. Shiva even today resides on the banks of river ganga at Kashi in order to facilitate the devotees to bathe themselves in holy ganga before offering pooja to him. Is this not enough to prove his height of Vaisnavism ??

[56] Head, Dept. of Sanskrit, Jain College, J.C.Road, Bangalore-27

Lord ShrikaNTha offers his pooja to Lakshmi-Narayana through Vayu-Bharati and thereby establishes the jeevottamatva of Vaayudeva. That's how we listen to Bhava addressing the world in this regard - **'गुहाशयायैव न देहमानिन'- (भागवतम्) ।**

To Rudradeva Lord ShriHari is nothing but, everything and indeed everything is nothing to him **'एको रुद्रो न द्वितीयाय तस्थे' - श्रुतिः ।**

The very name Vamadeva of Shiva confirms him to be a great Vaishnavaite. According to Tantrasaara Agama the worshipper should sit to the right of god while offering pooja to him

**'देवस्य दक्षिणे भागे पूजकश्च स्थितो भवेत्' ।**

Lord Pinaakee has chosen North-east direction (ऐशान्यम्) to offer his devotion to Lord Vishnu and is continuously meditating that सूर्यमण्डलमध्यवर्ती of Eastern direction । Residing in the same direction he also officiates the offerings of various devotees to lord savitRu bhagawaan. **ब्रह्मकाण्ड** of GaruDa puraana emphasizes on this matter -

**ऐशान्यकोणे संस्थितो यस्तु रुद्रो ह्यवाप देवो वामदेवेति सञ्ज्ञाम् ।**
**स्ववामभागे संस्थितो वासुदेवः स्वयोग्यभक्त्या पूज्यते सर्वदैव ।**
**अतो रुद्रो वामदेवेऽति सञ्ज्ञां अवापेत्युदीर्यं न तु सुन्दरत्वात् ॥**

In this way **वामदेव** is a befitting nomenclature to Lord Shiva. He instigates every Vaishnava to become Vamadeva and then offer their devotions/prayers to Paramatma.

Sri Vijayadaasaru also captivates the extreme bhakti of lord Trinetra -

**'shreevishNuvina paada hRudayadoLiTTa jaTaajooTa balu diTTa' ।**

Rgveda proclaims Rudradeva's fascination for विष्णुमन्त्र -

**'तव प्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारुचित्रम् ।**
**पदं यद् विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनाम् ॥**

The Erudition of the word धूर्जटि suggests us about his supremacy over VaishNavism. The word धूः means sky=विष्णुपदम् , जटिः (जटाम् अवनमयति इति) - one who bends down with adoration. Therefore the one who is in anticipation of VaikunTa or Kaivalya should bowdown to lord Shiva who always resides at विष्णुपदम् .

Goddess Parvati exclaims mRuDa's dedication and unique supplication to lord NaarayaNa in Padma PuraNa - **यमुद्दिश्य जगन्नाथं महेशोऽपि दिगंबरः । जटी भस्मानुलिप्ताङ्गः तपस्वी वीक्षितो जनैः ।**





**ततोऽधिकोऽस्ति को देवो लक्ष्मीकान्तात् मधुद्विषः ??**

Sri Vyasateertha in one of his compositions describes Shiva's Adoration and Admiration to ShriHari -

***'shirada gaNgeyE vara aggaNIyaagire sarasija baandhava chendiradeepa***
***urigaNNina hoge dhUpavanerisi karaNave naivedya,***
***Raama raama yemba raamanaamamRuta saviyanella somashekhara taane balla !!'***

Ambareesha Upakhyanam of **श्रीमद्भागवतम्** throws light on Mahashi Durvasa, the incarnate of Mahadeva himself Eulogizing the power of Harinaama -

**यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः । तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥**

SrijagannathaDasaru urges us to pray Lord Shiva, an intimate disciple of Jeevottama Vayudeva without fail in order order to cherish the real bliss (Naijasukham) -

***'kruttivaasane hinde nee naalwattu varsha sameeranali***
***shishyatwa vahisi akhilaagamaarthagaLodi brahmanali' ॥ - (HarikathaamRutasaara)***

According to shaastras there are two ways to reach that eternal Place (Moksha). When one is GaruDa marga the other is shisha marga. Lord Shiva ascends the position of sheshadeva or turns into sheshadeva, the Cot of Lord Vishnu. When the deities reach the celestial abode through Garuda Marga it is Sheshadeva who takes these deserving humans to moksha.

RugmiNi, the manifestation of Mahalakshmee too stresses upon every Vaishnava willing to board the flight to celestial abode should indeed offer their venerable Salutations to the Supreme Vaishnava Kruttivaasa -

**'स्वजनकगृहदेवं पौत्रमाराध्य भैष्मी निजमथ गृहदेवं माधवं द्रष्टुकामा । - ( रुग्मिणीशविजय:** 14 - 64 )

Lord Sharva was introduced to Princess RugmiNee by her friend as 'One of the closest relatives of ShriKrishna and a great devotee of VishNu' -

**भवोऽयमब्जासनलब्धजन्मा मुकुन्दसेवाभिरताः किलैते ॥ (रुग्मिणीशविजयः** 16 -18 ) ।

There are many more instances throughout the Shastras proving Shiva as a Great VishNubhakta and incompetent to him in all ways.

**॥ सर्वं पार्वतीरुद्रान्तर्गत-भारतीरमणमुख्यप्राणान्तर्गताय श्रीकृष्णाय अर्पितमस्तु ॥**

***********************

# परात्रिंशिकोपलब्धानुत्तरशब्दविशेषव्याख्यानेऽभिनवगुप्तस्यावदानम्[57]

**नारायणदत्तमिश्रः**[58]

**कूटशब्दाः** - अनुत्तरम् , परभैरवसंवित् , उत्तरणम् , नुत् , तारतम्यम्

**शोधसारः - कविताकेसराणाम्प्रसूः कश्मीरभूरागमानामपि जनिभूरिति प्रसिद्धम् । अत्रत्येष्वागमशास्त्रेषु परात्रिंशिकाऽन्यतमा । परात्रिंशिकाऽऽख्यग्रन्थस्यास्याभिनवगुप्तकृता तत्त्वविवेकव्याख्याऽप्यस्यागमशास्त्रोपकारकत्वात् तथैव महत्त्वपूर्णं स्थानं विधत्ते । शैवदर्शनशास्त्रीये ग्रन्थेऽस्मिंस्तथाऽस्याष्टीकायाञ्च तद्व्याख्यानरूपेणोपलभ्यन्ते कतिचन विशिष्टाश्शास्त्रीयाश्शब्दाः । तेष्वेवानुत्तरशब्दविशेषोऽभिनवगुप्तपादाचार्य्येण विशिष्य व्याख्यायितम् । विशिष्टे व्याख्यानप्रकारेऽस्मिंस्तेन शब्दविशेषस्यास्य षोडशधा विविधा अर्थाः प्रकटीकृताः । शब्दस्यैकस्य विशिष्टेन नयेन षोडशधा व्याख्येयमवश्यमेवाभिनवस्य व्याकरणविषयपाटवप्रतिपादिकेति स्पष्टयितुम्प्रस्तूयमानमिदं लघुशोधपत्रम् ।**

अभिनवगुप्तपादाचार्यश्श्रीमन्तं श्रीकण्ठनामानं शिवरूपमाद्यगुरुम्प्रणम्य निजशिष्यविबोधाय प्रबुद्धस्मरणाय च परात्रिंशिकाया इमान्तत्त्वविवेकाख्यां स्वनामधन्याण्टीकां विलिखितवान्नित्युद्घोषणन्तेनैवात्र विहितम् , तद्धि – **निजशिष्यविबोधाय प्रबुद्धस्मरणाय च । मयाऽभिनवगुप्तेन श्रमोऽयङ्क्रियते मनाक् ॥**[59] वस्तुत आगमशास्त्रापेक्षया शैवदर्शनापेक्षया वा वर्तन्ते कतिचन पारिभाषिकाश्शब्दा अस्याम्परात्रिंशिकायाम् । एतादृशेषु शब्देष्वनुत्तरशब्दे किञ्चिद् विशिष्टार्थग्राहकत्वं सन्निहितं विद्यत इति प्रतिपादयति परात्रिंशिकायास्तत्त्वविवेकव्याख्याताऽभिनवगुप्तपादाचार्यः। सर्वप्रथमम्परात्रिंशिकाव्याख्यायायमनुत्तरशब्दोपलब्धिरुपोद्घातात्मके स्वपरिचयात्मके श्लोके वा जायते । तद्यथा – **विमलकलाश्रयाभिनवसृष्टिमहाजननी , भरिततनुश्च पञ्चमुखगुप्तरुचिर्जनकः । तदुभययामलस्फुरितभावविसर्गमयं हृदयमनुत्तरामृतकुलम्मम संस्फुरताम् ॥**[60] इति ।

सर्वप्रथमेऽस्मिन् हि श्लोकेऽनुत्तरपदोपादानेनाभिनवगुप्तपादाचार्येण नूनमेव पदस्यास्य विशिष्टस्थानावाहकत्वन्दिग्दर्शितमित्यनुभवितुं शक्यते । शैवागमेषु प्रथितायाः परात्रिंशिकायास्तत्त्वविवेकव्याख्याकर्त्राऽभिनवगुप्तेन न केवलं स्वीये प्रथमे श्लोक एवानुत्तरशब्दविशेषो निदर्शितोऽपितु व्याख्याया अस्या **यस्यामन्तर्विश्वमेतत् स्फुरन्त्याम्बाह्याभासम्भासमानं विसृष्टौ । क्षोभे क्षीणेऽनुत्तरायां स्थितौ तां वन्दे देवीं स्वात्मसंवित्तिमेकाम् ॥**[61] इत्यस्मिन् श्लोकेऽपि पुनरस्य पदस्योपादानङ्कृतम्परमत्र पदस्यास्य विशिष्टार्थोऽपि सारल्येनाधिगन्तुमवकाशस्तत्रभवताऽभिनवगुप्तेन प्रदत्त इति प्रतिपादयितुं शक्यम् । अथ , **नरशक्तिशिवात्मकं हृदये या विनिधाय भासयेत् । प्रणमामि परामनुत्तरान्निजभासाम्प्रतिभाचमत्कृतिम् ॥**[62] इति तृतीयश्लोकस्थेनानुत्तरामिति पदोपस्थापनेन च शब्दविशेषस्य महिमोद्भासते ।



[57] अभिनवगुप्तस्य शास्त्रीयमवदानमिति नामधेये द्विदिवसात्मके राष्ट्रिये सम्मेलने शोधपत्रमिदं लखनऊनगरे 23.12.2012 दिनाङ्के सम्प्रस्तुतम् ।

[58] *शोधच्छात्रः (M.Phil)*,विशिष्टसंस्कृताध्ययनकेन्द्रम् , जवाहरलालनेहरुविश्वविद्यालयः ,नवदेहली – ११००६७

[59] परात्रिंशिका , पृष्ठसङ्ख्या-०३

[60] ________, पृष्ठसङ्ख्या-०१

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

वस्तुतश्शैवदर्शनसम्मतस्य त्रिकशास्त्रस्यानुसारेणानुत्तरस्य परमपदस्यावाप्तिर्यथोत्तररूपलक्ष्मनिराकरणेन स्यात्तथा सर्वैर्यतनीयम् । अनुत्तरपदप्राप्तिर्हि गुरुतश्शास्त्रतस्स्वतश्चेत्येतैस्साहाय्येन भवितव्यमित्यपि सिद्धान्तितन्तथ्यम् ।[63] अस्यानुत्तरपदस्यावाप्तये ज्ञानक्रियायोगनाम्नान्त्रयाणाम्मार्गाणां यद्यपि पृथक् पृथङ्माहात्म्यम्प्रथितन्तथाऽपि ज्ञानमार्गस्य भृशम्महिमानम्प्रकीर्तयन्नप्यभिनवगुप्तपादाचार्यः क्रियायोगनाम्नोर्द्वयोर्मार्गयोर्माहात्म्यम् – " **यत्र भावनाद्यवकाशः । प्रसङ्ख्यानमात्रमेव दृढचमत्कारलक्षणहृदङ्गमतात्मकप्रतिपत्तिदार्ढ्यपर्यन्तं यत्रोपायधौरेयधराधराणि धत्ते** "[64] , इत्येवमुल्लिख्य यथाकथञ्चित्समेकितत्वेन सङ्केतितवान् । एवमेतादृश्यामनुत्तरस्थितौ ज्ञानमार्गस्साधनमिति विविच्यमानेन तत्रभवताऽऽचार्येण न कदाऽपि योगक्रियामार्गयोरवरत्वम्प्रदर्शितमिति विषयस्तु प्रसङ्गाद् भिन्नस्तथाऽपि तत्प्रतिपादितानुत्तरशब्दस्य विशिष्टार्थसङ्ग्रहणावसरेऽस्यापि सममेव महत्त्वमिति तथ्यम् । ईदृशस्यानुत्तरपदस्य शैवदर्शनसम्मतो गूढोऽर्थः कः ? इति हृदि सन्निधाय तत्त्वविवेककर्त्राऽभिनवगुप्तपादाचार्येण विशिष्टस्य पदस्यास्य षोडशभिर्व्याख्याभिर्विशिष्टा अर्थास्सम्प्रदर्शिताः । वस्तुतष्षोडशधा व्याख्येयं विविधशास्त्रनिष्णातस्यैतस्याभिनवगुप्तपादाचार्यस्य भृशं व्याकरणपाटवमात्रन्निदर्शयति ।

साधारणतयाऽनुत्तरशब्दस्यार्थनिष्कासनविषयमभिलक्ष्य नोत्तरं यस्मिंस्तदुत्तरमिति विग्रहेण नञ्समासस्योदाहरणमात्रत्वेनानुत्तरमिति पदम्प्रतिभाति । परमितोऽप्यग्रे पदस्यास्यार्थविशेषा व्याकरणसम्मता अथ कस्यचिद्दर्शनविशेषस्याभिमता भवितुमर्हन्तीत्यद्वितीयेन नयेन प्रस्तौति परात्रिंशिकायाष्टीकाकारोऽयमभिनवगुप्तः । तत्र ह्यनुत्तरशब्दविशेषस्य प्रथममर्थमुपस्थापयन्नभिनवगुप्तपादाचार्य एवं सर्वप्रथमं विग्रहवाक्यमिदन्दर्शितवान् – " **न विद्यते , उत्तरम् अधिकं यतः**"[65] इति । शैवदर्शने हि शिवपर्यन्तानि षड्त्रिंशत्सङ्ख्याकानि तत्त्वानि प्रथितानि । एषां षड्त्रिंशत्सङ्ख्याकानामपि तत्त्वानाम्परमम्मूलम्परभैरवसंविदिति स्वीकृतमस्ति काश्मीरीये दर्शनेऽस्मिन् । परभैरवसंविदपेक्षया हि भवति समेषान्तत्त्वानां समुपस्थितिविषयत्वम् । नैतां विहायैतेषां यथाकथञ्चिदप्यस्तित्वमिति परभैरवसंविदस्सर्वोत्कृष्टत्वमिति प्रसिद्धम् ।

[61] ________, पृष्ठसङ्ख्या-०२

[62] ________, पृष्ठसङ्ख्या- ०३

[63] ________, पृष्ठसङ्ख्या- ३८

[64] परात्रिंशिका , पृष्ठसङ्ख्या- ४२८

[65] ________, पृष्ठसङ्ख्या- ३१

प्रथमेयं व्याख्या ' न विद्यत उत्तरमधिकं यतः , अत्रोत्तरमित्यस्य पदस्य पश्चादित्यर्थो लभ्यते । एवमनुत्तरशब्दविशेषेण पराभट्टारिकायाः किं वा परभैरवसंविद् उत्तरन्न विद्यत एतादृशोऽर्थो लभ्यते । एवमर्थोपस्थापकं व्याख्याऽऽत्मकं वचनं हीत्थमवाप्यत एतट्टीकायाम् – **यथा हि तत्त्वान्तराणि षड्त्रिंशदनाश्रितशिवपर्यन्तानि परभैरवबोधानुप्रवेशासादिततथाभावसिद्धीनि संविदमधिकयन्ति , नैवम्परा परिपूर्णा परभैरवसंवित् , तस्यास्सदा स्वयमनर्गलानपेक्षप्रथाचमत्कारसारत्वात् ।**[66]

अतः परमनुत्तरशब्दविशेषस्य षोडशप्रकारकं विग्रहवाक्यन्निदर्शयता तत्त्वविवेककृताऽभिनवेन **'तथा न विद्यते , उत्तरम्प्रश्नप्रतिवचोरूपं यत्र '**[67] तदनुत्तरमिति द्वितीयविग्रहवचनं सन्दर्शितम् । द्वितीयस्यास्य विग्रहवाक्यस्य व्याख्यानन्तु परात्रिंशिकायाष्टीकाकारस्याभिनवगुप्तस्य व्याख्यानरीतिसमधिगतपाटवस्य विद्यते यथाकथञ्चित् साधारण्येन निदर्शनमिति वक्तुं शक्यते । अनुत्तरशब्दस्य द्वितीयविग्रहव्याख्यानवचनञ्चेत्थम् – **"यत एव हि महासंवित्सिन्धोर्ल्लाससदनन्तप्रतिभापर्यन्तधाम्नः , उल्लास्यप्रश्नप्रतिभानादिपात्रम्भवति शिष्यः , तदेव वस्तुतस्तत्त्वं सततोदितमिति किमिवाचार्यीयमुत्तरमन्यत् स्याद्"**[68] इति ।

तृतीयं व्याख्यानम्प्रस्तुवन्नभिनवगुप्तः – **"उत्तरणम् , उत्तरो भेदवादाभिमतोऽपवर्गः, स हि वस्तुतो नियतप्राणतान्नातिक्रामति । तथाहि प्रथमं शरीरात् प्राणभूमावनुप्रविश्य , ततोऽपि भुद्धिभुवमधिश्य्य , ततोऽपि स्पन्दनाऽऽख्याञ्जीवनरूपतामध्यास्य , ततोऽपि सर्ववेद्यप्रक्षयात्मशून्यपदमधिष्ठाय , ततोऽपि सकलमलतानवतारतम्यातिशयधाराप्राप्तौ शिवत्वव्यक्त्याऽणुरपवृज्यते , आरोपव्यर्थत्वादिति"**[69] वचनम्पुरस्करोति । वस्तुतश्शैवदर्शनान्तर्गतम्भेदवादिमतमाश्रित्यानुत्तरशब्दविशेषस्यार्थो नोत्तर उत्तरणं वा यत्रेति सम्भवति । तेषामनुसारेण तूत्तरोऽपवर्ग इत्युच्यते । अतोऽभिनवगुप्तपादाचार्येण , यस्यां स्थितावपवर्गाद्युत्तरणन्नास्ति तदेवानुत्तरमिति प्रतिपादितम् । व्याख्यानमिदं विस्तरताऽऽचार्येणानेन भेदवादिसम्मतमपवर्गादिनिरूपणमप्येवं विशद्य पुरस्कृतम् ।

अनुत्तरशब्दस्य चतुर्थं व्याख्यानञ्चाभिनवगुप्तसम्मतमिदम् – **ईदृश एव , नाभिहृत्कण्ठतालुब्रह्मरन्ध्रभैरवबिलाद्यधिष्ठानक्रमप्राप्त ऊर्ध्वतरणक्रम उत्तरः ,**[70] इति । अभिनवगुप्तव्याख्यानमाधृत्येदृश एवेत्यनेनानुत्तरमित्यस्य पदस्य विग्रहवाक्यं यद्यपि न विद्यतेऽपेक्ष्यते वोत्तरो यत्रेत्येव प्राप्यते तथाऽपि विग्रहवाक्यस्यास्य नाभिहृदाद्यधिष्ठानातिक्रमणरुपप्रसङ्गापेक्षया सम्बद्धताऽवाप्यत एव । अर्थाद् यस्यां स्थितौ नाभिहृदाद्यधिष्ठानानान्न किमपि प्रयोजनमवशिष्यते तदनुत्तरमिति । एवमभिनवगुप्तदिशञ्चतुर्थं व्याख्यानमनुत्तरशब्दविशेषस्य ।

---

[66] परात्रिंशिका, पृष्ठसङ्ख्या- ३१-३२

[67] ________, पृष्ठसङ्ख्या- ३२

[68] ________, पृष्ठसङ्ख्या- ३२

[69] ________, पृष्ठसङ्ख्या- ३२-३३

[70] ________, पृष्ठसङ्ख्या- ३३





अनुत्तरशब्दस्य पञ्चमं व्याख्यानन्तु " **तथोत्तरन्त्यतः , इत्युत्तरो बन्धः"** [71] , इति तत्त्वविवेकाख्यायाण्टीकायामवाप्यते । संसाररूपस्य बन्धनस्याभावो यस्यां विशिष्टायां स्थितौ तदनुत्तरपदमित्यनुत्तरपदार्थसङ्गतिरिति पञ्चमव्याख्यानानुसारेण सिद्ध्यति ।

**"उत्तरणम् , उत्तरो मोक्षः , तद् एवंविधा उत्तरा यत्र न सन्ति"**[72] एवं षष्ठं व्याख्यानमभिनवगुप्तपादाचार्यानुसारम् । अनया व्याख्यया तु तेन भेदवादिशैवदर्शनाभिमतमोक्षस्थितेरप्युपर्य्येवावस्थानमभेदवादिनामनुत्तरपदवाचकस्य सङ्केतितम् ।

सप्तमञ्चानुत्तरशब्दस्य वैशिष्ट्योपस्थापकमभिनवं व्याख्यानमित्थम्प्रदर्शयत्यभिनवः – **" उत्तरञ्च शब्दनम् , तत् सर्वथेदृशन्तादृशमिति व्यवच्छेदङ्कुर्यात् , तद् यत्र न भवत्यव्यवच्छन्नमिदमनुत्तरम्"।**[73] इह शब्दनम्मानसिकोहापोहत्वस्य बोधकम् । यत्रेयत्तानान्तावत्तानाञ्च परिहारस्सम्भाव्यते तदनुत्तरनाम्नोच्यते । वस्तुतः परभावनाम् इदम्भावनाञ्च विहाय पराऽहम्भावनया परिपूर्णस्स्थितिविशेष एवानुत्तरमित्यभिनवगुप्तेन स्वीये व्याख्याने[74] स्पष्टीयते । तेनास्याः पराऽहम्भावनाया लोकव्यवहारापेक्षं साधूदाहरणमपि सप्तमव्याख्यानसम्बद्धमिदम्पुरस्कृतम् –

**वितत इव नभस्य विच्छिदैव प्रतनु पतन्न विभाव्यते जलौघः ।**
**उपवनतरुवेश्मनीध्रभागाद्युपधिवशेन तु लक्ष्यते स्फुटं सः ॥**
**तद्वत् परभैरवोऽतिसौक्ष्म्यादनुभवगोचरमेति नैव जातु ॥**
**अथ देशाकृतिकालसन्निवेशस्थितिसंस्पन्दितकारकत्वयोगाः ।**
**जनयन्त्यनुबाविनीश्चितिन्ते झटिति न्यक्कृतभैरवीयबोधाः ॥**[75]

अष्टमव्याख्याऽनुसारेण सापेक्षोत्कर्षविषयस्य न कथञ्चित्प्रकारकमपि प्रधानविषयत्वं यस्यां विशिष्टायां स्थितौ सम्भवति तदेवानुत्तरशब्दस्य स्वारस्यमिति । तद्यथा नरात्मनश्शाक्तोत्कर्षत्वन्ततोऽपि शाम्भवस्य , शाम्भवान्तर्गतेष्वपि भूततत्त्वात्ममन्त्रेश्वरशक्त्यादीनाम् अथ जाग्रत्स्वप्नसुषुप्त्यन्तर्गतास्वपि भेदस्थितिसूत्तरोत्तरं सापेक्षिकं वोत्कर्षविषयसममप्रधानत्वसमुत्पादकङ्किञ्चन विशिष्टावस्थानमेवानुत्तरेण प्रतिपादयत्यभिनवगुप्तस्तद्धि – **एवमेव नरात्मनश्शाक्तमुत्तरम् , ततोऽपि शाम्भवम् , तेष्वपि भूततत्त्वात्ममन्त्रेश्वरशक्त्यादिभेदेन स्वात्मन्येवोत्तरत्वम् , भूतादिष्वपि**

---

[71] परात्रिंशिका , पृष्ठसङ्ख्या- ३४

[72] ________, पृष्ठसङ्ख्या- ३४

[73] ________, पृष्ठसङ्ख्या- ३४

[74] *"इदमित्यपि हि व्यवच्छिन्नोत्तरव्यवच्छेदप्राणमेव , इति व्यवच्छेदकत्वाद् विकल्पात्मैव । अत एव यावदनुत्तरे रूपे प्रविवक्षुर्मायीयः प्रमाता , तावत् कल्पित एव विशेषात्मनि । तत्र त्वकल्पितं यदविनाभावि , तद् विना कल्पितारूपास्फुरणात् , तदेव वस्तुत अनुत्तरम् । तत्र हि भावनादेरनुपपत्तिरेव वस्तुत भावनाकरणोज्झितत्वमुक्तम् , न त्वनुपयुक्तित एव । तदीदृशम् – अनुत्तरं व्यवहारवृत्तिष्वप्येवमेवेति" ।* (परात्रिंशिका , पृष्ठसङ्ख्या- ३४-३५)

[75] परात्रिंशिका , पृष्ठसङ्ख्या- ३६

**पृथिव्यादिरूपतया , जाग्रत उत्तरं स्वप्नस्ततस्सुप्तन्ततस्तुर्यम् , ततोऽपि तदतीतम् , जाग्रदादिष्वपि स्वात्मन्येव चतुरादिभेदतयोत्तरोत्तरत्वम् ।**[76] वस्तुततस्त्वन्यस्यान्यापेक्षया समुत्कर्षत्वनिर्धारणमेव सम्मोहजनकन्तस्मादनुत्तरायां स्थितौ सम्मोहस्य पूर्णतोऽवसानमिति सङ्केतवचनन्तस्येदम् – **तदीदृशमौत्तराधार्यं द्वैतसम्मोहाधाय्युत्तरत्वम्**[77] , इति ।

अनुत्तरशब्दस्य न विद्यत उत्तरम् ऊनाधिकत्वं यत्रेति नवमसङ्ख्याकेन विग्रहवाक्येन निम्नतोच्चताभ्याम्पृथक् विशिष्टस्थितिरूपोऽर्थ उल्लिखितो भवति । तदुक्तन्तत्त्वविवेकव्याख्यात्रैवम् – **तथा विप्रराजन्यवैश्यशूद्रान्त्यजातिविभागमयम् ऊनाधिकत्वं यत्र न स्यात् , भावप्राधान्यमुत्तरशब्दस्य**[78] , इति ।

अतः परन्दशमैकादशद्वादशसङ्ख्याकास्वनुत्तरशब्दविशेषस्य व्याख्यासु विग्रहवाक्यं यद्यपि , न विद्यन्त उत्तराश्शक्तिभेदा यत्रेत्येव सम्भवति तथाऽपि विविधप्रसङ्गासक्तिविषयत्वात् प्रत्येकं विग्रहवाक्यस्य परस्परं स्वस्वविशिष्टार्थस्सन्तिष्ठत एव । तद्यथा पश्यन्तीमध्यमावैखर्य्यः , अघोरा-घोराघोरा-घोराः , परासूक्ष्मस्थूलरूपिण्यश्च शक्तयो यस्या विशिष्टायाश्शक्तेरुत्तरा न वर्त्तन्त इति साऽद्वितीया पराऽऽदिरूपाशक्तिरेवानुत्तरमिति पदेनानेन बोध्यते । **"उत्तराः पश्यन्त्यादयश्शक्तयः , अघोराऽऽद्याः , पराऽऽद्याः – ता यत्र न स्युः"**[79] , इत्यनुत्तरशब्दविशेषस्यार्था इमेऽभिनवगुप्तविहितव्याख्यानगम्याः ।

ततः पश्चान्न भवति नुदाऽऽर्थात् प्रेरणेन तरस्तरणं वा यत्र तदनुत्तरमिति त्रयोदशविग्रहवाक्यस्यास्याभिनवगुप्तकृता व्याख्येयन्दर्शनीयम् –" **नुद प्रेरणे , इत्यस्य नोदनन्नुत् तया तरणन्दीक्षाक्रमेण तरः , शिष्यचैतन्ये गुरुचैतन्यम्प्रेर्य्यते , तेन हंसप्राणादिशून्यविषुवत्प्रभृतिस्थानभेदपरिपाट्या , सकले निष्कलकेऽपि वा , पूर्णाहुतियोजनिकादिस्थित्या मोक्षदान्दीक्षां विधत्ते । तदत्र चैतन्यस्य स्वप्रकाशस्य व्यापिनो देशकालाकारविशेषाविशेषितस्य कथङ्कारम् इमा विडम्बनाः ? तद् एवंविधो नुदा प्रेरणेन , तरः , तरणं यत्र न भवति तदनुत्तरम् ।**[80] अर्थाद् यथा गुरूपदेशेन शिष्यगतोच्चारणदोषस्य निराकृतिस्सम्भवति तथा नोपदेशेन प्रेरणेन वा तत्र यावत्तरणमवाप्तुं शक्यते केनचित् । वस्तुतस्तदेव विशिष्टम्पदमनुत्तरमिति ।

अनुत्तरशब्दस्य चतुर्दशे व्याख्याने तु नञ्समासं विहाय श्वसनप्राणनार्थकस्य[81] धातोस्साहाय्येन , अनितीति 'अन्' तस्यैवोत्तरत्वं यत्र , एवं विग्रहवचनविन्यासेन कश्चनान्योऽर्थोऽभिनवगुप्तेनोल्लिख्यते । अत्र श्वसनेन शरीरस्य प्राणनेन चात्मनो ग्रहणम्भवतीति तु तथ्यम् । उभयोश्श्वसनप्राणनयोश्चोपलक्षणत्वङ्क्रियाज्ञानयोस्स्वीक्रियते । तथाह्यभिनवगुप्तव्याख्यायितोऽयमंशः – **यदुक्तं**

---

[76] __________, पृष्ठसङ्ख्या- ३७

[77] __________, पृष्ठसङ्ख्या- ३८

[78] तत्रैव

[79] __________, पृष्ठसङ्ख्या- ३८

[80] परात्रिंशिका , पृष्ठसङ्ख्या- ३९-४०

[81] *"श्वस प्राणने , अन च"* (वैयाकरणसिद्धान्तकौमुदी , पृष्ठसङ्ख्या- ३७९)





**श्रीमदुत्पलदेवपादैः – "ज्ञानङ्क्रिया च भूतानाञ्जीवताञ्जीवनम्मतम्" । इति । तथा च जीवनञ्ज्ञानक्रिय एवेति ।**[82] एवं विग्रहवाक्यस्य गूढं शैवदर्शनपरमर्थं व्याख्यायति[83] श्रीमदभिनवगुप्तपादाचार्य्यः ।

पञ्चदशे विशिष्टे व्याख्यानेऽप्यनुत्तरशब्दस्य निगूढश्शैवदर्शनपरोऽर्थस्स्पष्टीयत आचार्य्येण । तद्धि – " **अ , इति या चेयममायीय-अश्रौत-नैसर्गिक-महाप्रकाशविश्रान्त-निस्तरङ्ग-चिदुदधिस्वात्मचमत्काररूपा , शाक्तोल्लासमय-विश्वामर्शनरूपपरिपूर्णाहम्भाव-प्रथमपर्य्यवसानोभयभूमिगा कला , तस्या एव वक्ष्यमाणनयेन येयन्नुत्=विसर्गान्तता , तस्या एव तरः प्लवस्सर्वोपरिवृत्तित्वं यत्र ।**[84] अत्राकारस्य नञ्समासरूपम्परित्यज्य विशिष्टार्थो द्योतयत्याचार्य्यः । शैवदर्शनानुसारेण पराशक्तिरेव वितत्य विश्वं व्याप्नोति यस्य शास्त्रीयमभिधानं शाक्तप्रसर इत्युच्यते । अयमेव शाक्तप्रसरस्समस्तम् अहम्भावम् अर्थात् प्रारम्भिकीङ्कलाम् अथान्तिमाङ्कलाञ्च सममेव व्याप्नोति , तदेवानुत्तरमित्युच्यत इत्यभिनवगुप्तानुमोदितं विग्रहवचनमिदम्प्रमाणभूतम् – " **अ , कलाया या नुत्=विसर्गान्तता , तस्या एव तरो यत्र" ।**[85]

अनुत्तरशब्दविशेषस्य षोडशं व्याख्यानन्तु पुनर्नञ्समासापेक्षम् । यत्राकारोऽविद्यमानार्थकस्तदा विग्रहवचनमेवं सम्भवति – " **अविद्यमाना नुत् क्रमात्मकक्रियामयीप्रेरणा यत्र तदनुत् , ततोऽपि सातिशयम् अनुत्तरमिति" ।**[86]

अभिनवगुप्तेनेह लोकव्यवहारापेक्षिकेण पुनरेकेनोदाहरणेन क्रमात्मकक्रियामय्याः प्रेरणाया अभावदशां विशद्यानुत्तरशब्दविशेषस्य विशिष्टार्थ उद्घाटितः । तद्यथाऽऽकाशे न किमपि देशकालाद्यपेक्षङ्क्रमिकत्वमवाप्यते तथैव यस्यां विशिष्टायां स्थित्याम्प्रेरणाऽऽद्यभावो मन्यते तदेवानुत्तरमिति कथ्यते । एवं षोडशं व्याख्यानम्प्रस्तुवन्नेवाचार्य्योऽनुत्तरपदघटकस्य तरप्प्रत्ययस्यापि तमप्प्रत्ययवत् सातिशयरूप एवार्थ इति स्पष्टीकृतवान्[87] । तस्यानुसारेणातिशयत्वं

---

[82] परात्रिंशिका , पृष्ठसङ्ख्या- ४२

[83] *"अनिति श्वसितीति क्विपि , अन् –अणुः ,आत्मा देहपुर्यष्टकादिः , तथाऽननञ्जीवनम् ,अन् –देहाद्यन्तर्गतैव भिन्नभिन्नशक्त्याद्यहन्ताशून्यप्रायाजीवनाख्या वृत्तिः , यश्शून्यप्रमाता , इत्यभिहितः , तस्यैवोत्तरत्वं सर्वतः परमार्थतयाऽऽधिक्यं यत्र भैरवैकमयत्वात् । जडाजडभरिते जगति जडैर्जीवदेकमग्नैस्स्थीयते । जीवताञ्च जीवनन्नाम प्रागुक्तञ्ज्ञानक्रियारूपमेकम्पारमेश्वर्य्यं सर्वेषां , परत्रापि स्ववत् । देहादिरेव पृथक्तया भाति । यत् पुनः प्राणनन्तद् अभेदेनैव स्वप्रकाशम् , एतदेव च परमार्थः"।* (परात्रिंशिका , पृष्ठसङ्ख्या- ४१)

[84] __________, पृष्ठसङ्ख्या- ४२

[85] परात्रिंशिका , पृष्ठसङ्ख्या- ४२

[86] __________, पृष्ठसङ्ख्या- ४३

[87] *"अतिशयमात्रे तमपो विधिः । द्विवचनविभक्त्युपपदेऽत्र तरप् । तत्रायं शुक्लः , अयं शुक्लः , अयमनयोरतिशयेन शुक्लः –इति वाक्येऽयमर्थः-अनयोश्शुक्लयोर्मध्यादयं सातिशयश्शुक्लः=शुक्लतरः । एषान्तु शुक्लानामयमतिशयेन शुक्लः , इति कोऽयमधिकोऽर्थः?*

सम्यङ्निर्धारयितुन्तरप्प्रत्ययस्यैवाधिकं सामर्थ्यमिति । अत्रैव प्रसङ्गापेक्षस्य तारतम्यम् इति प्रयोगस्यास्य न तरप्तमप्प्रत्ययवत्त्वमपित्वेतस्याव्युत्पन्नत्वमिति साधितम् । ततः परम् " **एवं स्वातन्त्र्यसाराकालकलितक्रियाशरीरमनुत्तरम् । तदुक्तमुत्पलदेवपादैः – सक्रमत्वञ्च लौकिक्याः क्रियायाः कालशक्तितः । घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव ॥**[88] इति वचनसमुपस्थापनेन स्वीयमिदं षोडशं व्याख्यानञ्चाचार्य्येण सम्पुष्टम् । इह त्रयोदशसङ्ख्याकतो व्याख्यानतः प्रारभ्य षोडशसङ्ख्याकव्याख्यानपर्य्यन्तम् अभिनवस्य व्याकरणवैदुष्यमनायासेनानुभवितुं शक्यम् । वस्तुत एकस्यैव कस्यचन शब्दविशेषस्य षोडशधा व्याख्या नूनमेव व्याकरणपाण्डित्यं विनाऽसम्भवेति ।

**निष्कर्षः** - एवमनुत्तरशब्दविशेषस्य षोडशधा व्याख्याऽत्राभिनवगुप्तपादाचार्य्यदिशा व्याख्यायिता । यद्यपि षोडशसङ्ख्याकासु व्याख्यासु शैवदर्शनतत्त्वमेवातिशेते तथाऽपि व्याख्याऽन्तर्गतेनैव कोशपरकेण व्याकरणपूर्णेन च वैदुष्येणाभिनवगुप्तस्य व्याकरणसम्बद्धमवदानमवश्यमेवाभिर्व्याख्याभिस्स्पष्टायत इति तथ्यम् ।

********************


**सन्दर्भग्रन्थसूची**

- अभिनवगुप्तः , श्रीपरात्रिंशिका , मोतीलाल बनारसीदास : दिल्ली , १९८५
- भट्टोजिदीक्षितः , वैयाकरणसिद्धान्तकौमुदी , सं०- वासुदेवलक्ष्मणशास्त्री , निर्णयसागर प्रेस : बॉम्बे , १९०८


---

*तथाहि –अयम्प्रासादश्शुक्लः , अयम्पटश्शुक्लः , अयं हंसश्च शुक्लः , एषां सातिशयः=शुक्लतमः , इति । तत्र प्रासादोऽपि शुक्लः ,*

*पटोऽपि शुक्लः , हंसश्च शुक्लः , इति किमिवाधिकमुक्तं स्यात् तमपि प्रत्यये ? एवंविधवाक्यकरणमयुक्तमेव । न हि*

*तरपस्तमबधिकमतिशयमभिदध्यात् । एवन्तु तावत् स्यात् – अविवक्षिते प्रतियोगिविशेषे तमप्प्रयोगः, प्रतियोगिविशेषापेक्षायान्तु*

*तरप् । प्रतियोग्यपेक्षैव द्विवचनविभक्त्युपपदार्थः । एक एव हि प्रतियोगी भवेत् । अन्योरयं शुक्लोऽतिशयेनेति न तृतीयः प्रतीयते –*

*निर्धारणार्थेन प्रथमस्यैव प्रतियोगित्वावगतेः । न च द्विप्रभृत्यपेक्षा भवत्येकस्य , युगपदेकैकापेक्षा मता –इति तस्य क्रमेण*

*नाधिकोऽर्थः कश्चित् । तारतम्यमिति तु प्रयोगः क्रमातिशयेऽव्युत्पन्न एव रूढः , न तु तरप्तमप्प्रत्ययार्थानुगमात् –*

*तार्यन्ताम्यमत्याद्यपि हि स्यात् । तदलमकाण्डे श्रुतलवकौशलप्रथनेन" ।* (परात्रिंशिका , पृष्ठसङ्ख्या- ४५-४७)

[88] परात्रिंशिका , पृष्ठसङ्ख्या- ४८





# श्रीमद्भागवत् के भक्ति एवं दार्शनिक आयाम

**सदानन्द झा**[89]

*आराध्यो भगवान प्रजेशनयनस्तद्धाम वृन्दावनं*
*रम्या काचिदुपासना व्रजबधू भाग्येन या कल्पिता।*
*श्रीमद्भागवतं प्रमाणमखिलं श्रीकृष्णलीलापरं*
*श्रीचैतन्यमहाप्रभोमतिमिदं तत्राग्रहो नः परं॥*

अष्टादशपुराणरचयिता भगवान् बादरायण की कृतियों में सुमेरु के रूप से ग्रन्थरत्न श्रीमद्भागवत को माना जाता है। प्रकृतग्रन्थ में सकाम, निष्काम, साधन-ज्ञान, साधन-भक्ति, साध्यभक्ति द्वैधीभक्ति मर्यादामार्ग, द्वैत, अद्वैत आदि का वर्णन अनुपमेय है। जिसके कारण 'विद्यावतां भागवते परीक्षा' विद्वन्मण्डली में सुतरां प्रसिद्ध है। यह ग्रन्थ आशीर्वादात्मक ग्रन्थ के रूप में सारस्वत-साधक मानते हैं क्योंकि इसके मनन, अनुशीलन से लौकिक और पारलौकिक सभी प्रकार की सिद्धियां प्राप्त होती है।

प्राचीनसमय से वैदिक काअल में दार्शनिक विचारधारा प्रवाहित होती रही है जो नासदीय सूक्त, पुरुषसूक्त एवं उपनिषद् के द्वारा सम्पोषित होती रही है। इसके अनन्तर हम तन्त्र का आविर्भाव को देखते हैं जहाँ पंचरात्रसिद्धान्त सदृश तान्त्रिक प्रक्रिया स्थापित हुई। श्रीमद्भागवत् परमपावनग्रन्थ गंगा-यमुना धारा के समान वैदिक एवं आगम धारा से समवेत रहा है। चार वर्णों में विभक्त समाज को समन्वय स्थापना के लिये भगवान व्यास भक्तिपक्ष को प्रमुख माना है। जैसे भ्रमर कमल में निवास करके मधु का रसास्वादन करता है और अन्यत्र नहीं जाता है वैसे भगवानश्रीकृष्ण के चरणकमल में रसास्वादन करते हुये अन्यत्र भक्तजन नहीं रमण करें ऐसा प्रतिपादन प्रकृत ग्रन्थ में है। - यथा सत्स्त्रियः सत्पतिं भक्त्या वशयन्ति तथैव हरौ निर्बद्धहृदया समदर्शिनः साधवो हरिं वशयन्ति।

**व्याधस्याऽऽचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का,**

**कुब्जायाः किमुनाम रूपमधिकं किं तत् सुदाम्नोद्धनं।**

**वंश को विदुरस्य यादवपतेरुग्रस्य किं पौरुषं**

**भक्त्या तुष्यति केवलं न च गुणैर्भक्तप्रियो माधवः।**

---

[89] व्याकरण विभागाध्यक्ष, ज.ना.ब्र आ.सं महाविद्यालय, लगमा, दर्भंगा, बिहार

भक्ति नौ प्रकार के होते हैं श्रवण, कीर्तन, स्मरण, पादसेवन, अर्चन, वन्दन, दास्य, सख्य, आत्मनिवेदन। कलियुग में भक्ति की प्रमुखता है- कलौ तद्धरि कीर्तनात्, सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज, सदृश भक्ति साधना रूप है न कि साध्यरूप। साध्य आत्मा-परमात्मा को ऐक्य स्थापित करता है इसिलिये श्रीमद्भागवत् महापुराण में दार्शनिक पक्ष का मण्डन सुतरां प्रसिद्ध है।

उक्त दार्शनिक पक्ष का वर्णन बादरायण व्यास ने अनुपम धार्मिक ग्रन्थ श्रीमद्भागवत् में यत्र तत्र प्रचुर रूप में विशद वर्णन किया गया गया। जिसका अनुसन्धान आज भी अपूर्ण है।

श्रीमद्भागवत् महापुराण में भगवान् कहते है। सृष्टि के पूर्व मेरे अतिरिक्त ब्रह्माण्ड में कोई नही था[90]। मेरे सिवा स्थूल अथवा सूक्ष्म न तो दोनों कारण अज्ञान होता है। जहाँ सृष्टि का प्रादुर्भाव नहीं है वहाँ मेरे अतिरिक्त कुछ नहीं है। ब्रह्माण्ड में जो कुछ सृष्टि के कारण बोध हो रहा है, वह भी मैं हूँ जो अवशिष्ट है वह मैं हूं-

अहमेव समेवाग्रे नान्यद्यत्सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्येत् सोस्म्यहम्।
ऋतेऽर्थं यत्प्रतीतीयेत न प्रतीयेत चात्मनि
तद्विद्यादात्मनो मायां यथाऽऽभासो तथातमः।।

यथा महान्ति भूतानि भूतेषूच्चावचेश्वनु
प्रविष्टान्यप्रविष्टानि तथा तेषुन् तेष्वहम्
एतादेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः।
अन्वय व्यतिरेकभ्यां यत् स्यात् सर्वत्र सर्वदा।[91]

इस प्रकार श्रीमद्भागवत् महापुराण में दार्शनिक विवेचन दशमस्कन्ध के तैतालिसवाँ अध्याय 16 वाँ श्लोक में वर्णित है।

एक भगवान् श्री कृष्णचन्द्र में अनेक का समावेश प्रकृत श्लोक में परिलक्षित है।

मल्लानामश्निर्नृणां नरवरः स्त्रीणां स्मरोमूर्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्तास्वपित्रोः शिशुः।
मृत्युर्भोजपते विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदैवतेति विदितो रंगंगतः साग्रजः।

[90] द्वितीय स्कन्ध के नवमाध्याय के 32 से 35.
[91] श्रीमद्भागवत्- 2|9|32-35



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

मथुरानरेश भोजराज कंश के दरवार में भगवान श्रीकृष्णचन्द्र अपने अग्रज बलरामजी के साथ प्रवेश करने पर वहाँ समस्तलोगों की भावना की अभिव्यक्ति प्रकृत श्लोक मे दार्शनिक पक्षरूपों का वर्णन है

**सच्चिदानन्दरूपाय विश्वोत्पत्यादि हेतवे।**
**तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः॥**

इस श्लोक में दार्शनिकभावपुंज स्वतः स्पष्ट है।

इस प्रकार श्रीमद्भागवत् महापुराण में पदे पदे दार्शनिकसिद्धान्त अनुस्यूत है। अनुसन्धाताओं से मेरा नम्र निवेदन है कि ग्रन्थगत सिद्धान्तों को आत्मसात कर उत्तरोत्तर पुष्पित एवं पल्लवित करेंगें ताकि उक्त अनुपम ग्रन्थ समुद्र से रत्नप्राप्ति हेतु अनुसन्धान कर सके। समस्तमानव के कल्याण के लिये श्रीमद्भागवत् परमोपादेय है।

## सन्दर्भ ग्रन्थ सूची


१.स्वामी, दयानन्दसरस्वती , स्वामी ब्रह्मस्थानन्द (प्रकाशक ) कर्मयोग, प्रथम संस्करण, सत्ताईसवाँ पुनर्मुद्रण , पशुपतिनाथ एन्टरप्राइजेज ,नागपुर

२.स्वामी, दयानन्दसरस्वती , शुक्ल डाँ. विद्याभास्कर (अनुवादक), स्वामी ब्रह्मस्थानन्द ,(प्रकाशक), भक्तियोग, द्वितीय संस्करण, उन्नीसवाँ पुनर्मुद्रण , रामकृष्णमठ , गीरनार ग्राफिक्स, नागपुर

३.स्वामी, दयानन्दसरस्वती ,शर्मा श्री ब्रह्मेन्द्र (अनुवादक), सरकार श्री अमल (अनुवदक ), स्वामी ब्रह्मस्थानन्द (प्रकाशक ) प्रथम,द्वितीय संस्करण, तेरहवाँ पुनर्मुद्रण , रामकृष्णमठ , पशुपतिनाथ एन्टरप्राइजेज , नागपुर

४.स्वामी, रामसुखदास , श्रीमद्भगवद्गीता , साधक-संजीवनी(परिशिष्टसहित)हिन्दी-टीका, पैसठवाँ पुनर्मुद्रण , गीताप्रेस , गोरखपुर

५.गोयन्दका, श्रीहरिकृष्णदास (अनुवादक), श्रीमद्भगवद्गीता , शांकरभाष्य हिन्दी-अनुवाद सहित, उनतीसवाँ पुनर्मुद्रण , गीताप्रेस, गोरखपुर

६.शास्त्री, डाँ विजयपाल (व्याख्याकार), भारद्वाज,डाँ ईश्वर (सम्पादक), गीतार्थसंग्रह, आचार्य अभिनवगुप्तपादाचार्यकृत गीताभाष्य(विजयनी हिन्दी व्याख्या सहित), आर. डी. पाण्डेय सत्यम् पब्लिशिंग हाउस नई दिल्ली, २००५

७. शांकरभाष्यार्थ, ईशादि नौ उपनिषद् , आठवाँ पुनर्मुद्रण, गीताप्रेस, गोरखपुर

८.पद्मभूषण, उपाध्याय, आचार्य बलदेव (लेखक), कविराज, महामहोपाध्याय गोपीनाथ, भारतीय दर्शन(भारतवर्ष की विविध

दार्शनिक-वैदिक और तान्त्रिकविचारधाराओं का प्रमाणिक विवेचन) शारदा मन्दिर (प्रकाशक), पुनर्मुद्रण २००१, रत्ना आफसेट्स लिमिटेड, कमच्छा, वाराणसी

९.उपाध्याय, डॉ. जय जय राम,(प्राक्कथन) ,भारत का संविधान,१९५०(संविधान'९५ वाँ सशोधन'अधिनियम, २००९ एवं उच्चतम न्यायालय 'न्यायाधिश संख्या'' संशोधन' तक संशोधित), सेन्ट्रल लॉ एजेन्सी(प्रकाशक),३०-डी/१, मोतीलाल नेहरु रोड इलाहाबाद

१०. श्रीमद्भागवत् महापुराण, श्रीधरीव्याख्या, जे. एल. शास्त्री (सम्पा.) मोतीलालबनारसीदास, वाराणसी, प्रथसंस्करण १९८३





# आचार्यराजशेखरानुसारं प्रतिभास्वरूपम्

**हरीशचन्द्रकुकरेती**[92]

साहित्यशास्त्रिभिर्वैयाकरणैश्चार्थज्ञानाय प्रतिभोत्तमसाधनत्वेनाङ्गीक्रियते । येन शब्देन कश्चिज्जनो यमर्थमवगच्छति, तेनैव शब्देन कश्चिदन्यजनो भिन्नमेवार्थमवगच्छति, अस्य कारणं प्रतिभैव वर्तते । सर्वे जनाः स्वस्वप्रतिभानुसारमेव शब्दानामर्थावगमने समर्था भवन्ति, निरुक्तकारयास्केन ऋग्वेदमन्त्रमुद्धरताऽभिप्रायोऽयं स्वीकृतः, यद् इन्द्रियसम्पन्नाः, शास्त्रेषु कृतभूरिपरिश्रमा मनुष्या अपि मनोगम्यार्थज्ञाने तुल्या न भवन्ति-

*"अक्षण्वन्तः कर्णवन्तः सखायः मनोजवेष्वसमा बभूवुः ।*

*आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृश्रे" ॥*[93]

सामान्यार्थानामवबोधस्तु लोकव्यवहारगुरोपदेशादिभिरपि भवितुं शक्नोति, किन्तु काव्यपयोगि विशिष्टार्थज्ञानं प्रतिभावतो जनस्यैव भवति ,काव्यशास्त्रिणां प्रमुखाचार्येण भामहेन प्रतिभामहत्त्वं स्वीकुर्वता प्रोक्तं यद् गुरुपदेशान्मन्दबुद्धयोऽपि कदाचित् शास्त्रज्ञानं प्राप्नुयुः, किन्तु काव्यज्ञानं तु कैश्चित् प्रतिभाशालिभिः सहृदयैरेवावगन्तुं शक्यते –

*"गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।*

*काव्यं तु जायते जातु कस्यचित् प्रतिभावतः"*[94]

प्रतिभया युक्तः कविरेव जानाति यत् कस्य शब्दस्य प्रयोगः कस्मिन्नर्थे तथा कस्मिन्स्थाने उचितः । यथा – ***"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।***

***कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी"***[95]

पद्येऽस्मिन् कविना "पिनाकिनः" पदं न प्रयुक्तं, "कपालिनः" इत्येव पदं प्रयुक्तम्, वाच्यार्थस्तु द्वयोः शिव एव । किन्तु कवेः "कपालिनः" पदेन जुगुप्सार्थ एवेष्टः, एतत् प्रतिभावान्नेव ज्ञातुं प्रभवति नान्यः ।

काव्यमीमांसायाश्चतुर्थाध्याये राजशेखरेण सविस्तरं शक्तिविवेचनं प्रस्तुतम् । काव्यनिर्माणे च प्रधानं साधनं विमृशन् सः प्रथमतश्श्यामदेवनाम्नः कस्यचिदाचार्यस्य मतमाह- *"काव्यकर्मणि कवेः समाधिः परं व्याप्रियते"* [96]इति श्यामदेवः । कवितानिर्माणे कवेश्चित्तैकाग्रता उत्कृष्टं साधनं भवति, यतो हि समाधियुक्तं कविमन एवार्थान् पश्यति । मनस एकाग्रतैव समाधिः, समाधिमहत्त्वविषये काव्यमीमांसायां प्रतिपादितमस्ति यत् सरस्वतीसम्बन्धि विशिष्टं रहस्यं यद् विदुषां कृते कुशलतया सेव्यमस्ति, तादृशमहारहस्यस्यावाप्तये चित्तस्यैकाग्रताऽऽवश्यकी वर्तते , उक्तञ्च-

---

92 शोधच्छात्रः (M.Phil.),विशिष्टसंस्कृताध्ययनकेन्द्रम् , जवाहरलालनेहरुविश्वविद्यालयः,नवदेहली-110067

93 निरुक्तम् ,पृष्ठसंख्या-86

94 भामहः, *काव्यालङ्कारः* ,१.५

95 कालिदासः,*कुमारसम्भव* म्,५.७१

96 राजशेखरः, *काव्यमीमांसा*, मोतीलालबनारसीदास दिल्ली:1973 पृष्ठसंख्या-56

*"सारस्वतं किमपि तत्सुमहारहस्य, यद्गोचरे च विदुषां निपुणैकसेव्यम् ।*
*तत्सिद्धये परमयं परमोऽभ्युपायो यच्चेतसो विदितवेद्यविधेः समाधिः ॥* [97]

अतः श्यामदेवमतानुसारं काव्यं प्रति प्रमुखं कारणं चित्तस्यैकाग्रतैव । मङ्गलमतमुद्धरन् राजशेखर आह- *"अभ्यासः" इति मङ्गलः*[98], अविच्छेदेन शीलनमभ्यासः, सातत्येनान्यकविकृतकाव्यानुशीलनाभ्यासेनोत्कृष्टतमं काव्यनिर्माणकौशलं प्राप्तुं शक्यते । राजशेखरोऽब्रवीद् यद् वस्तुतः समाधिरान्तरिकः प्रयत्नोऽभ्यासश्च बाह्यप्रयत्नोऽस्ति ,एतावुभावेवैकां शक्तिं जनयतः, सा शक्तिरेव काव्यनिर्माणे प्रधानं कारणं भवति उक्तञ्च काव्यमीमांसाकारेण *"सा केवलं काव्यहेतुः"* इति , शक्तिस्तु प्रतिभाव्युत्पत्तिभ्यां पृथगेव वर्तते, यतो हि शक्तिसम्पन्नविदुषां पार्श्वे एव प्रतिभा संतिष्ठते, शक्त एव व्युत्पद्यते, सा शक्तिरेव काव्यनिर्माणे प्रधानं कारणं भवति, स प्रतिभां परिभाषमाणोऽकथयद् यत्- *"या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा"*[99] सा प्रतिभा शब्दसमूहम्, अर्थसमवायम्,शब्दार्थोभयालङ्कारप्रपञ्चम्,उक्तिचमत्कारं हृदय उदभावयति,तेनोदीरितं यत् प्रतिभाविहीनस्य कृते पदार्थसमूहः प्रत्यक्षतोऽपि परोक्ष इव भवति, प्रतिभाशालिनः कृते तु परोक्षोऽपि प्रत्यक्षत इव भवति, काव्यनिर्माणे प्रतिभाया हेतुत्वादेव मेधाविप्रभृतयो जात्यन्धा अपि लोकोत्तरवर्णननिपुणाः श्रूयन्ते, यतो हि दिव्यदर्शनवतां महाकवीनां सकलं जगत् प्रत्यक्षं जायते,यथा कालिदासविरचितेऽभिज्ञानशाकुन्तले देवकार्यं सम्पाद्य प्रत्यागच्छतो मरीचाश्रमदर्शने सञ्जातविस्मयस्य राज्ञः दुष्यन्तस्योक्तौ देशान्तरव्यवहारो दृश्यते –

*"प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने*
*तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।*
*ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो*
*यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी"*[100]

महर्षेः कश्यपस्य सकलभोगप्रकटकल्पपादपशोभित आश्रमे सर्वतो विस्मयमनुभवन् राजर्षिर्दुष्यन्तो महेन्द्रसारथिं मातलिं कथयति- मातले ! अस्मिन्नाश्रमे सर्वत्रैव दृश्यं मे विस्मयजनकं प्रतीयते । अस्मिन् कल्पवृक्षकानने इच्छामात्रेणैव सर्वविधं स्वादु भोजनं लब्धुं शक्यते, परमत्र स्थिता एते तपस्विनो वायुमात्रमेव भक्षयित्वा तपश्चरन्ति । एते धर्माचरणार्थमेव स्नान्ति, न तु विहर्तुम्, एते सुरसुन्दरीणां सन्निधावपि निगृहीतेन्द्रियाः सन्तस्तपश्चरन्ति, किं बहुना भूतलवर्तिनस्तापसास्तपश्चरणफलत्वेन स्वर्गादिभुवं प्राप्तुं प्रयतन्ते, तत्र स्थिता एते तपस्यन्तीतित्यतिरेकजनकोऽयं कश्यपाश्रमः । श्लोकेऽस्मिन्महाकविकालिदासेन स्वप्रतिभया देशान्तरव्यवहारो वर्णितः ।

इत्थं प्रतिभां निरूप्य राजशेखरो विभजते- प्रतिभाया भेदद्वयं कारयित्री भावयित्री च, कारयित्री प्रतिभा कवेरुपकुर्वाणा वर्तते, अस्याः प्रतिभाया भेदत्रयं सहजा, आहार्या, औपदेशिकी च, तासु सहजा प्रतिभा जन्मान्तरसंस्कारापेक्षिणी, आहार्या

---

[97] राजशेखरः, *काव्यमीमांसा*, मोतीलालबनारसीदास दिल्ली:1973 पृष्ठसंख्या-56
[98] राजशेखरः, *काव्यमीमांसा*, मोतीलालबनारसीदास दिल्ली:1973 पृष्ठसंख्या-58
[99] *तत्रैव*
[100] कालिदासः,*अभिज्ञानशाकुन्तकलम् ७/१२*





जन्मसंस्कारयोनिः अर्थात् जन्मन इह जन्मसम्बन्धी यः संस्कारस्तस्य योनिः जननी वर्तमानजन्मसंस्कारादेवेयं प्रतिभोत्पद्यते, औपदेशिकी मन्त्रतन्त्राद्युपदेशोत्पन्ना, कारयित्रीप्रतिभातः सम्पन्नकवीनामपि भेदत्रयं सहजाप्रतिभाकारणात् "सारस्वतकविः", आहार्याप्रतिभाकारणात् "आभ्यासिककविः",औपदेशिकीप्रतिभाकारणात् "औपदेशिकः" । नैषधकारहर्ष औपदेशिकी प्रतिभाऽऽसीद् यतो हि चिन्तामणिमन्त्रचिन्तनसामार्थ्यादेवंविधं महाकाव्यं श्रीहर्षेण विरचितम् ,उक्तञ्च- *"श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं*

*श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।*
*तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-*
*काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥* [101]

श्यामदेवाचार्यमतमस्ति यदेतेषु सारस्वताभ्यासिकौपदेशिकेषु पूर्वः पूर्वः श्रेयान् भवति,उक्तञ्च-*"तेषां पूर्वःपूर्वः श्रेयान्" इति श्यामदेवः* , उक्तञ्च काव्यमीमांसायाम्-

*"सारस्वतः स्वतन्त्रः स्याद्भवेदाभ्यासिकोमितः । औपदेशकविस्त्वत्र वल्गु फल्गु च जल्पति"*[102]

किन्त्वाचार्यराजशेखरोऽब्रवीद् यदेतेषु सारस्वताभ्यासिकौपदेशिकेषु यत्रोत्कर्षो भवति, स एव श्रेयान् । *"उत्कर्षः श्रेयान्"इति यायावरीयः* तस्य मतमस्ति यदुत्कर्षप्राप्तिस्त्वनेकगुणानामेकत्र संस्थाने भवति, यतो हि (१) ज्ञातृत्वम् (२) काव्येषु तथा तदङ्गभूतासु विद्यासु च काव्यकरणाभ्यासः (३) कवयितू रहस्यज्ञानपूर्विका कवित्वशक्तिः, एतत् त्रयमेकस्मिन् कवौ दुष्प्राप्यमुक्तञ्च-

*"बुद्धिमत्त्वं च काव्याङ्गविद्यास्वभ्यासकर्म च ।*
*कवेश्चोपनिषच्छक्तिस्त्रयमेकत्र दुर्लभम् ॥* [103]

काव्ये काव्याङ्गभूतासु छन्दःकोशादिविद्यासु च विहितोऽभ्यासो येन तस्य धीमतस्तथा सारस्वतमन्त्रस्य जपकर्मणि भक्तिर्यस्य तस्य बुद्धिमतः कवेः कृते महाकविपदप्राप्तिः करतलगतेव जायते, उक्तञ्च- *"काव्यकाव्याङ्गविद्यासु कृताभ्यासस्य धीमतः ।*
*मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजता ॥* [104]

अपकृष्टदुर्बुद्धिकवेः काव्यमपकृष्टत्वात् प्रचारप्रसाराभावात् सद्मन्येव विराजते, मध्यमस्याभ्यासिककवेः काव्यं मित्रगृहाणि यावद् व्रजति, कस्यचिद् विदग्धकवेः काव्यं साधारणजनानामप्याननेषु चरणान्नाधाय जगतो दर्शने सकौतुकमिव निरन्तरं भ्रमति अर्थात् साधारणजना अपि तस्य काव्यं कठस्थीकृत्येतस्ततः गायन्ति,एतादृशकवेः काव्यं बहुविस्तारं याति, उक्तञ्च- *"एकस्य तिष्ठति कवेर्गृह एव काव्यमन्यस्य गच्छति सुहृदभवनानि यावत्*
*न्यस्य विदग्धवदनेषु पदानि शश्वत्कस्यापि सञ्चरति विश्वकुतूहलीव ॥* [105]

अत एव ध्वन्यालोककारोऽप्यवदत् –

---

[101] श्रीहर्षः,*नैषधीयचरितम्, १/११४*
[102] *राजशेखरः,काव्यमीमांसा,चतुर्थाध्याय*
[103] *तत्रैव*
[104] *तत्रैव*
[105] *राजशेखरः,काव्यमीमांसा,चतुर्थाध्यायः*

*"तद् वस्तुतत्त्वं निष्यन्दमाना महतां कवीनां भारती अलोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति,येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते ॥*[106]

यथा तुलसीदासविरचितं "रामचरित्तमानसाख्यं ग्रन्थं साधारणजना अपि स्मरन्ति,अत्र सहजा प्रतिभैव कारणम् ।

राजशेखरानुसारं कारयित्रीप्रतिभास्वरूपं प्रतिपाद्येदानीं भावयित्रीप्रतिभास्वरूपं विविच्यते । प्रतिभेयं भावकस्य अर्थात् आलोचकस्य उपकारयित्री भवति,इयमेव कवेर्श्रमस्याभिप्रायस्य च मूल्याङ्कनं कारयति, अर्थात् सहृदयजनः भावयित्रीप्रतिभाबलेनैव कवेश्शब्दार्थयोर्भावं ग्रहीतुं सक्षमो भवति । कवेः काव्यनिर्माणरूपिवृक्षोऽस्याः प्रतिभाया कारणादेव सफलीभवति ।

अत्र शङ्कोपस्थाप्यते यत् कविभावकयोर्मध्ये को भेदः, तदाचार्यैरुच्यते यत् कविरेव भावकः,भावक एव कविः,उक्तञ्च-

*"प्रतिष्ठातारतम्येन प्रतिष्ठा भुवि भूरिधा । भावकस्तु कविः प्रायो न भजत्यधमां दशाम् ॥*[107]

किन्तु कालिदासेन मतमिदं नाङ्गीक्रियते यत् कविरेव भावकः,भावक एव कविः, अस्य तात्पर्यं वर्तते यद् येन काव्यं विरच्यते स कविरुच्यते, यः काव्यार्थभावनया युक्तः सत्त्वोद्रेकसम्पन्नः कविवर्णितविषयेन सह तन्मयीभवति सो भावक इत्यभिधीयते, एतदेव कविभावकयोः स्वरुपभेदः, कविस्तु शब्दार्थयोराश्रयणं स्वीकृत्य घटापटादीन् स्वविषयत्वेनाश्रयति,किन्तु भावकस्तु केवलं रसमात्रमेवास्वादयति, स रसमेव विषयत्वेनाङ्गीकरोति, अयमेव कविभावकयोर्मध्ये विषयभेदः।

यथा एक उपलः(प्रस्तरः) सुवर्णम् उत्पादयति द्वितीयो निकषोपलः सुवर्णस्य परीक्षां करोति, तथैवैकः कविः काव्यरचनायां पारङ्गतो भवति,द्वितीयस्तावत् शब्दार्थभावागमः सहृदयः कविताश्रवणे समर्थो भवति,उक्तञ्च काव्यमीमांसायाम्- "न" इति कालिदासः, पृथगेव हि कवित्वाद्भावकत्वं,भावकत्वाच्च कवित्वम् । स्वरूपभेदाद्विषयभेदाच्च-

*"कश्चिद्वाचं रचयितुमलं श्रोतुमेवाऽपरस्तां कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति ।*

*न ह्येकस्मिन्नतिशयवतां सन्निपातो गुणानामेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ॥*[108]

मङ्गलाचार्यमतानुसारं भावकस्य भेदद्वयमुक्तञ्च-***"ते च द्विधाऽरोचकिनः, सतृणाभ्यवहारिणश्च" इति मङ्गलः*** (१) **अरोचकिनः** – न रोचयतीत्यरोचकः सोऽस्यास्तीत्यरोचकी, अरोचको नाम रोगविशेषः, अरोचके जाते सुस्वादयुक्तेऽप्यन्ने जनायाभिरुचिर्न जायते , तथैके भावका अप्यरोचकिनो ये सरसेऽपि काव्ये नासाक्षिसङ्कोचं कुर्वन्ति । (२) **सतृणाभ्यवहारिणः**- तृणमप्यपरित्यज्येति सतृणम्, सतृणमभ्यवहरन्ति खादन्तीति सतृणाभ्यवहारिणः, यथा बुभुक्षिताः स्थाल्यां परिवेषितं सर्वमन्नादिकमानन्देनैवादन्ति तथैव सतृणाभ्यवहारिणो भावकाश्छन्दोबद्धं यत्किञ्चिदपि काव्यात्मना रसयन्ति, सतृणाभ्यवहारिणोऽविवेकिन इति यावत्[109]

106 *आनन्दवर्धनः, ध्वन्यालोकः,प्रथमोद्योतः*

107 *राजशेखरः,काव्यमीमांसा,चतुर्थाध्यायः*

108 राजशेखरः,*काव्यमीमांसा,*चतुर्थाध्यायः

109 राजशेखरः,*काव्यमीमांसा* चतुर्थाध्यायः





काव्यलङ्कारसूत्रे वामनेनापि "अरोचकिसतृणाव्यवहारिणोश्चर्चा प्रस्तुता, उक्तञ्च- ***"अरोचकिनः सतृणाव्यवहारिणश्च कवयः , अरोचकिसतृणाव्यवहारिशब्दौ गौणार्थौ,कोऽसावर्थः,विवेकित्वमविवेकित्वञ्चेति***[110] , तस्येदं मतं यद् विवेकित्वाद्विवेचनशीलत्वात् खल्वरोचकिनश्शिष्याः शासनीया, इतरेऽविवेचनशीलत्वात् सतृणाभ्यवहारिणो न शिष्याः , यतो हि तेषां शीलमपाकर्तुं न शक्यते । राजशेखरेणालोचकानां चतुर्भेदा अङ्गीकृताः, अरोचकी,सतृणाभ्यवहारी,मत्सरी,तत्त्वाभिनिवेशी च । अरोचकिनां भावकानामरोचकिता द्विधा विभजते- नैसर्गिकी,ज्ञानयोनिश्च । नैसर्गिकी संस्कारशतेनापि रङ्गम् इव कालिकां न जहाति, ज्ञानयोनावरोचकितायां विशिष्टार्थसम्पन्ने महावाक्ये रोचकितावृत्तिरुत्पन्ना भवति, किञ्च सतृणाभ्यवहारिता सर्वसाधारणी भवति , काव्यनिर्माणेच्छया चेष्टयतो व्युत्पित्सोः कवेः सर्वत्र प्रथमं सतृणाभ्यवहारितैव वृत्तिर्भवति,यतो हि प्रतिभाविवेकविकलता हि गुणागुणयोर्विभागं कर्तुं न पारयति, अत एव सतृणाभ्यवहारी बहु त्यजति, बहु च गृह्णाति, आलोचकस्तु यथार्थदर्शी स्यात्, विवेकानुसारेणैव हि बुद्धयो मधु निष्यन्दन्ते ।

"परोत्कर्षासहनं मत्सरः" मत्सरयुक्त आलोचकोऽन्यस्य काव्यगुणान् दृष्ट्वाऽपि न पश्यति, यतो ह्यन्यस्य गुणान् वर्णयितुं नेच्छति,अत एव मौनमवलब्यैव तिष्ठति सः । अतः राजशेखरेण प्रतिपादितम्- अमत्सरी ज्ञाता च विरल एव भवति, केनचित् कश्चित् कविः पृष्टः यत् "त्वं कोऽसि" तेनोदीरितं "कविरस्मि" पुनः स पृष्टो जातस्तर्हि काचिदभिनवा कविता गीयताम्,तदा कविनोत्तरितमिदानीं तु काव्यनिर्माणमेव त्यक्तम्, यतो हि यो दोषगुणयोः सारं विविनक्ति, तादृशः कविस्तु दुर्लभ इदानीन्तनकाले, यदि भाग्यवशात् कुत्रचिदुपलभ्यन्ते तर्हि ते निर्मत्सरा न दृश्यन्ते, उक्तञ्च-

*" कस्त्वं भोः कविरस्मि,काप्यभिनवा सूक्तिः सखे पठ्यताम्*

*त्यक्ता काव्यकथैव सम्प्रति मया कस्मादिदं श्रूयताम् ।*

*यः सम्यग्विविनक्ति दोषगुणयोः सारं स्वयं सत्कविः*

*सोऽस्मिन् भावक एव नास्त्यथ भवेद्दैवान्न निर्मत्सरः ॥*[111]

तत्त्वाभिनिवेशी भावकस्तु सहस्रजनानां मध्ये कश्चिदेक एव भवति, यः शब्दविन्यासप्रकारं सम्यग्विचारयति, शब्दानां पद्ये गद्ये व संयोजनप्रकारान् विवेचयति, अत्रैतादृशशब्दनिवेशेनेदृशचमत्कारो जायते, एतादृशशब्दपरिहारेणायं चमत्कारो भवेदित्यादि । यः शोभनकथनैर्हृष्यति,काव्यरसामृतमास्वादयति, केन तात्पर्येण कविनाऽत्रास्य शब्दस्य विन्यासः कृत एवं रूपां कवितात्पर्यमुद्रां विचारयति एतादृशः काव्यश्रमज्ञः तत्त्वाभिनिवेशी भावकः केषाञ्चिदेव बुद्धिमतां पुण्यैः कदाचिदेव लब्धो भवति ।

राजशेखरेण स्पष्टमुल्लिखितं यदालोचकः कवये सर्वं भवति, काव्यपरिशीलनपरिपक्वबुद्धिरालोचकः काव्यनिर्मातुः कृते दोषाच्छादकत्वात् स्वामी, कविसमाजे काव्यकर्तुः गुणकीर्तनान्मित्रं तथा गुणोपादानदोषहानाद्युपदेशकत्वाद् गुरुर्भवति उक्तञ्च-

**स्वामी मित्रं च मन्त्री च शिष्यश्चाचार्य एव च ।**

**कवेर्भवति हि चित्रं किं हि तद्यन्न भावकः ॥**[112]

110 वामनः,*काव्यालङ्कारसूत्राणि १/२/१*

111 राजशेखरः, *काव्यमीमांसा,*चतुर्थाध्यायः

चेतस्येव कृतनिवासेन तेन कविकाव्येन किं,आलोचकैर्यस्य रचना दश दिशो न श्लाघ्यन्ते,तस्य कवेः काव्यमेव व्यर्थम् –

**"काव्येन किं कवेस्तस्य, तन्मनोमात्रवृत्तिना**

**नीयन्ते भावकैर्यस्य न निबन्धा दिशोदश ॥**

**सन्ति पुस्तकविन्यस्ताः काव्यबन्धा गृहे गृहे ।**

**द्वित्रास्तु भावकमनः शिलापट्टनिकुट्टिताः ॥**[113]

भावकानां वैविध्यं प्रदर्शयता राजशेखरेणोक्तं यत् कश्चिदालोचकः कवेः शब्दसौन्दर्यमेवालोचयितुं प्रभवति, कश्चित् कवेः काव्यमाकर्ण्यात्रेदं कविहृदयमिति विचारयितुं प्रभवति तथा कश्चिदालोचकः वचसा न किमपि भणति,किन्तु सात्त्विकैः,आङ्गिकैः अनुभावैश्च हृदयगतमुल्लासं प्रकटयति , कश्चिद् भावकः गुणग्राही, कश्चिद् दोषप्रदर्शकः,कश्चिद् गुणादानपुःसरं दोषहानपरो भवति –

उक्तञ्च- ***"वाग्भावको भवेत्कश्चित् कश्चिद्धृदयभावकः ।***

***सात्त्विकैराङ्गिकैः कश्चित् अनुभावैश्च भावकः ॥***[114]

आचार्यराजशेखरः मनुते यद् यः कविः भवितुमिच्छति, किन्तु सामर्थ्याभावात् काव्यं कर्तुं न शक्नोति, तदा यदि वाग्देव्याः सरस्वत्याः कृपा भवेत् तर्हि सोऽपि प्रतिभायुक्तो भवितुमर्हति –

***कवित्वं न स्थितं यस्य काव्ये च कृतकौतुकः ।***

***तस्य सिद्धिः सरस्वत्यास्तन्त्रमन्त्रप्रयोगतः*** ॥[115]

आचार्यराजशेखरानुसारं सङ्क्षेपेण प्रतिभास्वरूपं यथामनीषया प्रतिपादितम् ।

**सन्दर्भग्रन्थाः**


1. राजशेखरः,*काव्यमीमांसा*,त्रिपाठिरमाशङ्करः(सम्पादकः),मोतीलाल बनारसीदास,वाराणसी,प्रकाशनवर्ष-१९७३
2. यास्कः,निरुक्तम्,दुर्गाचार्यकृत-ऋज्वर्थाख्यवृत्या समवेतम्,भण्डारकरप्राच्यविद्यामन्दिरम्, १९८५
3. वामनः,*काव्यालङ्कारसूत्राणि*,नारायणराम(संशोधकः),मोतीलाल बनारसीदास,दिल्ली, १९९६
4. मिश्र,डाँ हरिराम,*व्याकरण तन्त्र का काव्यशास्त्र पर प्रभाव*, ईस्टर्न बुक लिंकर्स,दिल्ली, १९९४
5. कालिदासः,*अभिज्ञानशाकुन्तलम्*,त्रिपाठिकृष्णमणिः(व्याख्याकारः), चौखम्भा सुरभारती प्रकाशन,वाराणसी, २००४
6. श्रीहर्षः,*नैषधीयचरितम् ,चौखम्बा विद्याभवन , वाराणसी , २००५*


112 राजशेखरः,*काव्यमीमांसा*, पृष्ठसंख्या-74

113 *तत्रैव , पृष्ठसंख्या-76*

114 *तत्रैव*

115 *तत्रैव , पृष्ठसंख्या-78*





# Analytical study of doctrinal inconsistencies

NIRMALA.V[116]


**Abstract:**

A wide range of knowledge systems are traditionally encompassed in the realm of Vedas and hence they are celebrated as the seats of various thought systems developed in later periods. Tantra is the folk indigenous cult having a religion- philosophic face that parallel to the Vedic system. The antiquity of these scriptures is not exactly calculated yet. A massive vagueness exists in the question about the priority of origin of Tantra and Veda. Almost all philosophies treat cosmology as the fundamental explanatory key for the quest about the ultimate truth. In *Rgveda*, *Nasadiyasukta*- the ancient creation hymn- teaches the stage of pure consciousness, known as world and god. The eleventh century scholar, Abhinavagupta, explained the phenomenon of the universe as non-different from the highest reality in his four propagandistic booklets on TrikaSaivism. *Anuttarastika* is the most important among them. Here this paper is an attempt to explore the theoretical incongruities among the Tantric and Vedic wisdom by analyzing the aforementioned scriptural portions.


**Introduction: Veda and Tantra- Two Indian Traditions**

From early times, Vedas indicate the ancient traditional wisdom encompassed with a wide and deep diversity. Since they provide huge amount of data, in their later written form, Vedas naturally came to known as the sources of all knowledge. Tantrism should be viewed as a parallel tradition, with rich folk contents and comprised of a large variety of interesting theories and practices flourished in the shadow of mysterious religious beliefs. It is impossible to provide authoritative information regarding the origin and development of Tantric lore, since it is not as clear as the Vedas.[1]Some scholars finds parallels between both traditions while others locate Tantra within the Vedic lore. TeunGaudriaan opines: "The tantras themselves trace the origin of sacred body of their literature to the divine revealer who acted in the time immemorial. But at the same time they do not neglect to pinpoint their position with respect to the primeval revelation of the vedas."[2] Some others treat both as the parts of the same tradition. Since both systems are primitive ie, more religious in nature, the gradual inflow of philosophy could be assumed. Scholars try to discover this tendency in veda itself. As a result, the Nasadiyasukta got attracted as the philosophical reference of vedic people. Tantra has also a philosophy that developed later, but endowed with some peculiarities of its own. Naturallythe Indian mindset, as mentioned before, that considers the origin of everything from veda don't leave this system alone. Many were postulated that both vedas and tantrasdeals with the same philosophical doctrines. In modern academia, some scholars are with the idea that Tantric scriptures can be interpreted in the light of Vedic doctrines. Such a mindset tries to equate Abhinavagupta'sAnuttarastika and Nasadiyasukta which is the main issue going to be encountered in this paper. Here the attempt is to express the disagreement towards thisattitude[3] and to suggest the divergences between their metaphysical ideas.

116 Rsearch Scholar, Dept. of Sanskrit Sahitya, SreeSankaracharya University of Sanskrit, Kalady, Kerala.

**The Theory of Creation**

The universe in its complicated form was a wonder for the human beings who started to think. They asked the questions about its creation along with the doubts about the supreme truth and ultimate purpose of life. This made the philosophers mouths to distribute the knowledge about the beginning of whole universe. Almost all philosophical systems give significance to the cosmology and cosmogony. Indian thought traditions discussed the theory of creation in terms of Tattvas- the components of the world (in the macrocosmic and microcosmic forms).Nyaya- Vaisesikas denote both ontological and abstract metaphysical principles known as Padarthas.Samkhya describes twenty four principles to claim the real and existent nature of the world- manifestation. Advaita Vedanta posits the theory of Pancikarana (intermixing)[4] and admits Brahman as the sole reality.

The universe is comprised of thirty sixtattvas the levels of creation.Saiva monism accepts Paramasiva as the absolute reality. He manifests as the universe with his own freedom, 'the power to become or not to become.' Siva himself is the foundation for this process: "Svecchayasvabhittau visvamunmilayati"[5]Supreme lord is known as Pancakrtyakari one who do five works viz., srsti, sthiti, samhara, anugraha, and anakhya.

**Contents ofNasadiyasukta and Anuttarastika**

Nasadiyasukta known as the creation hymn is the 129thsukta in the tenth mandala of Rgveda. This hymn is fundamentally a realistic work with strong elements of spontaneous materialism and dialectics. It consists of eight mantras in which the first four mantras speaks about the state of supreme consciousness and the last portion discusses the process of creation. Anuttarastika, one of the Abhinavagpta's small works, comprised of eight verses. The entire hymn is dedicated to the unsurpassable- Anuttara- the supreme reality. If one person is aware about his own nature (which is identical to that of the supreme's) then there is no need of any type of spiritual practices. The worshipper, the worshipped and the bondage are nothing but the only real entity. The state of bliss is equal to the other states of mind. The reality could be found in the unreal and vice versa. The dualities like simple, complex; eternal, temporal; pure, impure etc., are all having the nature of pure light- the power of lord.

**Divergences in the Ideas**

While assessing two literary works of different time periods, it should be kept in mind that both are the products of two distinct historical moments. Here the Nasadiyasukta, from tenth mandala of Rgveda (generally known as later portion) is similar to the other cosmogonic mythical hymns which are the works of a particular historical period when philosophical thought made its first steps and those steps were most probably towards spontaneous materialism and dialectics.Anuttarastika is one of the texts of Abhinavagupta, the eleventh century Saivite scholar who lived in the interior of a well-developed thought system[6]and beneath his high level intellect-transmitted through a wide range of literature- non-dual Saivism reached the apex tantric thought. So the hymns created in the transition period (from religion to philosophy) and well developed status of another thought system could not be equalized.





Both hymns are speaking about a common thing- the absolute. Actually the concept of Atman became central to all the philosophical systems, only after the critical condition of thinkers that they must produce answer to the internal quest of the human being about the purpose and truth of the very life. Various thoughts have expressed various types of the absolute. In the words of Gaudriaan, "Indian religious leaders and philosophers themselves had different ideas about the self's status, characteristics, stages of development, size or quantity (unique cosmic Atman or plurality of separate self-monads?). Also the terminology is multiform and the mutual distinctions are in a subtle nature and not always clear."[7] As such, finding the sameness between Anuttara and the supreme lord described in the hymn will be unproductive.

Next is the opinion about the maya- the force reveals the real and acts as the cause of creation. It is something distinct in saiva philosophy. maya is Sakti ad it is also an entity having indifferent to the supreme. Acc to vedantins, it has not such a positive position.Anuttarastika says: "Since illusion has no independent reality it is also ultimately not different from non-dual consciousness."[8] From this it could be found that the concept of maya in saivism is entirely different from that of Vedanta.

To conclude, it is true that the tantric scriptures of later origin have been strongly influenced by the Vedic and Sankara'sAdvaitic traditions as said many scholars like K.C Pandey. The metaphysical doctrines with fundamental similarities also could be viewed. Still it is irrelevant to compare and find similarities between two writings of distinct ideologies and time periods, like Anuttarastika and Nasadiyasukta.

**Notes**

1. See Padoux Andre, 'What do We mean by Tantrism' in *The Roots of Tantra*, Suny, Albeny, 2002.
2. GaudriaanTeun, 'Imagery of Self From Vedas to Tantra', *ibid.*, p.172.
3. Dr KamaleshJha has been stated this thing in the Trika Workshop held on June 2011 at ICPR, Lucknow.
4. This theory represents the origin of the universe through the proper intermixing of the five elements.
5. D. B Sen Sharma says: The supreme lord manifests himself as the world out of his free will as a part of his five functions. He is endowed with svatantryasakti and capable of whatever he likes to do.
6. Though there are indications in the early tantric tradition (mostly in the form of the religious systems or cults), the origin of non-dualism in the form of the very 'Kashmir Saivism' is generally traced back to Somananda (8th C). Utpaladeva (9th C) and Abhinavagupta were the great followers of this institution.
7. *Op. cit.*, p.171.

## Bibliography


- *Isvarapratyabhijnakarika* (Ed.), RaffaeleTorella, MotilalBanarsidass, Delhi, 2002.

 ISSN 976-8645


- *Isvarapratyabhijnavimarsini* (Ed.), SastriMukund Ram, 2vols, KSTS 22, 33, Bombay, 1918, 1921.
- *Paratrisikavivaranaof* Abhinavagupta (Ed.), Singh Jaideva, MotilalBanarsidass, Delhi, 1988.
- *Siddhitrayi*of RajanakaUtpaladeva (Ed.), ShastriKaul M.S, KSTS, 1921.
- *Sivasutra* (Ed.), Singh Jaideva, MotilalBanarsidass, Delhi, 2002.
- *Spandakarika* (Ed.), Singh Jaideva, MotilalBanarsidass, Delhi, 1992.
- *Tantraloka*of Abhinavagupta with the commentary *Viveka*of RajanakaJayaratha (Ed.), ShastriMukund Ram, KSTS 23,28,30,35,29,41,47,59,52,57,58, Bombay and Srinagar, 1918-1938.
- *Tantrasara* of Abhinavagupta (Ed.), ShastriMukund Ram, KSTS 17, Bombay, 1918.
- Drabu, V.N, *A Study in Socio-economic Ideas and Institutions of Kashmir*, Indus Publication company, New Delhi, 1990
- Dyczkowski, Mark S.G, *The Doctrine of Vibration: An Analysis of the Doctrines and Practices of Kashmir Saivism*, MotilalBanarsidass, Delhi, 1989.
- Gaudrian, Teun, *Ritual and Speculation in Early Tantrism*, State University of New York, USA, 1992.
- Swami, Sankarananda, *The Yoga of Kashmir Saivism: Consciousness is everything*, MotilalBanarsidass, Delhi, 2006.
- Pandey, K.C, *Abhinavagupta: An Historical and Philosophical Study*, ChowkhambaAmarabharati, Varanasi, 2006.
- Sensharma, D.B, *The Philosophy of Sadhana*, State University of New York, Albeny, 1990.
- Lawrence, David Peter, *Rediscovering God With Transcendental Argument*, State University of New York, Albeny, 1990.


*********************



 ISSN 976-8645

# वाल्मीकिरामायणे ज्यौतिषशास्त्रीयतत्त्वान्वेषणम्

**मधुसूदनमिश्रः**[117]

आदिकाव्ये वाल्मीकिरामायणे दिननामानि,नक्षत्रनामानि,षोडशसंस्कारव्यवस्था,शुभाशुभशकुनविचारादयः **तत्र तत्र** दृश्यन्ते । रामादिजन्मकाले, मिथिलातः उद्वाहान्ते अयोध्यागमनकाले, श्रीरामचन्द्रस्य वनगमनान्ते, श्रीभरतस्य मातुः गृहतः अयोध्यागमनकाले, अशोकवाटिकायां श्रीसीतादेव्याः निवासकाले त्रिजटायाः स्वप्ननिदर्शने अन्यस्मिन् स्थले प्राचुर्येण शुभाशुभलक्षणनिर्देशपुरस्सरं फलकथनं विद्यते ।

दिव्यज्ञानविषयभूतानां वेदानामङ्गत्वात् ज्योतिषशास्त्रस्यापि वेदवदपौरुषेयता प्राचीनता च स्वीकृता पुण्यश्लोकैर्महर्षिभिः वेदविद्भिः ''एवमिमे सर्वे वेदाः निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वयाख्याताः सपुराणाः सस्वराः'' इति सामगोपथब्राह्मणोक्तेः । तत्र इतिहासानुशीलनस्य अवकाश एव नास्ति । किन्तु यदि शास्त्राणां पौरुषेयतापक्षे विविधैरन्तःसाक्ष्य **ब**हिःसाक्ष्यै**श्च** कालक्रममधिकृत्य पौर्वापर्यनिर्णयः क्रियते त**दा** कतिपयैराधुनिकैः आङ्ग्लविद्वद्भिः, अस्मद्देशप्रसूतैश्चाङ्ग्लभक्तैः विद्वद्भिः ज्योतिषशास्त्रस्य विशेषतः फलितस्य अर्वाचीनता सूचिता । य**था** डॉ0 नेमिचन्द्रशास्त्रिमहोदयः, जी0आर0के0 इति नामधेयस्य विदुषो 'हिन्दू एस्ट्रोनोमी' इति ग्रन्थः पूर्वपक्षतया उद्धरति –

***भारते टॉलमीमहाशयस्य ज्योतिषसिद्धान्तस्तु अर्वाचीनकाले परिगृहीतः किन्तु प्राचीनयूनानराष्ट्रियाणां सिद्धान्तानां परम्परायाः निर्वहणं प्राचीनकालादेव क्रियते । भारतीयज्योतिषशास्त्रस्य मूलभूताः सिद्धान्तास्तु यवनानां सम्पर्कैरेव प्रस्फुटिताः***[118] ।

किं बहुना राशीनां नामान्यपि न सन्ति भारतीयानीति । इतिहासतत्त्ववेत्ता गुणाकरमूलेमहादयोऽपि एवमेव स्वीकरोति यद् राशीनां नामानि फलितज्योतिषशास्त्रं च भारते प्रायेण सिकन्दरस्याक्रमणकाला**त्** पश्चादपि शकानामाक्रमणकाले तैः वैदेशिकैः सह प्रसृतानीति। तेषां मतेन महाभारते राशीनामुल्लेखादयः निष्कर्षरूपेण कुत्रापि न प्राप्यन्ते। परमियं युक्तिः सम्यक्प्रकारेणानुशीलनेन खण्डिता जायते। यदि नाम महाभारते मेषादीनां राशीनां नामानि नैवोपलभ्यन्ते, तेन एतेषां विदेशादायात**त्वं** तु न सिद्ध्यति, महाभारतादपि प्राचीनतरे आदिकाव्ये वाल्मीकिरामायणे होरा–संहिता–शकुन–सामुद्रिक–स्वप्नविचारैः सह राशीनामप्युल्लेखात्। किंच अनेन फलितज्योतिषशास्त्रस्यापि प्राचीनता सिद्ध्यति। तस्मादत्र रामायणोक्तान् ज्योतिषशास्त्रीयविषयान् समाहृत्य एतेषां प्राचीनता प्रदर्श्यतेऽस्माभिः।

---

117 शोधच्छात्रः, ज्योतिषविभागः(सं0वि0धं0वि0संकायः)काशीहिन्दूविश्वविद्यालयः, वाराणसी।

118 **भारतीय ज्योतिष – ने.शा. –4.3.65**

वर्तमानरामायणे उत्तरकाण्डस्य अर्वाचीनता प्रक्षिप्तता च प्रतिपादिता याकोबीप्रभृतिर्बहुभिरैतिहासकैः अतस्तदंशं विहायैवात्र किंचिदुपस्थाप्यते।

महर्षिवाल्मीकिकृतं रामायणन्तु लक्षश्लोकात्मकात् महाभारतात् प्राचीनतरमित्यत्र प्रायेण सर्वे ऐतिहासिकाः ऐकमत्यमवलम्बन्ते । एतेषां मतानि निपुणं निरीक्ष्य आाचार्याः बलदेवोपाध्यायाः कथयन्ति यत्–वर्तमानं महाभारतं न केवलं रामाख्यानेन युक्तमपि तु वाल्मीकीयरामायणे महाभारतीयानां पात्राणामुल्लेखः क्वचिदपि न प्राप्यते,परं वनपर्वणि महाभारते रामोपाख्यानं वाल्मीकिप्रोक्तस्य रामाख्यानस्य संक्षिप्तसंस्करणमस्ति। रामचन्द्रेण सम्बद्धानि स्थानानि महाभारते तीर्थानि प्रतिपादितानि सन्ति। शृंड्गवेरपुरं, गोप्रतारंच वनपर्वणि तीर्थत्वेन प्रतिपादिते स्तः। एवं महाभारतस्य वर्तमानस्वरुपप्राप्तेः पूर्वं रामायणं प्राचीनग्रन्थरूपेण प्रमाणितमासीत्। महाभारतस्य वर्तमानं स्वरूपं खीस्ताब्दस्य आरम्भिकम्। अतः रामायणस्य रचना एतस्मात् पूर्वमवश्यमेव स्यात्। ''त एवाचार्याः रामायणस्य रचनाकालं प्रतिपादयन्तः कथयन्ति यत्–''एभिः प्रमाणैः सिद्ध्यति यद् रामायणस्य रचना बुद्धस्याविर्भावात्पूर्वमेवाभूत्[119]। अर्थाद् रामायणस्य खीस्ताब्दात् पंचशताब्दपूर्ववर्तित्वस्वीकरणं न्याय्यमिति। एतस्मिन् वाल्मीकीयरामायणे न केवलं द्वादशराशीनामुल्लेखः, अपितु जन्मलग्नं विनिश्चित्य भावानामपि गणनायाः सड्केतः प्राप्यते । ग्रहाणामुच्चैः नीचैश्च स्थानेषु अवस्थानमपि तत्र भणितम्। किंच नक्षत्रदेवताविचारः लग्ने ग्रहयोः युतिश्चेति तत्र स्पष्टं निरूपितम्। रामादीनां भ्रातृणां जन्मकालवर्णने–

**ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः। ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ।।**
**नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पंचसु । ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह।।**
**पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः। सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ।[120]**

रामचन्द्रस्य जन्मकालिकं लग्नं चन्द्रमसि स्थिते जन्मराशिः कर्क इति। अदितिदैवत्ये पुनर्वसुनक्षत्रे चतुर्थचरणे चन्द्रः कर्कराशौ भवतीति विचारोऽपि अत्र दृश्यते। एवं रामस्य राज्याभिषेकोपक्रमे अयोध्याकाण्डे दशरथोक्तिर्यथा–

**उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि। लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ।।**
**अभिषेकाय रामस्य द्विजेन्द्रैरूपकल्पितम्।[121]**

अत्र जन्मलग्ने गोचरे सति राज्याभिषेकमुहूर्त्तः शुभमिति प्रतिपादितम्। अथ च तत्रैवायोध्याकाण्डे जन्मनक्षत्रे अर्थाच्चन्द्रमसः राशौ सूर्यमड्गलराहुणां गोचरीभूता युतिः मृत्युयोगं सूचयतीति दशरथस्य मृत्युप्रसंगे उक्तं महर्षिणा अयोध्याकाण्डे तद्यथा –

**अवष्टब्धं च मे राम नक्षत्रं दारुणग्रहैः।आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः।।**

119 संस्कृतशास्त्रों का इतिहास – बलदेव उपाध्याय पृ–96 (चौ. सं. सी. वाराणसी –2002)
120 बालकाण्डम् , सर्गः 18,श्लोकसं0 –8,9,15,
121 अयोध्या0 सर्गः 15 श्लोकसं0– 3,4





**प्रायेण च निमित्तानामीदृशानां समुद्भवे। राजा हि मृत्युमाप्नोति घोरां चापदमृच्छति।।[122]**

अत्र रामलक्ष्मणौ सूर्यचन्द्राभ्यामुपमितौ , एतेन उभयोः नैसर्गिकमित्रता सूचिता। ग्रहेषु मन्त्रिणौ च क्रमेण बृहस्पतिशुक्राभ्यामुपमितौ। अनयोः परस्परं मित्रताऽभावेऽपि कार्यमेकमुद्दिश्य युतिस्संकेतिता। रामायणे ग्रहाणां मित्रताशत्रुताविचारश्च उपलभ्यते। रामलक्ष्मणयोः वनगमनप्रसंगे उपमया आदिकविनोक्तम्–

**ततः सुमन्त्रेण गुहेन चैव समीयतू राजसुतावरण्ये। दिवाकरश्चैव निशाकरश्च यथाम्बरे शुक्रबृहस्पतिभ्याम्।।[123]**

अथ च किष्किन्धाकाण्डे बुधमंगलयोः शत्रुतां निरुप्य तयोर्युद्धमुपमानत्वेन वर्णयति–

**ततः सुतुमलं युद्धं वालिसुग्रीवयोरभूत्। गगने ग्रहयोर्घोरं बुधाड्गारकयोरिव।।[124]**

बुधः चन्द्रमसः पुत्रः इति पुराणप्रमाणम्। रोहिणी च चन्द्रमसः प्रिया। तेन बुधः रोहिण्याः पुत्रः सन् कथञ्चिद् अगम्यगन्ता इव कल्पितः इति ज्योतिषशास्त्रे पुराणपरम्परायां च प्रसिद्धम्। एतत् वर्णितम्महर्षिणा सीताहरणप्रसंगे तदित्थम् –

**अभिगम्य सुदुष्टात्माा राक्षसः काममोहितः। जग्राह रावणः सीतां बुधः खे रोहिणीमिव।।[125]**

रोहिणीचन्द्रमसोः सम्बन्धन्तु सीतारामयोः प्रसंगे बहुधा वर्णयति वाल्मीकिः–

**यथा शची महाभागा शक्रं समुपतिष्ठति। अरुन्धती वसिष्ठंच रोहिणी शशिनं यथा।।[126]**

तथा च सीतां प्रति हनूमतः उक्तावपि–

**पृष्ठमारोह मे देवि मा विकाड्क्षस्व शोभने। योगमन्विच्छ रामेण शशाड्केनेव रोहिणी।।**
**कथयन्तीव शशिना सड्गमिष्यसि रोहिणी। [127]**

अनेकत्र सीतायाः उपमानत्वेन रोहिणी वर्णिता–

**किं नु चन्द्रमसा हीना पतिता विबुधालयात्। रोहिणी ज्योतिषां श्रेष्ठाधिसर्वगुणाधिका।।[128]**

अरण्यकाण्डेऽपि शूर्पणखा सीतां हन्तुं तां प्रतिधावति तत्र कवि उपमिमीते–

**इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा।अभ्यगच्छत्सुसंक्रुद्धा महोल्का रोहिणीमिव।।[129]**

रामायणे शुभाशुभमुहूर्तानामपि चर्चा प्राप्यते । यद्यपि मुहूर्त्तशब्दस्य प्रयोगः सामान्यतः अल्पकालाभिव्यंजकत्वेन कृतः,यथा–स मुहूर्त्तमिव ध्यात्वा,इत्यादिषु । किन्तु दिनमानस्य पंचदशविभागात्मकोऽपि मुहूर्तशब्दः बहुषु स्थलेषु

122 अयोध्या0 सर्गः 4,श्लोकः–18,19
123 अयोध्या0 सर्गः99,श्लोकः–41
124 किष्किन्धा0 सर्गः 12,श्लोकः–17
125 अरण्य0 सर्गः 49,श्लोकः–16
126 सुन्दर0 सर्गः 24,श्लोकः –10
127 सुन्दर0 सर्गः 37,श्लोकः –36
128 सुन्दर0 सर्गः 33,श्लोकः –7
129 अरण्य0 सर्गः 18,श्लोकः–17

प्रयुक्तः। मुहूर्तशब्देन ज्योतिषशास्त्रे दिनस्य रात्रेर्वा पंचदशो विभागो **रात्रेस्तथा तद्धि मुहूर्तमान**''मिति गृह्यते। एतेषां नामानि सन्ति यथा रामायणे –

**रुद्रःश्वेतश्च मैत्रश्च तथा गोरभवस्तथा। सावित्रो विजयश्चैव गन्धर्वः कुतपस्तथा।।**

**रौहिणोऽथ विरंचश्च सोमोऽथ निर्ऋतिस्तथा। माहेन्द्रो वरुणश्चैव भटः पंचदशः स्मृतः।।**

**अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा।।**[130]

एवं दिने तृतीयो मुहूर्तः मित्रदैवत्यः मैत्रः कथ्यते । नदीसंतरणप्रसंगे अस्य नामोल्लेखः महर्षिणा विशिष्टतया कृतः–

**स पुण्या ध्वजिनी गंगा दाशैः संतारिता स्वयम्। मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम्।।**[131]

अथ चान्वर्थके विन्दमुहूर्ते नष्टवस्तुनः पुनर्लाभं विचारयति महर्षिः–

**येनायाति मुहूर्तेन सीतामादाय रावणः। विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते।।**

**विन्दो नाम मुहूर्तोऽसौ न च काकुत्स्थ सोऽबुधत्। इषवद्वडिशं गृह्य क्षिप्रमेवविनश्यति।।**[132]

नूतनगृहे प्रवेशमुहूर्तं विचारयन् यद् ब्रूते श्रीपतिः–''शुभः प्रवेशो मृदुभिर्ध्रुवाख्यै'' रिति त**दे**व रामायणेऽपि पंचवटीवने रामादीनां गृहप्रवेशप्रसंगेऽप्युक्तम्। रामः लक्ष्मणं निर्दिशति यथा –

**ऐणेयं श्रपयस्वैतच्छालां यक्ष्यामहे वयम्। त्वर सौम्यमुहूर्तोऽयं ध्रुवश्च दिवसोह्ययम्।।**[133]

सीतारामयोः विवाहप्रसंगे शुभमुहूर्तं विचारयति–

**मघा ह्यद्य महाबाहो तृतीयदिवसे प्रभो। फल्गुन्यामुत्तरे राजॅस्तस्मिन् वैवाहिकं कुरु।।**

**रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदयम्।।**[134]

युद्धार्थं प्रस्थितानां राज्ञां कृते शुभमुहूर्तस्यावश्यकताऽपि प्रतिपादिता–

**एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम्। मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय।।**[135]

तत्रैव युद्धयात्रायां शुभमुहूर्तः एवमुक्तः–

**उत्तराफल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते। अभिप्रयाम सुग्रीव सर्वानीकसमावृताः।।**[136]

अशोकवाटिकायां दिने दिने क्षीयमाणां सीतां वर्णयन् अनध्यायमुहूर्तस्य संकेतं करोति महर्षिः। तद्यथा –

**सा प्रकृत्यैव तन्वंगी त्वद्वियोगाच्च कर्शिता।**

**प्रतिपत्पाठशीलस्य विद्येव तनुतां गता।।**[137]

---

130 अयोध्या0 सर्गः 89,श्लोकः–21
131 अयोध्या0सर्गः 89,श्लोकः–21
132 अयोध्या0 सर्गः 68,श्लोकः–12,13
133 अयोध्या0 सर्गः 56,श्लोकः–25,26/क
134 बाल0 सर्गः 71,श्लोक–24
135 युद्ध0 सर्गः 3,श्लोक–34
136 युद्ध0 सर्गः 4,श्लोक–5
137 सुन्दर 0 सर्गः 59,श्लोक–31



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

श्रीरामं प्रति हनुमतोऽस्या**मुक्तौ** प्रतिपत्तिथौ पाठे विद्या क्षीयते इति विमर्शं मत्वा अनध्यायः अधुनाऽपि प्रवतर्ते क्वचित्। वास्तुभूमेः चयनविमर्शे 'पूर्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः इति सिद्धान्तः वास्तुशास्त्रे प्रसिद्धः। तथा च ''**दक्षिणे पश्चिमे चैव नैर्ऋते वायुकोणके। एभिरुच्चैर्भवेत्स्थानो गजपृष्ठो विधीयते। गजपृष्ठे भवेद्वासः सलक्ष्मीधनवान्भवेत्। आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः**'' इति वास्तुशास्त्रीयो नयः।

रामायणेऽपि रामः तदेव कथयति–

**प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति।पश्चाच्चैवोन्नता सौम्य निवासेयं भविष्यति।।**[138]

रामायणे युद्धकाण्डे अष्टाविंशतितमे सर्गे श्लोकांक 33 तः 37 पर्यन्तम् रामानुगन्तॄणां सैन्यानां संख्यानिरूपणप्रसंगः शतेन गुणिताः सर्वाः संख्या अभिहिताः। एतासु अन्तिमा त्रयोविंशत्यङ्कात्मिका गृहीता। यद्यपि एताः केवलं सैन्यगणनायां प्रयुक्ताः सन्ति तथाप्यत्रोक्तानां वैज्ञानिकतां विपुलतां च गणितज्योतिषस्य शास्त्रीयतां साधयति। **तद**वलोकयितुं शक्यतेऽस्माभिः ।

शकुनशास्त्रीयविषयोऽपि रामायणे अतिशयेनोपलभ्यते। क्वचित्तु पृथक् सर्ग एव शकुनविमर्शमधिकृत्य महर्षिणा प्रणीतः। यथा अरण्यकाण्डस्य त्रयोविंशे सर्गेऽशुभानि,सुन्दरकाण्डस्य एकोनत्रिंशे सर्गे शुभानि शकुनानि विशदरूपेण वर्णितानि सन्ति। युद्धकाण्डस्य त्रयोविंशे सर्गे आरम्भात् एकादशश्लोकपर्यन्तम्, चतुर्थसर्गेऽष्टौ श्लोकाः पुनः तत्रैव एकचत्वारिंशे सर्गे एकादशश्लोकात् विंशश्लोकपर्यन्तमशुभानि शकुनानि कथितानि। ए**भी** रामायणस्य रचनाकाले शकुनविचारस्य बद्धमूलताऽपि सुतरामवगम्यते। अस्यावश्यफलदत्वमपि रामायणे स्पष्टमाकूतम्–

**निमित्तं लक्षणं स्वप्नं शकुनिस्वरदशर्नम्।**

**अवश्यं सुखदुःखेषु नराणां परिदृश्यते।।**[139]

शुभशकुनेषु दक्षिणभागे मृगगमनम्, वंचुलकपक्षिणो रवः, स्त्रीणां वामनयनस्फुरणम्, स्त्रीणांवामबाहुस्फुरणम्, स्त्रीणामूरुस्पन्दनम्, स्त्रीणां वस्त्रपरिभ्रंशनम्,इत्यादीनि उक्तानि सन्ति। तथा चाशुभेषु पक्षिणां घोररवः, पुरुषस्य बाहुकम्पनम्, गृध्रानां रवः, स्वर्णवृक्षदर्शनम्, कलुषितवायुवेगः,पर्वतशिखरकम्पः, वृक्षपतनम्, रक्तवर्णा वृष्टिः, अतिशयेनरक्तिममण्डिता सन्ध्या, सूर्यमण्डलादग्निवृष्टिः, मृगपक्षिणामार्तस्वरः, सूर्योन्मुखानां मृगपक्षिणां रवः, चन्द्रमसो म्लानता, सूर्ये नीलं चिह्नम्, काकश्येनगृध्राणां नीचैः पतनम्, शिवायाः रोदनम् इत्यादीन्युक्तानि सन्ति। रामायणे शकुनमित्यर्थे सर्वत्र निमित्तमिति शब्दः प्राप्यते, यथा ''निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च'' शुभां निमित्तानि शुभानि भेजिरे। एतदतिरिक्तमेकस्मिन् स्थले प्रागुक्ते शकुने पक्षिणां स्वरेण शुभाशुभपरिज्ञानमुक्तम्। एवं प्रतीयते **यद्** रामायणकाले निमित्तशास्त्रं शकुनिस्वर–दर्शनशास्त्रं च पृथ**ग्** आस्ताम्। पश्चाच्चोभयोः कृते शकुनमित्युपलक्षणपरं पदं प्रयुक्तम्। यच्च शास्त्रं ज्योतिषि पंचस्कन्धात्मके परिगृहीतम्। अरण्यकाण्डस्य पूर्वोक्त एव श्लोके लक्षणमिति पदमुक्तम्। प्रतीयते यदिदं पदं सामुद्रिकशास्त्रं संकेतयति। शरीरावयवानां दर्शनेन

---

138 किष्किन्धा 0 सर्गः 27,श्लोक–12
139 अरण्य0 सर्गः 52,श्लोकः–2

शुभाशुभज्ञानात्मकं शास्त्रमिदं प्राचीनैरर्वाचीनैश्च तत्त्वविद्भिः निपुणं परीक्षितम्। हस्तरेखाविचारोऽपि अस्यैव व्याप्यभूतः। रामायणे कतिपयेषु स्थलेषु अस्य लक्षणशास्त्रस्य उल्लेखोऽस्ति।

बालकाण्डस्य मूलरामायणाख्ये प्रथमसर्गे रामचन्द्रवर्णने पुरुषस्य शुभलक्षणान्युक्तानि–

**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः।।**

**महोरस्को महेष्वासो गूढजत्रुररिन्दमः।[140] आजानुबाहुः सुशिराः सुललाटः सुविक्रमः।।**

**समः समविभक्तांगः स्निग्धवर्णःप्रतापवान्। पीनवक्षा विशालाक्षो लक्ष्मीवांछुभलक्षणः।।[141]**

एवं च रक्षसामपि रूपवर्णने समापतिता विचित्रता लक्षणशास्त्रदिशा विवेचनीया अनुसन्धेया च प्रतीयते। रामायणे महोत्पातवर्णनमपि अनल्पमुपस्थापितम्। रोहिण्यामुल्काप्रहारः, सनिर्घातदिवोल्कापातः, वज्रपातः, दिग्दाह इत्यादयो महोत्पाताश्च अशुभनिमित्ततया वर्णिताः, यथा खररामयोः युद्धकाले–

**जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः। प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः।।**

**उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः।।[142]**

आकाशे ग्रहनक्षात्राणां निर्दीप्त्या दीप्त्या च शुभाशुभज्ञानस्य एका विचारणा रामायणे दृश्यते। युद्धकाण्डस्य चतुर्थसर्गे निर्ऋतदैवत्यं पूर्वाषाढनक्षत्रं म्लानं वीक्ष्य राक्षसानां विनाशमथ च पैतामहं रोहिणीनक्षत्रं, त्रिशंकु**म्,** सप्तर्षिमण्डलं,सूर्यदैवत्यं ज्येष्ठानक्षत्रं च प्रदीप्तानि वीक्ष्य रामानुगमनकर्तृणामभ्युदयो निरूपितः। तत्र अष्टौ श्लोकाः ज्योतिः शास्त्रपरकाः गूढमनुसन्धेयाः एवमेव युद्धकाण्डस्य त्र्युत्तरशततमे सर्गे रामरावणयोः प्रत्यक्षयुद्धे रूपकालंकारमुखेन ग्रहेषु परस्परप्रहार–वर्णनं कृतम्, तदपि सिद्धान्तज्योतिश्शास्त्रदृष्ट्या सम्यगनुसन्धेयम्।

पंचस्कन्धात्मकाज्ज्योतिषो बर्हिभूतोऽपि स्वप्नविचारः अदृष्टफलाफलज्ञानोपकारकत्वात् रामायणे निमित्तादिषु चतुर्षु स्वप्नस्यापि उल्लेखत्वात् अत्रास्यापि विवेचनं क्रियते। अयं विमर्शः रामायणे विशदं प्राप्यते। अयोध्याकाण्डस्य ऊनसप्ततितमे सर्गे भरतेन वर्णितं दुःस्वप्नं महत्त्वपूर्णमस्ति। तत्र स कथयति यत् मलिनं रक्तकेशिनं पर्वताग्रात् पतन्तं गोमये ह्रदे प्लवमानं तैलमंजलिना पिबन्तं तिलौदनं भुंजानं, मुहुर्मुहुर्हसन्तं तैलाभ्यक्ताड्गं,तैलेऽवगाहमानं पितरं स्वप्नेऽहमद्राक्षम्। तथा च शुष्कं सागरं, भुवि निपतितं चन्द्रमसं, जगतीं तमसोपनद्धां,वाह्यस्य गजस्य शकलीभूतं विषाणं,दिग्दाहं,विदीर्णां पृथ्वीं, शुष्कान् द्रुमान् विध्वस्तान् पर्वतॉश्च अहमद्राक्षसम्। स्वप्ने मया कृष्णलौहमये पीठे कृष्णवासा राजा कृष्णपिड्गलाभिः स्त्रीभिः, सन्ताडितो दृष्टः। स्वप्ने रक्तमाल्यानुलेपनो धर्मात्मा त्वरमाणो दृष्टः। सः गदर्भयुक्तेन रथेन दक्षिणां दिशमगच्छत्। राजानं तु काचित् रक्तवा **सा** विकृताSSनना राक्षसी प्रकर्षन्ती दृष्टा।

तथा चोपसंहारे –

**एवमेतन्मया दृष्टमिमां रात्रिं भयावहम्। [143] अहं रामोऽथवा राजा लक्ष्मणो वा मरिष्यति।।**

**नरो यानेन यः स्वप्ने खरयुक्तेन याति हि। अचिरात्तस्य धूम्राग्रं चितायां संप्रदृश्यते।।**

---

[140] बाल0 सर्गः 1,श्लोक–9

[141] बाल0 सर्गः 1,श्लोक 10–11

[142] अरण्य0 सर्गः 23,श्लोक–12,13

[143] अयोध्या0 सर्गः 69,श्लोकः 17–19





महाभारते ज्योतिषविषयिणी चर्चा प्राचुर्येण दृष्टिपथमुपैति। युद्धकाले विभिन्नग्रहाणां स्थितिवर्णने ग्रहगतिज्ञानं तत्कालीना गतिश्च सिद्ध्यति। तत्र ग्रहगतौ मार्गीगतिवर्णनं वक्रीगतिवर्णनं च ग्रहाणां गतौ सूक्ष्मज्ञानं निर्दिशति ते ग्रहास्तु सूर्यादयः निर्दिष्टाः सन्ति। ग्रहणसंकेतोऽपि महाभारतेऽस्ति तत्राशुभकरत्वे तस्य ग्रहणमस्ति। यद्यपि महाभारते द्वादशराशीनां,सप्तदिनानां नामग्रहपूर्वकचर्चायाः सत्त्वात् रामायणस्य च वेदांगोत्तरमहाभारतकालेऽप्यस्य कृत्स्नविषयस्य सम्यग्ज्ञानमासीदिति वक्तुं शक्यते।

**सन्दर्भग्रन्थाः –**


1. भारतीय ज्योतिष – नेमिचन्दशास्त्रिकृत (चौ. सं. सी. वाराणसी –2005)
2. भारतीय ज्योतिष – शिवनाथ झारखण्डी (चौ. सं. सी. वाराणसी –1999)
3. संस्कृतशास्त्रों का इतिहास – बलदेव उपाध्याय पृ–96 (चौ. सं. सी. वाराणसी–2002 )
4. वाल्मीकीयरामायाणम् – गीताप्रेस गोरखपुर –2004, 1998 च ।
5. वाल्मीकीयरामायाणम् – (चौ. सं. सी. वाराणसी–1996,2002 )।
6. मुहूर्तचिन्तामणिः –आचार्य रामदैवज्ञः – पं0 केदारदत्तजोशीसम्पादितः – पीयूषधाराभाष्युतः (मोतीलाल बनासरीदास –2004 पुनर्मुद्रित)
7. मयमतम् भाग–1,2 – दानवराजमयकृतम् – डॉ0 शैलजा पाण्डेय (चौ. सु. प्रकाशन –2007)


************************

 ISSN 976-8645

# भारतीयसंविधानानुसारेण द्यूतसमाह्वयविवेचनम्

**प्रतीकदत्तः**[144]

स्मृतिग्रन्थानां प्रणयनस्य मुख्योद्देश्यं भवति लोककल्याणसाधनम् । समाजे व्यवहारो यथा सुष्ठु स्यादिति धिया सदाचारप्रवर्तनाय तथा लोककल्याणाय[145] च स्मृतिग्रन्थानां प्रणयनं जातम् । स्मृतयः किल हिन्दुधर्मस्य चरमोन्नतेः परिचायिकाः सन्ति । श्रुतिः स्मृतिश्चेति शब्दद्वयी व्यापकार्थस्य पर्यायवाचिनी । श्रुतिशब्दाद् यथा वेद-ब्राह्मणारण्यकोपनिषद्ग्रन्थानां बोधो भवति ; तथैव स्मृतिशब्देऽपि षड्वेदाङ्ग-धर्मशास्त्रेतिहास-पुराणार्थशास्त्र-नीतिशास्त्राणां च समावेशो भवति । अयमेवार्थो व्यापकः स्मृति शब्दे निविष्टः।

यथोक्तम् –**यज्ञकर्मक्रियावेदः स्मृतिर्वेदा गृहाश्रमे ।**

**स्मृतिर्वेदः क्रियावेदः पुराणेषु प्रतिष्ठितः ॥**[146]

अन्यच्च – **यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ ।**[147] एवं स्मृतयो वेदेष्वदृष्टं विषयं निर्णयन्तीति ।

यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ । एवं स्मृतयो वेदेष्वदृष्टं विषयं निर्णयन्ति । 'श्रुति-स्मृती तु नेत्रे द्वे ', 'श्रुतिस्मृत्युदितो धर्मः पुराणे परिगीयते '। विशेषेण स्मृतिशब्दः धर्मशास्त्रस्य पर्यायवाची स्वीकृतः । धर्मशास्त्रस्य व्यापकेऽर्थे राजप्रजयोरधिकारः, कर्तव्यं सामाजिकाचार-विचार-व्यवस्था-वर्णाश्रमधर्म-नीति-सदाचार-शासनसम्बन्धिनां नियमानां व्यवस्थाश्चान्तर्भवन्ति ।[148] "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः" इति कथनादेव ज्ञायते यद् धर्मशास्त्राणां व्याख्यायिकाः स्मृतय इति। तेन वेदोक्तधर्माचारव्यवहाराख्यायिका एव स्मृतयः ।

सूत्रस्मृत्योरेकायनं धर्मशास्त्रम् । अपरञ्च स्मृतयो हि धर्मसूत्रव्याख्यात्र्यः । न केवलं ता एवापितु पुराणान्यपि वांशतो धर्मशास्त्रव्यपदेश्यान्येव ।

यथैव प्रतिहिंसिता धर्मसूत्राणामवस्थितिस्तथैव स्मृतीनामपि कल्प्यते । तेन स्मृतयोऽप्यनन्ता एव । तथापि प्राधान्येन अष्टादशस्मृतयस्तत्रोल्लिख्यन्ते । अन्ये तु सम्प्रति नामतः श्रूयन्ते किञ्चिदेव स्वरूपतो दृश्यन्ते च । ताश्च स्मृतयः पञ्चविधाः

[144] Research Associate , Shankar Shikshayatan , New Delhi-110057

[145] यच्छास्त्रं परमोत्कृष्टं सर्वसंग्राह्यमित्यभूत् ।

सर्वलोकहितं तस्मात् सर्वशास्त्रैकसंमतम् ॥ - लौगाक्षिस्मृतिः ।१.५

[146] शोधप्रभा, (राष्ट्रीयचेतनाविशेषाङ्कः)

[147] तदेव

[148] तदेव



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

दृष्टार्थादृष्टार्था दृष्टादृष्टार्थान्यायमूला शिष्टदृष्टाभेदात् । तासु दृष्टार्थाऽशास्त्रसम्बद्धा शेषाश्च वेदविहितकर्मप्रतिपादकाः ।[149] स्मृतिप्रणेतारो यथा कथिताः -

**मन्वत्रिविष्णुहारीतयाज्ञवल्क्यक्योशनोऽङ्गिराः । यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥**

**पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ॥**[150]

अपि चोच्यते – **अष्टादशपुराणेषु यानि वाक्यानि भारत ।**

**तान्यालोच्य महावाहो तथा स्मृत्यन्तरेषु च ॥**

**मन्वादिस्मृतयो याश्च षट् त्रिंशत्परिकीर्तिताः ॥**[151] इति ।

स्मृतीनां श्रुतिमूलत्व एव प्रामाण्यं न तु श्रुतिवत् स्वतः प्रामाण्यम् । श्रुत्या सह विरोधे तु साऽनपेक्ष्या भवति। तुल्यबलविरोधे श्रुतिरेव गरीयसी, श्रुतिस्मृत्योर्विरोधे श्रुतिमूलकायाः गरीयस्त्वं श्रुतिमूलकयोर्विरोधे विकल्प इति नियमेन धर्मे स्मृतेः प्रामाण्यम् । स्मृतिनां रचनाकालस्तु प्रतिस्मृति भिद्यत एव । तत्रापि पण्डितानां नैकमत्यम् । सामान्यतो विक्रमपूर्वसप्तमशतकादारभ्य विक्रमानन्तरषष्ठशतकपर्यन्तं स्मृतिकाल इति पण्डिताः समामनन्ति ।

वस्तुतः संस्कृतवाङ्मये स्मृतिग्रन्थानां संख्या बहवः सन्ति । स्मृतिग्रन्थानां यानि विधानानि, नियमा ये च सन्ति ते साम्प्रतमपि विधिग्रन्थेषु न्यायालयेषु समाहिताः सन्ति । अत्रोल्लेखनीयमस्ति यद् द्यूतसमाह्वयविषये मनु-याज्ञवल्क्ययोर्नैकमत्यं परिलक्ष्यते । मनु द्यूतक्रीडायाः भर्त्सनां करोति । किञ्च याज्ञवल्क्यः कथयति यदि राजाऽस्य नियन्त्रणं सम्यग् रूपेण विदधाति तर्हि राज्यस्य लाभो भवति द्यूतक्रीडया, न तु हानिरिति ।

- अथ द्यूतसमाह्वयप्रकरणम्

अस्मिंल्लेखे स्मृतिग्रन्थेषु द्यूतसमाह्वयमिति प्रकरणस्योपरि विस्तरेण चर्चा क्रियते । याज्ञवल्क्यस्मृतौ तावद् व्यावहाराध्यायस्य सप्तदशप्रकरणे द्यूतसमाह्वयाख्यं प्रकरणं प्रारभ्यते । द्यूतं च समाह्वयश्च द्यूतसमाह्वयम् इति समासः । मनुनाऽप्युच्यते - **लोके यदप्राणिभिर्क्रियते तद्द्यूतमुच्यते ; तथा प्राणिभिर्यत् क्रियमाणस्तावत् समाह्वय इति ज्ञेयः**[152] ।

तथा हि मिताक्षराकारो विज्ञानेश्वरः टीकायाः प्रारम्भ एव कथयति – " अधुना द्यूतसमाह्वयाख्यं विवादपदमधिक्रियते " इति। नारदस्मृत्यनुसारमपि - अक्षाः पाशकाः, वध्रश्चर्मपट्टिकाः, शलाका दन्तादिमय्यो दीर्घचतुरस्राः, 'आद्यग्रहणाच्च

[149] आचार्यलोकमणिदाहालः, 'संस्कृतसाहित्यस्येतिहासः' , पृ ६७

[150] तदेव

[151] तदेव

[152] अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।

प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वयः ॥ ९.२२३

ISSN 976-8645

तुरङ्गादिक्रीडासाधनं करितुरङ्गरथादिकमित्येतैरप्राणिभिर्यद्देवनं क्रीडा पणपूर्विका क्रियते , तथा वयोभिः पक्षिभिः कुक्कुटपारावतादिभिः 'च' शब्दान्मल्लमेषमहिषादिभिश्च प्राणिभिर्या पणपूर्विका क्रीडा क्रियते , तदुभयं यथाक्रमेण द्यूतसमाह्वयाख्यं विवादपदमिति कथ्यते ।

- अथेदानीं द्यूतसमाधिकारिणो वृत्तिमाह –

**ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।**

**गृह्णीयाद्धूर्तकितवादितराद्दशकं शतम् ॥**[153] इति ।

ग्लहो नाम पण इत्युच्यते । व्याख्यायामुच्यते तावत्परस्परं संप्रतिपत्त्या कितवपरिकल्पितः पणो ग्लह इत्युच्यते ।

श्लोकस्यास्यार्थो भवति यद् ग्लहे सभिकः शतिकवृद्धेरर्थात् तदाश्रया शतिका शतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः, तस्माद् धूर्तकितवात्पञ्चकं शतमात्मवृत्त्यर्थं गृह्णीयात् । जितग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः । किञ्च इतरस्मात्पुनरपि पूर्णशतिकवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादिति ।

धर्मशास्त्रे तावत् सभिक इति पदस्यार्थो भवति कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरिति । मिताक्षराकारेण तथा हि भणितं – सभाकितवनिवासार्था यस्यास्त्यसौ सभिकः इति ।

इदानीं सभिकस्य कर्तव्याकर्तव्यता विषय आलोच्यते । नारदस्मृतौ तावद् विषयेऽस्मिन् उच्यते यत् सभिकः द्यूतं कारयेत् तथा जितमुद्धृत्य जयिने दद्यात् इति[154] । याज्ञवल्क्यस्मृता अपि प्रसङ्गेऽस्मिन् विस्तरेण चर्चा क्रियते। तथा हि –

**स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।**

**जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यं वचः क्षमी ॥**[155] इति ।

व्याख्याकारो विज्ञानेश्वरः कथयति " सः सभिकः क्लृप्तवृत्तिस्तथा द्यूताधिकारी भवति । अतः सः क्लृप्तवृत्तिर्द्यूताधिकारी सभिकः धूर्तकितवोभ्यो रक्षितस्तस्मै राज्ञे यथा संप्रतिपन्नमंशं दद्यात् । एवञ्च जितं यद्द्रव्यं तदुद्ग्राहयेत् । अर्थाद् बन्धकग्रहणेनासेधादिनां च पराजितसकाशादुद्धरेदिति । पुनः तद्धनमुद्धृत्य जेत्र अर्थाज्जयिने दद्यात् ।"

अत्र पुनर्विधानं भवति यत् सभिको यदा पुनर्दापयितुं न शक्नोति तदा राजा जितं पणं दापयेदिति । प्रसङ्गेऽस्मिन् याज्ञवल्क्यस्मृतौ तावदुच्यते - अप्रच्छन्ने राजाध्यक्षसमन्विते सभिकसहिते कितवसमाजे सभिकेन च राजभागे दत्ते राजा धूर्तकितवमविप्रतिपन्नं जितं पणं दापयेत् ।

तथा हि – **प्राप्ते नृपतिना भागे प्रसिद्धे धूर्तमण्डले ।**

**जितं ससभिके स्थाने दापयेदन्यथा न तु ॥**[156] इति ।

---

[153] याज्ञवल्क्यस्मृतिः , १७.१९९

[154] ना. स्मृ १६।२

[155] या.स्मृ १७।२००



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV
ISSN 976-8645

अन्यथा प्रच्छन्ने सभिकरहिते अदत्तराजभागे द्यूते जितपणं जेत्रे न दापयेत् ।

अस्माभिर्विदितमिदं वृत्तं यत् क्रीडायां जयपराजयो निश्चितम् । किञ्च ग्लहे तावज्जयपराजयविप्रतिपत्तौ निर्णयस्योपायः किमित्याह –

**द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि ।**

**राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः ॥**[157] इति ।

अत्र के तावद्द्रष्टार इति विषये उच्यते यत् सभ्याः कितवा वा द्यूतव्यवहाराणां द्रष्टार इत्युच्यन्ते । ते सभ्याः द्रष्टारो वा राज्ञैव नियोक्तव्याः । अस्मिन्प्रसङ्गे मिताक्षराकारः स्वकीयं मतमुपस्थापयति यत् – " न तत्र 'श्रुत्याध्यायनसम्पन्ना' इत्यादिर्नियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकारा एव कार्याः; न तत्र 'स्त्रीबालवृद्धकितव-' (व्य. ७०) इत्यादिनिषेधोऽस्ति ।[158]

इतोऽप्युच्यते यद् राजा स्वराष्ट्रात् कूटान्निर्वासयेत् । अर्थात् कूटैरक्षादिभिरुपाधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत् ।

तथा हि नारदोऽस्मिन् विषये स्वकीये ग्रन्थे आह –

**कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत् ।**

**कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतिः ॥**[159] इति ।

मनुः कथयति यद् द्यूतसमाह्वयौ वक्ष्यमाणलक्षणौ राजा स्वराष्ट्रान्निवर्तयेत् । यस्मादेतौ द्वौ दोषौ राज्ञां राज्यविनाशकारिणौ इति । अत एव उच्यते नवमाध्याये --

**द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत् ।**

**राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥**[160] इति ।

अतो यो यत्नशीलः प्रजाकल्याणकरो राजा भवति, सः प्रकटमेतच्चौर्यं यद् द्यूतसमाह्वययो रूपम्, ताभ्यान्निवारणे नित्यं यत्नशीलो भवति ।[161] किञ्च मनुस्तेषां कृते दण्डस्य विधानमपि करोति । यः द्यूतं समाह्वयञ्च कुर्यात् कारयेद् वा राजा तान् सर्वान्

---

[156] या. स्मृ १७।२०१

[157] या. स्मृ १७।२०२

[158] मिताक्षराव्याख्या । श्लो. २०१

[159] ना.स्मृ १६।६

[160] मनु. स्मृ ९।२२१

[161] तदेव ९।२२२

यज्ञोपवतादिद्विजचिह्नधारिणः शूद्रान्हन्यात् । तथा ह्युच्यते -**द्यूतं समाह्वयं चैव यः कुर्यात् कारयेत वा । तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥**[162] इति ।

कांश्च राजा निर्वासयेदिति विधानमपि क्रियते । तत्रोच्यते यत् –

**कितवान्कुशीलवान्क्रूरान्पाषण्डस्थांश्च मानवान् ।**

**विकर्मस्थान्शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥**[163] इति ।

उपर्य्युक्ता एते कितवादयो जना गूढचौरा वा राष्ट्रे वसन्तो नित्यं वञ्चनात्मिकया क्रियया सज्जनान्पीडयन्ति ।[164] तस्य नये त्वेते धूर्तकितवास्तु प्रच्छन्नतस्करा भवन्ति ।

अपि च याज्ञवल्क्यस्मृतावुच्यते यद् राज्ञा तस्करज्ञानकारणाद् राज्याध्यक्षाधिष्ठितं कारयितव्यमिति । तथा ह्युच्यते –

**द्यूतमेकमुखं कार्यं तस्करज्ञानकारणात् ।**

**एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये ॥**[165] इति ।

तदनन्तरं समाह्वयसंज्ञकं किमिति विषये कथितं यत् – "ग्लहे शतिकवृद्धेः" (व्य. ११९) इत्यादिना यो द्यूतधर्म उक्तः, स एव प्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्यं समाह्वयसंज्ञके ज्ञातव्य इति ।

- **भारतीयसंविधानानुसारेण द्यूतविवेचनम्**

मनुस्मृतौ तु स्पष्टमुल्लिख्यते यन्नेदानीमेव परन्तु पूर्वस्मिन्नपि कल्पे द्यूतमेतदतिशयेन वैरकरं दृष्टमिति । अतः कश्चिदपि प्राज्ञः परिहासार्थमपि तन्न सेवेत ।[166] आधुनिककाले भारतीयसंविधानेऽपि द्यूतक्रीडाया निन्दनं तथा निषेधः क्रियते । तत्रादौ अष्टादशोत्तर-सप्तषष्टितमे ख्रीष्टाब्दे (1867) ब्रिटिशसर्वकारेण भारतदेशाद् द्यूतक्रीडाया निषेधोपायः परिकल्पितः । अतस्तदानीमेव सर्वकारस्य संविधानानुसारेण राष्ट्राद्द्यूतक्रीडाया निन्दनं तथाऽपरोधः सञ्जातः। तत्र स्पष्टमुद्घोषितमासीद् यत् कश्चिज्जनो द्यूतक्रीडालये गच्छति तथा क्रीडायां प्रतिस्पर्धिरूपेण भागग्रहणं करोति चेत्तस्य कृते द्विशतरूप्यकाणां धनदण्डोऽथवा तस्य जनस्य मासत्रयं यावत् कारागारवासदण्डो भविष्यतीति ।

---

162 तदेव ९।२२४

163 तदेव ९। २२५

164 एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः ।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः जनः ॥ म. स्मृ ९। २२६

165 या.स्मृ व्यवहाराध्यायः - २०३

166 द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत् ।
तस्माद् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ म. स्मृ ९।२२९



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

वर्तमानकालेऽन्तर्जालमाध्यमेन द्यूतक्रीडाया प्रचलनमस्ति । यत्त्वाङ्गलभाषायां online gambling इत्युच्यते । भारतसर्वकारेण द्विसहस्रतमे ख्रीष्टाब्दे (2000) The Indian Information Technology Act इति नामकस्याधिनियमस्य प्रवर्तनं विहितम् । अत्र चोल्लिखितमस्ति यत्कोऽपि जनो यद्यन्तर्जालमाध्यमेनाथवा प्राद्यौगिकेनोपायेन द्यूतक्रीडायां भागग्रहणं करोति तर्हि तस्य कृते लक्षाधिकरूप्यकाणां धनदण्डो भविष्यति तथा न्यूतातिन्यूनं पञ्चवर्षेभ्यः यावत्तस्य कारादण्डो विधास्यत इति । भारतवर्षस्य प्रतिशतं चत्वारिंशज्जना अन्तर्जालमाध्यमेन द्यूतक्रीडायां भागग्रहणं कुर्वन्तीति विज्ञप्तिस्सर्वकारेण प्रसारिता । बल्लकन्दुकक्रीडायां (cricket), साप्ते (horse race), तथा धनभाग्ययोगक्रीडायां (lottery) बहवो हि धनविनियोगं कुर्वन्ति द्यूतक्रीडायां भागग्रहणार्थम् ।

प्रसङ्गत उल्लिख्यते यन्मनुस्मृतौ यथा राष्ट्रे द्यूतक्रीडाया सर्वथा निषेधः क्रियते तथा याज्ञवल्क्यस्मृतौ नोच्यते । याज्ञवल्क्यस्य नये राज्ञो निर्देशानुसारं हि राष्ट्रे द्यूतक्रीडा समायोजिता भवति चेत् तद्दोषाय कल्पते । एवं भारतसर्वकारेणापि lottery regulation act इति नियमनस्य प्रर्वर्तनं विहितमस्ति यत्र धनभाग्ययोगपरीक्षाया (lottery) इत्यस्य परिचालने राज्यसर्वकारस्य कर्तृत्वमारोप्यते । राज्यसर्वकारस्य परिचालने हि राज्ये द्यूतक्रीडा नियमसिद्धा भवति ।

यथा एकोनविंशत्यधिक-षड्सप्ततितमे ख्रीष्टाब्दे (1976) Goa, Daman and Diu Public Gambling Act प्रवर्तितमस्ति। अस्य नियमानुसारं भारतवर्षस्य बहुषु क्षेत्रेषु यथा गोवा-दमन-दीव इत्यादिषु राज्येषु धनभाग्ययोगपरीक्षायाः सर्वथा भव्यायोजनं नियमसिद्धं भवति ।

- **उपसंहारः**

एवं प्रस्तुतलेख आदौ स्मृतीनां विषये विशदेन चर्चा पुरस्कृता । तदनन्तरं स्मृतिग्रन्थेषु द्यूतसमाह्वयमिति विषये च विस्तरेणोपस्थापनं विहितम् । अत्र मुख्यतो द्यूतसमाह्वयविषये याज्ञवल्क्यस्मृतौ मनुस्मृतौ च किमुच्यत इत्यस्मिन् विषये आलोचनं विहितम् । तत्र च मिताक्षरेति व्याख्याया उद्धरणमप्युल्लिखितम् ।लेखस्यान्तिमे भागे च भारतसंविधानानुसारेण द्यूतसमाह्वयस्य विवेचनमपि विहितमिति । इति शम् ।

- **सन्दर्भग्रन्थाः**


Primary Sources

1. Yajnavalkya, Yajnavalkyasmriti, ed. Dr.Gangasagar Rai, Choukhamba Sanskrit Pratisthan
2. Manu, Manusmriti, ed. Dr R. N. Sharma, Choukhamba Sanskrit Pratisthan, Delhi- 110007
3. _________ , Manusmriti, ed. Pandit Rameshwar Bhatt, Rashtriya Sanskrit Sansthan, New Delhi-110058

Secondary Sources:

4. Dahal, Acharya Lokmani, SamskritaSahityasyetihasah, Choukhamba Krishnadas Academy, Varanasi, 2005
5. Mishra, Ramchandra, Samskrita Sahityasyetihasah, Choukhamba Vidyabhavan, Varanasi
6. Sharma, Chandrdhar, Bharatiya Darshan, Motilal Benarasidas, Delhi, 2007
7. Sharma, Rajendra Nath, Ancient India According to Manu, Nag Publishers, Delhi- 7

Journals

1. Saraswati Susama, Sampurnanand Sanskrit University, Varanasi
2. Sodhapradha, LBSRSVP, New Delhi

# स्वप्नवासवदत्तदृशा समाजोत्कर्षे वासवदत्तापद्मावत्योः भूमिका

हीरालालदाशः[167]

संस्कृतनाट्यजगति यद्यपि सन्त्यनेके नाट्यकारास्तथापि लब्धप्रतिष्ठितेषु विविधनाट्यकारेषु प्रथमनाट्यकाररूपेण भृशं स्मरन्ति नाट्यपिपासकाः सहृदयाः महाकविं भासम् । तस्य महाकवेः भासस्य नवनवोन्मेषशालिनी या प्रतिभा नाट्यकला च त्रयोदशरूपकेषु परिलक्ष्यते न तथाऽन्यत्र नाटकेषु । महाकविना तेन नाटकीयपात्राणां निष्पक्षरूपेण मानवीयसंस्कृतेः आनुकूल्येन चित्रितम् । नाटकस्य लोके प्रयोजनविषये उक्तं हि भरतमुनिना नाट्यशास्त्रे प्रथमोऽध्याये-

**दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।**

**विश्रान्तिजननं काले नाट्यमेतद्भविष्यति ।।** 1

**धर्म्यं यशस्यमानुष्यं हितं बुद्धिविवर्धनम् ।**

**लोकोपदेशजननं नाट्यमेतद्भविष्यति ।।** 2

चन्द्रालोककारेण जयदेवेनापि भासस्य नाटकचक्रस्योपरि प्रभावितोऽभूत् । तेन कविताकामिन्याः हासरूपेण भासस्य निर्देशः कृतः । उक्तं हि प्रसन्नराघवनाटके-

**भासो हासः कविकुलगुरुः कालिदासो विलासः ।।** 3

**भासनाटकचक्रम्**

महाकविना भासेन रामायणं महाभारतं तथा बृहत्कथाधारेण च उपजीव्यत्वेन स्वीकृत्य आहत्य त्रयोदशरूपकाणि लिखितानि । तदत्र नाममात्रं निर्दिश्यते।

1. रामायणमाधारेण प्रतिमानाटकम् -
2. महाभारतमाधारेण – मध्यमव्यायोगः , कर्णभारः,दूतघटोत्कचम् , पञ्चरात्रम् ,उरुभङ्गम् दूतवाक्यम् ,
3. बृहत्कथाधारेण – प्रतिज्ञायोगन्धरायणम् स्वप्नवासवदत्तम् , अविमारकम्,
4. हरिवंशमाधारेण – बालचरितम्
5. लोकप्रचलितकथाधारेण – चारुदत्तम्

भासेन विरचितं यज्ञफलमपि एकं नाटकमिति केचन अङ्गीकुर्वन्ति । एतेषु रूपकेषु कानिचन नाटकानि प्रकरणानि भाणः व्यायोगादयश्च भवन्ति ।

**नारीणाम् आदर्शरूपता**

[167] सहायकाचार्यःतविभागःसंस्कृ , श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः , एनात्तूर् काञ्चीपुरम् , ६३१५६१





आधुनिकसमाजे नारीणां स्थानं न्यूनरूपेण यद्यप्यस्ति तथापि प्राचीनकाले सर्वे तां पूजयन्ति स्म । अर्थात् नारीणां विशिष्टं स्थानं वर्तते स्म । उक्तं हि मनुना

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।** 4

भगिनीरूपा च भवतीति निःसन्,देवीरूपा,मातृरूपा ,वैदिककाले नारीणां गौरवमयस्थानमासीत् । सा नारी स्त्रीरूपादेहं वक्तुं शक्यते । मनसाकरोति सा कर्मणा च सा नारी संयता स्यात् । या स्त्री स्वपत्युः विरोधेन किमपि असदाचरणं न,वाचा, तथा सज्जनाः तां पतिव्रतानारीरूपेण आमनन्ति । उक्तं यथा , पतिलोकं प्राप्नोति

**पतिं या नाभिचरति मनोवाग्देहसंयता ।**

**सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ।।** 5

**शोधपत्रस्योद्देश्यम्**

गदानं वर्तते । यदि नारी इच्छति तर्हि सा एकस्य परिवारस्य यदि सूक्ष्मं विचारयामस्तर्हि समाजोत्कर्षे नारीणां विशिष्टं यो समाजस्य वा समुचितविकासाय किमपि कर्तुं शक्नोति । परिवारस्य समाजस्य कृते हानिमपि परिकल्पयितुं शक्नोति । प्राचीनाः महाकवयः भासकालिदासादयः स्वविरचितनाटकेषु समाजोत्कर्षे नारीणां कीदृशी भूमिका भवेदिति विषयं सुचर्चिताः । कृष्णद्वैपायनं व्यासोपि महाभारते गान्धारीसुभद्रादीन् आदर्शनारीरूपेण चित्रितवान् । शाकुन्तले कण्वमुखेन ,कुन्ती,द्रौपदी, कालिदासेन समाजोत्कर्षो नारीणां भूमिकाविषयं स्पष्टीचकार । शकुन्तलायाः स्वपतिगृहगमनसमये कण्वेन यः उपदेशः प्रदत्तः तेन स्त्रीद्वारा समुचितरूपेण परिपालिते सति परिवारस्य समाजस्य च कृते अवश्यं कल्याणं भविष्यति । उक्तं यथा चतुर्थाङ्के –

**शुश्रूषस्व गुरून् कुरु प्रियसखीं वृत्तिं सपत्नीजने**

**भर्तृर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।**

**भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी**

**यान्त्यैव गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।** 6

भासस्य स्वप्नवासवदत्तम् इति नाटके वासवदत्तापद्मावत्योः परस्परं यः त्यागः कर्तव्यपरायणता च ,वर्णितः तत् भारतीयनारीभिः अवश्यं ज्ञातव्यमेव । तेन परिवारस्य हितसाधनं तथा परिवारेण समाजस्य च समुन्नतिं समाजेन राष्ट्रस्य , भविष्यति । तेनात्र तयोरूपरि शोधपत्रमिदं प्रस्तुतम् ।

**स्वन्नवासवदत्तस्य व्युत्पत्तिः परिचयश्च**

भासस्य यानि यानि त्रयोदश रूपकाणि वर्तन्ते तत् भासनाटकचक्रम् इति नाम्ना ज्ञायन्ते । कदाचित् व्यासभासयोः प्रतिष्ठाविषये मतभेदः सञ्जातः । उभावपि आत्मानं प्रतिभाशालिनौ मन्येते स्म । तन्निर्णये उभयोः ग्रन्थरत्नम् अग्नौ स्थापितम् । भासस्य सर्वमपि नाटकं दग्धं जातम् । केवलं स्वप्नवासवदत्तं नाटकं विहाय । तेन एतन्नाटकस्य सर्वश्रेष्ठत्वमङ्गीक्रियते । उक्तं यथा राजशेखरेण काव्यमीमांसायाम्

**भासनाटकचक्रेऽपि क्षेकैः क्षिप्ते परिक्षितुम् ।**

**स्वप्नवासवदत्तस्य दाहकोभून्न पावकः** ।। 7

स्वप्नेन दृष्टा या वासवदत्ता स्वप्नवासवदत्ता ताम् आधारीकृत्य कृतमिदं नाटकं ,स्वप्नवासवदत्तम् । नाटकेऽस्मिन् एकैकस्यापि पात्रस्य यद्यपि वैशिष्ट्यं वर्तते तथापि नारीपात्रेषु वासवदत्तापद्मावत्योः समाजोत्कर्षे विशिष्टं योगदानमस्ति । तदत्र अधस्तान्निरूप्यते ।

**स्वप्नवासवदत्तनाटके समाजोत्कर्षे वासवदत्तायाः भूमिका**

स्वप्नवासवदत्तमिति नाटकस्य नायिका भवति वासवदत्ता । नाटकेऽस्मिन् आद्यन्तं वासवदत्तायाः चरित्रे केवलम् आदर्शस्य रूपरेखा परिदृश्यते । भारतीयनारीणां तथैव आदर्शरूपता भवेत् । समुचितकार्येषु आत्मनः त्यागो बलिदानं वा स्वप्नवासवदत्तनाटके भासेन वासवदत्ताद्वारा चित्रितम् । यदा उदयनः वासवदत्तायामासक्तः सन् स्वराज्यकार्यं विस्मरतितदा , चिन्तितम् । तदानीं प्रधानमन्त्रिणा वासवदत्तया उदयनस्य यौगन्धरायणेन प्रधानमन्त्रिणा प्रजानां महाराजस्य च संरक्षणोपायं वियोगावस्था परिकल्पिता। यदा यौगन्धरायणः वासवदत्तां लावाणकग्रामे अग्निना दाहः तथा न्यासरूपेण बहुकालं यावत् भवन्त्विति प्रस्तावः कल्पितः तदा आदर्शनारीणां स्वपत्युः समाजस्य च परमकर्तव्यरूपेण वासवदत्ता तदङ्गीचकार । यद्यपि न्यासरूपेण वस्त्रादीनां परिवर्तनं कृत्वा गुप्तरूपेणावस्थानं कष्टकरं व्यापारं भवति तथापि वासवदत्ता हसन्ती तत् स्वीकृतवती । एतादृशः त्यागः बलिदानञ्च सम्प्रति आधुनिकनारीसमाजे द्रष्टुं नैव शक्यते । तत्र नाटके वासवदत्तायाः कष्टरूपतायाः न्यासावस्थायाः विषये उक्तं यथा –

**सुखमर्थो भवेत् दातुं सुखं प्राणाः सुखं तपः ।**

**सुखमन्यत् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्** ।। 8

प्राणाःतपसः फलञ्च कि ,मपि अन्यत् सर्वमपि द्रव्यं दातुं शक्यते । परन्तु कुत्रचित् कामपि न्यासरूपेण अवस्थापनम् अतीव दुःखं जनयति । यस्मिन् दुःसाध्ये मार्गे वासवदत्ता गतवती । यद्यपि स्वपत्या सह वियोगः जातः । परन्तु तस्याः पतिभक्तिः पत्युरुपरि प्रेम च सर्वासां नारीणां कृते समुचिता शिक्षा भवति ।

प्रसङ्गेऽस्मिन् यदि उदयनवासवदत्तयोः चरित्रस्योपरि परीक्षणं क्रियते तर्हि स्वपत्युरपेक्ष्यया वासवदत्तायाः चरित्रं दृढतरम् उत्कृष्टतरञ्च आसीदिति वक्तुं शक्यते । अत्र यदि उदयनेन सह तस्याः विच्छेदः नाभविष्यत् तर्हि आरुणिना उदयनस्य शत्रुणा राज्यापहरणमेव अकरिष्यत् । अत एवात्र योगन्धरायणस्य वासवदत्तायाश्च बुद्धिकौशलं प्रशंसनीयं भवति ।

परि कदापि शङ्का नैव करणीया । पतिरपि स्वपत्न्यारुपरि कदापि सन्देहः न कुर्यात् । एवञ्च एकया नार्या स्वपत्युरु पतिपत्न्योः परस्परं शङ्कारहितेन परिवारः समाजश्च कलुषितोन भवति । एतदपि स्वप्नवासवदत्तमिति नाटके सुस्पष्टं ज्ञायते । न्यासरूपेण संरक्षिता वासवदत्ता यदा द्वितीयाङ्के धात्रीद्वारा पद्मावत्याः स्वपत्याः उदयनेन सह विवाहं भविष्यतीति जानाति तदा धात्रीं पृच्छति

**आर्ये स्वयमेव तेन वरिता**

**धात्री – नहि नहि अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता** ।। 9





अर्थात् उदयनस्य कुलंष्ठा महाराजः मगधराजः स्वयं स्वभगिनीम् उदयनहस्ते कल्पितवान् । रूपञ्च दृ ,आयुः , ज्ञानम्, एतच्छ्रुत्वा वासवदत्ता स्वपत्युः उदयनस्योपरि तिलमात्रमपि कोपं न प्रदर्शयति । अपिच उदयनेन कोऽपि अपराधः न कृत इति व्यचिन्तयन्ती कथयति –

**एवम् । अनपराद्ध इदानीमत्रार्यपुत्रः** । 10

सवदत्तोदयनयोः मधुरसम्बन्धविशेषस्य भारतीयस्त्रियः स्वपत्युरुपरि दृढविश्वासश्च भवेदिति ध्वन्यते । अनेनोदाहरणेन वा भारतीयस्त्रीणां समाजोत्कर्षे इतोऽप्येकं महत्वपूर्णं योगदानमस्ति त्यागः बलिदानञ्च यत् स्वप्नवासवदत्तनाटके चतुर्थाङ्के द्रष्टुं , पूर्ववृत्तान्तं श्रुत्वा यदा उदयनः रोदिति तदा तस्य पार्श्वे विद्यमाने वासवदत्तापद्मावती च आत्मानं शक्यते । चतुर्थाङ्के वासवदत्तायां सम्भाषणं कुरुतः । आदौ पद्मावती कथयति आर्यपुत्रस्य नेत्राभ्यामश्रुजलं प्रवहति । अतः अहमिदानीं त्वं वासवदत्तात्र तिष्ठ । एतच्छ्रुत्वा वासवदत्ता सर्वं ज्ञात्वाऽपि स्वपत्या सहितं पद्मावत्याः अवस्थितिं भवेदिति मनसि निधाय उक्तवती –

**उत्कण्ठितं भर्तारमुज्झित्वाऽयुक्तं निर्गमनम् । अहमेव गमिष्यामि** ।। 11

इत्यत्र स्वपत्या सह अन्यस्याः पत्न्याः उपस्थितिं कामनां कयाऽपि समुचितचिन्तनरूपया (पद्मावत्याः) कर्त्तुं शक्यते । भारतीयनारीसमाजं प्रति इयमपि एका समीचीना शिक्षा (वासवदत्तया) विषये चिन्तनपरया स्त्रियास्वपत्युरुन्नति भवति ।

पञ्चमाङ्के यदा पद्मावती रुग्णा भवति तदानीम् उदयनस्य द्वितीयपत्नीरूपेण न चिन्तयित्वा वासवदत्ता पद्मावतीं स्वभगिनीव आमनति । अत्रापि समाजस्य उन्नतिसाधनाय वासवदत्तातः शिक्षा प्राप्तव्या भवति ।

महत ,एवं प्रकारेण वयं पश्यामः स्वप्नवासवदत्तमिति नाटके वासवदत्तायाः चरित्रे उदारता्ता ,संयमता ,शीलरूपता , प्रेम च सम्मिश्रणं भवति । महाकविभासेन वासवदत्तां भारतीयनारीणाम् आदर्शभूतारूपेण चित्रितम् । , धैर्यं

**स्वप्नवासवदत्तनाटके समाजोत्कर्षे पद्मावत्याः भूमिका**

पद्मावती मगधराजदर्शकस्य भगिनी भवति । सा रूपवती आसीत् । समाजे स्त्रीणामपेक्ष्यया स्ववाणीषु नियन्त्रणं स्यात् । अर्थात् कस्यापि स्त्रियः वाणी सुमधुरा भवेत् । उच्यते “ वाग्भूषणं भूषणम् “ । तत्र नाटके प्रथमाङ्के वासवदत्ता पद्मावत्याः मधुरां वाणीं प्रशंसति कथयति च ,–

**न हि रूपमेववागपि खल्वस्याः मधुरा ,** । 12

अनेन ज्ञायते समाजोत्कर्षेनारीणां सुमधुरा वाणी अपि मुख्या भवति । रूपेषु मधुरवाणीष्वपि पद्मावती धर्मप्रिया , उदारभावनया युक्तश्च स्यात् । तत्र नाटके , तथैव धर्मकार्येषु आसक्तः उदारस्वभावा चास्ति । अतः समाजे नारीणां स्वभावः प्रथमाङ्के तपोवनमागमनसमये पद्मावत्याः तपोधनानामुपरि धर्मप्रियता उदारता च इत्थं प्रमाणीभवति । उक्तं च तया –

**तीर्थोदकानि समिधः कुसुमानि दर्भान्**

**स्वैरं वनादुपनयन्तु तपोधनानि ।**

**धर्मप्रिया नृपसुता न हि धर्मपीडा –**

**मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः** ।। 13

पद्येऽस्मिन् पद्मावत्याः कुलव्रतविषयं तपोधनानां कृते सम्मानं धर्मकार्येषु अभिमतञ्च अभिव्यज्यते । वने तपस्विनां तपःकार्येषु यदपेक्ष्यते तत् याचितुं प्रार्थयति इयं पद्मावती । समाजे नारीणाम् अयमेव परोपकारीस्वभावः स्यात् ।

समाजे नारीणां रूपं माधुर्यादयः,शीलं ,गुणाः स्युः । ते गुणाः पद्मावत्याः आसन्निति स्वप्नवासवदत्तनाटकस्य चतुर्थाङ्कात् ज्ञायते । चतुर्थाङ्के यदा विदूषकः वासवदत्तापद्मावत्योर्मध्ये तव प्रियतरा का ? इत्यपृच्छत् । तदानीं पद्मावत्याः रूपशीलादीन् स्मारं स्मारं उदयनेनोक्तम्

**पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।**

**वासवदत्ताबद्धं न तु तावन्मे मनो हरति ।।14**

ब्रह्मचारी यदा उदयनस्य शोकावस्थां वर्णयति तस्य मूर्च्छारूपञ्च कथयति तदा पद्मावती भयभीता स्वभर्तारं प्रति संवेदनशीलताञ्च प्रकटयति । समाजे स्त्रिषु स्वपत्युः कृते एतादृशी पतिभक्तिः सर्वाभिः स्त्रिभिः अवश्यं ज्ञातव्या । वासवदत्तया सह तस्याः स्वसखीवत् व्यवहारो भवति । नाटकस्यान्ते वासवदत्तायाः प्रकटीभूतायां विनम्ररूपेण स्वपरिचयं करोति । तत्र स्त्रिषु विनम्रभावस्य सूचनामपि लभ्यते ।

सहानुभूतिः विनम्रतादयः,उदारता,निरहङ्कारता ,शीलं,एवञ्च सौन्दर्यसमुचिताः गुणाः एते भारतीयनारीष्वपेक्ष्यन्ते । ते सर्वेऽपि गुणाः पद्मावत्याम् आसन्नेव । समाजस्य उन्नतये ते गुणाः स्त्रिषु सततम् अपेक्ष्यन्ते । येन समुचितपरिवारेण सह उन्नतसमाजस्य जेन उत्कृष्टराष्ट्रस्य च निर्माणमवश्यं कर्तुं शक्यते ।उन्नतसमा ,

**उपसंहारः**

संस्कृतनाटकेषु यद्यपि बहुत्र आर्शनारीणामेकं चित्रणं वर्तते । तथापि महाकविः भासोऽपि तत्र तस्योपरि विशिष्टं ध्यानं दत्तवान् । स्वप्नवासवदत्तमिति सुप्रसिद्धनाटके वासवदत्तापद्मावत्योः चित्रणेन नूनं विशिष्टमेकं दिग्दर्शनं भवत्येव । इति शम् ।।

**संकेताक्षरसूची**

1. नाट्यशास्त्रम् 1.115
2. नाट्यशास्त्रम् 1.116
3. प्रसन्नराघवम् 1.22
4. मनुस्मृतिः 3.56
5. मनुस्मृतिः 5.165
6. अभिज्ञानशाकुन्तलम् 4.20
7. काव्यमीमांसायां
8. स्वप्नवासवदत्तम् 1.10
9. स्वप्नवासवदत्तम् द्वितीयोऽङ्कः पृ.42





10. स्वप्नवासवदत्तम् द्वितीयोऽङ्कः पृ.42
11. स्वप्नवासवदत्तम् चतुर्थोऽङ्कः पृ.76
12. स्वप्नवासवदत्तम् प्रथमोऽङ्कः पृ.12
13. स्वप्नवासवदत्तम् 1.6
14. स्वप्नवासवदत्तम् 4.4

*****************

**सहायकग्रन्थसूची**


1. अभिज्ञानशाकुन्तलम् ,सीवारणा ,चौखम्बाकृष्णदास अकादमी ,कालिदासः ,2008
2. मनुस्मृतिः भारतीय ,आचार्यः मनुः ,विद्या भवन् ,मुम्बई ,1983
3. मनुस्मृतिः ,वारणासी ,चौखम्बा संस्कृत संस्थान ,आचार्यः मनुः ,1975
4. नाट्यशास्त्रम्2040 सं.वि ,वारणासी ,चौखम्बा संस्कृत संस्थान ,भरतमुनिः ,
5. प्रसन्नराघवम् ,सीवारणा ,जयदेवः चौखम्बा संस्कृत संस्थान ,2008
6. काव्यमीमांसाचौखम्बा स ,राजशेखरः ,ंस्कृत संस्थान ,वारणासी ,2007
7. स्वप्नवासवदत्तम्2000 वारणासी ,कृष्णदास अकादमी ,भासः ,


********************

# ‘नाट्यशास्त्रस्य वैशिष्ट्यम्’

**गीता शुक्ला**[168]

विश्वेऽस्मिन् अखिलभाषासाहित्येषु संस्कृतभाषायाः साहित्यं श्रेष्ठतमं मन्यते यतोहि **साहित्येऽस्मिन्** यादृशी प्राचीनता–व्यापकता–सर्वांगीणता चास्ति तादृशी अन्यासु भाषासु नैव दृश्यते। लौकिकालौकिभेदेन साहित्यं द्विधा विभक्तुं शक्यते। अलौकिके साहित्ये तु वेदानां गणना भवति लौकिके च काव्यसाहित्या**दीनाञ्च**। पुनश्च विश्वनाथ–हेमचन्द्र–भोजराज–रामचन्द्र–गुणचन्द्र प्रभृतिभिः काव्यभेदद्वयं विहित**म्**।

‘काव्यं प्रेक्ष्यं श्रव्यं च’[1]
‘प्रबन्धश्चेह द्विधा प्रेक्ष्यः श्रव्यश्च’[2]
‘काव्यं च सरसमभिनेयमनभिनेयभेदभिन्नम्’[3]
‘काव्यं द्विधा विदधति सुधियः श्रव्यमभिनेयं च’[4]
‘दृश्यं श्रव्यं च यद्भवेत्’[5]

यस्य काव्यस्य रसास्वा**दं** श्रुत्वा पठित्वा वा विधातुं शक्यते तत् श्रव्यकाव्यं तथा च यत्पुनः काव्यं द्रष्टुं योग्यं भवति तद् दृश्यमिति उच्यते अर्थात् यस्य काव्यस्य रसास्वादो दृष्ट्वा कर्त्तुं शक्यते तद् दृश्यम्। दृश्यकाव्ये श्रव्यत्वमपि प्राप्यते।

एवं दृश्ये नाटकादिकं श्रव्ये च काव्यादिकम् आयान्ति। रसास्वादनदृष्ट्या भेदद्वयं समानमेव परन्तु श्रव्यकाव्यापेक्षया दृश्यकाव्यं विशिष्टं मन्यते रंगमंचे च अभिनीयमानं जायते। अतएव उक्तम्–

**काव्येषु नाटकं रम्यम्**

नाट्यकला सर्वासां कलानाम् साम्राज्ञी परमानन्दप्रदायिनी लोकोत्तरचमत्कारप्रकाशिनी च। सर्वासु कलासु अपि शास्ति च। तत्रोपलब्धान् विषयान् आदाय विलक्षणतया म**ञ्**जुलतया च नाट्ये समावेशयति। उक्त**ञ्**च–

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येस्मिन् यन्न दृश्यते।।[6]

दृश्यकाव्यनि रूपकाणि वा जनसाधारणस्याभिरूच्यर्थं भवन्ति। यतो हि नाट्यस्य सकलप्रयोजनमौलिभूतं तत्त्वम् आनन्दमेव भवति। नाट्यात् परं कि**ञ्**चिदन्यत् जनसामान्यानाम् सुलभो न जायते।

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते।
नाट्यं भिन्न रूचेर्जनस्य बहुधाप्येकं समाराधनम्।।[7]

एवं नाट्यं भिन्नरूचीनां जनानामद्वितीयं मनोर**ञ्**जनस्य साधनमस्ति येन सर्वे जनाः समानन्दमनुभवन्ति। अन्यत्रापि च उच्यते–

‘‘नाट्यप्रबन्धमतिमंजुलसंविधानम्।’’

---

[168] एसो0 प्रो0–संस्कृत विभाग. भ0दी0आ0क0स्ना0महाविद्यालय,लखीमपुर–खीरी



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

तत्र परमानन्दसन्दोहानुभवं कृत्वैव धन**ञ्**जयाचार्येण दशरूपके उक्तं–

आनन्दनिष्यन्दिषु रूपकेषु।
व्युत्पत्रिमात्रं फलमल्पबुद्धिः।।[8]

एवम् स्पष्टं यदि विभिन्नरूचीनां जनानां मनोविनोदस्य एकमात्रसाधनं नाट्यमेव।

भारतीयनाट्यपरम्परा नाट्यशास्त्रकारं भरतं मुनेरूपाधिना विभूषयति। अनेन विरचितं नाट्यशास्त्रं नाट्यलोके आकरग्रन्थरूपे अवतिष्टति। अयं नाट्यपरम्परायाः आदिमः ग्रन्थः।

भरतमुनेः नाट्यशास्त्रस्य माहात्यं को न जानाति ? एतादृशं प्राचीनं ग्रन्थोऽन्यः नास्ति। ग्रन्थस्यास्यानुशीलनेन तत्कालीन कलासंस्कृतिश्च कीदृशी आसीद् एतदपि ज्ञायते। संस्कृतनाट्यविषयकं सम्पूर्ण ज्ञान प्राप्यते। वक्तुं शक्यते यत् ईदृशी अन्या रचना ‘न भूतो न भविष्यति’।

नाट्यसम्बन्धे ईदृशी मान्यता अस्ति यत् प्रजापतिः देवानां प्रार्थनामंगीकृत्य वेदचुष्टयात् सर्ववर्णसुलभं शास्त्रोपयुक्तं तत्वचतुष्टयं जग्राह –

संकल्प्य भगवानेदं सर्वान्वेदाननुस्मरन्।
नाट्यवेदं ततश्चक्रे चतुर्वेदांगसम्भवम्।।[9]

जग्राह पाठ्यं ऋग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि।।[10]

नाट्य कीदृशं भवेत् ? प्रश्नस्यास्योत्तरे नाट्यस्वरूपम् उक्तं भरतमुनिना–

नैकान्तो भवतां देवानां चानुभावनम्।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनं।।[11]
एवं नाट्ये त्रयाणां लोकानां भावानुकीर्तनं भवति।

महाकविना कालिदासेन अप्युद्घोषितम्–

नाट्यस्य प्रभावः कस्यचित् एकाभिरूचियुक्तस्य जनस्योपरि न भवति अपितु नाट्यं सर्वजनेभ्यो ग्राह्यः उपादेयश्च भवति। अतएव उक्तं नाट्यशास्त्रे–

सर्वशास्त्रार्थ सम्पन्नं सर्वशिल्पप्रवर्तकम्।
नाट्याख्यं प**ञ्**चमं वेदं सेतिहासं करोम्यहम्।।[12]

नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।[13]

चत्वारो वेदाः तु द्विजमात्रोपयोगिनः उपादेयाश्च परन्तु नाट्यमिदं सर्ववर्णानां दुःखार्तानां श्रमार्तानां तपस्विनां कृतेऽपि महदुपकारकमस्ति। यतोहि नाट्यमेतत् सामाजिकेभ्यो धर्मयशस्यमायुष्यं हितं बुद्धिविवर्धनं लोकोपदेशजनन**ञ्**च प्रयच्छति।

न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात्सृजापरं वेदं पंचमं सार्ववर्णिकम्।।[14]

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति।।[15]

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं लोके नाट्यमेतद् भविष्यति।।[16]

सर्वस्यलोकस्य साधारणतया स्वत्वेन भाव्यमानःचर्व्यमाणोऽर्थो हि नाट्यं भवति। भारतीयनाट्यपरम्परानुसारेण विविधैःशास्त्रकारैः नाट्यलक्षणनि कृतानि। तद्यथा–

'अवस्थानुकृतिर्नाट्यम्' दशरूपकम् 1/7

'धर्मादिसार्धनं नाट्यं सर्वदुःखापनोदकृत'' । नाटकलक्षणरत्नकोशे

अवस्थानुकृतिर्नाट्यमिति सामान्यलक्षणम् रामादितादात्मयापत्तिर्नटे या नाट्यमुच्यते। भावप्रकाशने

नाट्यशास्त्रविषयक विविधग्रन्थानां विषयः प्रायः समानः दृश्यते तथा तस्य मूलस्रोतोऽपि प्रायः समानमेव। अतएव सर्वेषु ग्रन्थेषु विषयस्य विवेचनेषु समानता दृश्यते। नाट्यं इत्यर्थे 'रूपं' इति शब्दस्य रूपकं इति शब्दस्य च व्यवहारमपि भवति।

उक्तञ्च–

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते।
रूपकं तत्समारोपात् दशधैव रसाश्रयम्।।[17]

भरतमुनेः नाट्यशास्त्रं नाट्यविषयकः प्रमाणभूतः श्रेष्ठः ग्रन्थः अस्ति। भरतमुनेः पश्चात् नाट्यविषयकग्रन्थेषु विष्णुपुत्रधनञ्जयविरचितं दशरूपकं महत्वपूर्णः ग्रम्थोऽस्ति।

विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः।
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजदशरूपमेतत्।।

स्वयमेव धनञ्जयः लिखति–नाट्यानां किन्तु किञ्चित्
प्रगुणरचनया लक्षणं संक्षिपामि।[18]

वस्तुनेतृरसानामाश्रित्येमे भेदाः भवन्ति नाट्यस्य –

नाटकं सप्रकरणमंगो व्यायोग एव च।
भाणः समवकारस्य वीथी प्रहसनं डिमः
ईहामृगश्चविज्ञेयो दशमो नाट्यलक्षणे।।[19क]

दशरूपके च– नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोग समवकारौ वीथ्यंकेहामृगा।।[19ख]

निष्कर्षतः वक्तुं शक्यते यत् भारते प्राचीनकालादेव दृश्यकाव्यं कवीनामाचार्याणाञ्च कृते महत्वपूर्णमासीत्। भारतीयसंस्कृतसाहित्यजगति 'नाटकान्तं कवित्वम्' इति उक्तिः नाट्यस्य महिमानं प्रकटयति। एवम् नाट्मस्ति काव्यस्येदृशो भेदोयेन सर्ववर्गीया जना आनन्दानुभूतिं कर्तुं प्रभवन्ति।

नाट्यं पञ्चमं वेदं सार्ववर्णिकम्।[20]

नाट्येषु सर्वेऽपि रसा निबद्धाः –



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

कवचिद् धर्मः क्वचित् क्रीडा कवचिदर्थः क्वचिच्छमः।
क्वाचिद् हास्य क्वचिद् युद्धं क्वचित् कामः क्वचिद् वधः।।[21]

वस्तुतः न हि रसादृते कश्चिदर्थः प्रवर्तते।
'नाट्यशास्त्र' इति शब्दः 'नाट्यवेद' इत्यर्थे प्रयुक्तः।

शारदरतनयस्यग्रन्थे उल्लिखितमस्ति–

एवं द्वादश–सहस्त्रैः श्लोकैरेकं, तदर्धतः।
षड्भिः श्लोकसहस्त्रैर्यो नाट्यवेदस्य सग्रहः।।[22]

## संदर्भ संकेतः


1. काव्यानुशासनम्, अष्टमेऽध्याये
2. श्रंगारप्रकाशः एकादशेऽध्यये
3. नाट्यदर्पणे
4. नाटकलक्षणरत्नकोशे
5. नाट्यशास्त्रे
6. नाट्यशास्त्रे 1/115
7. मालविकाग्निमित्रम् 1/4
8. दशरूपकं 1/6
9. नाट्यशास्त्रे 1/16
10. नाट्यशास्त्रे 1/17
11. नाट्यशास्त्रे 1/107
12. नाट्यशास्त्रे 1/15
13. नाट्यशास्त्रे 1/111
14. नाट्यशास्त्रे 1/12
15. नाट्यशास्त्रे 1/114
16. नाट्यशास्त्रे 1/113
17. दशरूपकं 1/7
18. दशरूपकं 1/4

19क नाट्यशास्त्रे 19ख दशरूपकम् 1/8

20. नाट्यशास्त्रे 1/12
21. नाट्यशास्त्रे 1/108
22. भावप्रकाशन पृ0 287

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

# श्रीमद्भागवतदिशा अद्वैतविमर्शः

मखलेश कुमारः[169]

श्रीमद्भागवतमहापुराणं पुराणवाङ्मयस्य तिलकमिति महर्षिणा वेदव्यासेन समुद्घोषितम्। यतो हि महर्षिः व्यासः भागवतं विहाय वेदविभाजनपूर्वकं महाभारतादीन् ग्रन्थान् इतरपुराणानि विरच्यापि सन्तोषं न प्राप। पुनः देवर्षेः नारदस्योपदेशेन वासुदेवगुणानुवादयुतं श्रीमद्भागवतं विधाय सन्तोषम् अन्वबभूव। अनेन अस्य पुराणस्य असाधारणं वैशिष्ट्यं प्रतिभाति।

किन्नाम वेदान्तम्? तत्र उक्तं वेदान्तसारे विदुषा सदानन्देन "वेदान्तो नाम उपनिषत्प्रमाणमिति"। वैदिकसाहित्ये काण्डत्रयं भवति- कर्मकाण्डम्, उपासनाकाण्डं, ज्ञानकाण्डं च। उपनिषदि अत्युत्तमायाः ब्रह्मविद्यायाः चिन्तनं बहुधा कृतम् अस्ति। अत एव भारतीयदर्शने वेदान्तदर्शनं राजतेतराम्। ज्ञानमेव अस्य दर्शनस्य मूलाधारः अस्ति। वैदिकसाहित्ये विकीर्णं ज्ञानमेव वेदान्ते स्फुटतया परिलक्ष्यते। सृष्टेः पूर्वं पश्चात् च ब्रह्म एव अभिवर्तते इति वेदान्तिनः आमनन्ति। अत एव वेदेषु उपनिषत्सु प्रतिपादितस्य तस्य ब्रह्मणः स्वरूपं इतिहासपुराणादिषु बहुधोपलभ्यते। यतो हि वेदे प्रतिपादितस्य विषयस्य उपबृंहणं भवति इतिहासपुराणाभ्याम्। उक्तं च श्रीमन्महाभारते-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**

**बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥ (म.भा.आदि १.२६८)**

श्रीमद्भागवतमपि वेदरूपिणः कल्पवृक्षस्य रसमयं किञ्चन मधुरं फलमेव। अत्र वेदान्तदर्शनस्य सारांशो निहितो विद्यते। अतः वेदान्तदर्शनसूत्रविरचयितुः योगदर्शनसूत्रभाष्यकर्तुः पुराणप्रणेतुश्च भवगतः व्यासदेवस्य निर्देशोऽस्ति यत् श्रीमद्भागवते सर्वश्रेष्ठस्य वेदान्तदर्शनस्य सारः प्रतिपादितः अस्ति। यतो हि भागवतरसपानमुग्धस्य मानवस्य अन्यत्र रुचिः न जायते। उक्तं च-

**सर्ववेदान्तसारो हि श्रीमद्भागवतमिष्यते।**

**तद्रसामृततृप्तस्य नान्यत्र स्यात्क्वचिद्रतिः॥ (श्रीमद्भागवते १२.१३.१५)**

समेषामुपनिषदां सारभूतं ब्रह्मणः आत्मनश्च एकत्वरूपमद्वितीयं सद् वस्तु एव श्रीमद्भागवतस्य प्रतिपाद्यमुद्घोषितम्। तद्यथा- **सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम्।**

**वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्॥ (श्रीमद्भागवते १२.१३.१२)**

विद्वांसः भारतं कर्ममीमांसोपबृंहकं श्रीमद्भागवतं ब्रह्ममीमांसोपबृंहक च मन्वते। ब्रह्ममीमांसोपबृंहकस्य श्रीमद्भागवतस्य प्रतिपाद्यौ विषयौ नाम निराकारसाकारब्रह्मणी। भागवते प्रायः सर्वेषां दार्शनिकसिद्धान्तानां मूलतत्त्वानि विवेचितानि वर्तन्ते तथापि प्रामुख्येन वेदान्तदर्शनस्य प्रतीतिः बहुधा परिलक्ष्यते। भागवतस्य मङ्गलाचरणमपि चिन्तामणिरिव अनन्तार्थदः। एतस्मिन् ब्रह्म-माया-जगज्जीवसम्बद्धाद्वैतवेदान्तसिद्धान्ताः प्रायः निरूपिताः यथा-

[169] सहाचार्यः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.), श्रीसदाशिवपरिसरः, पुरी, ओडिशा



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

**जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्**

**तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।**

**तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा**

**धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।। (श्रीमद्भागवते १.१.१)**

मङ्गलाचरणेनानेन ज्ञायते यत् भागवतस्य प्रतिपाद्यः विषयः सत्यस्वरूपम् अद्वयं ब्रह्म एव। तद् ब्रह्म स्वरूपतटस्थलक्षणाभ्याम् उपलक्ष्यतेऽस्मिन्मङ्गलाचरणे। तत्र स्वरूपलक्षणं सत्यमिति सत्यत्वे हेतुः यत्र यस्मिन् ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्त्वानां भूतेन्द्रियदेवतारूपः सर्गोऽमृषा, तन्नाम सत्यम्। यत्सत्यतया मिथ्या सर्गोऽपि सत्यवत् प्रतीयते। तत् परं सत्यमित्यर्थः। अत्र दृष्टान्तः - तेजोवारिमृदां यथा विनिमयः इति। विनिमयो व्यत्ययोऽन्यस्मिन् अन्यावभासः। स यथा अधिष्ठानसत्तया सद्वत् प्रतीयते इत्यर्थः। तत्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा। मृदि कांचादौ वारिबुद्धिः, वारिणि च काचादिबुद्धिः इत्यादि। अत्र तस्य एव परमार्थस्य सत्यत्वप्रतिपादनाय तदितरस्य मिथ्यत्वमुक्तम्। यत्र मृषा एव अयं विसर्गः न वस्तुतः सत् । स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं मायालक्षणं यस्मिंस्तमिति।

तटस्थलक्षणमुच्यते, यदस्य विश्वस्य जन्मस्थितिभङ्गाः यतः भवन्ति तं धीमहि। अत्र हेतुः अर्थेषु आकाशादिकार्येषु परमेश्वरस्य सद्रूपेण अन्वयात् इतरतश्च अकार्येभ्यश्च खपुष्पादिभ्यः तद्व्यतिरेकात्। अथ वा अन्वयशब्देन अनुवृत्तिः इतरशब्देन व्यावृत्तिः। अनुवृत्तत्वात् सद्रूपं ब्रह्म कारणम्, मृत्सुवर्णादिवत्। व्यावृतत्वात् विश्वं कार्यं, घटकुण्डलादिवत्। अथ वा सावयवत्वात् अन्वयव्यतिरेकाभ्यां यदस्य जन्मादिः तद्यतः भवतीति सम्बन्धः। तर्हि किं प्रकृतिः ध्येया? न, यश्चेतनः सः ध्येयः, न तु जडः। योऽभिज्ञः सर्वज्ञः। तर्हि किं हिरण्यगर्भो ब्रह्मा ध्येयः? न, अपि तु स्वराट्। स्वेनैव राजते यः। स्वतः सिद्धज्ञानमित्यर्थः। परतन्त्रो न। अपि तु स्वयं प्रकाशः। आदिकवये ब्रह्मणे अपि ब्रह्म (वेदं) यस्तेने। ननु ब्रह्मणो अन्यतः वेदाध्ययनमप्रसिद्धम् इति। यस्मिन् ब्रह्मणि वेदे वा सूरयः अपि मुह्यन्ति। एतस्मात् ब्रह्मणः पितामहस्यापि पराधीनज्ञानत्वात् स्वतःसिद्धज्ञानः परमेश्वरः एव जगत्कारणम्। एवंभूतं सत्यस्वरूपं परमात्मानं ध्यायति भागवत्कारः।

अद्वैतवेदान्तिभिः दृश्यमानस्य जगत्प्रपञ्चस्य मिथ्यात्वं बहुधा प्रकाशितम्। ब्रह्म एव केवलं नित्यं वस्तु इति वदन्ति वेदान्तविद्याविशारदाः। वेदान्ते प्रतिपादितनित्यवस्तु एव श्रीमद्भागवतस्य द्वितीये श्लोके शिवदं वस्तु नाम्ना प्रकीर्तितम्। तद्यथा-

**धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां**

**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।**

**श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः**

**सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्। (श्रीमद्भागवते १.१.२)**

अत्र शिवदं नाम परमसुखप्रदम्। तापत्रयस्य उन्मूलनम्। नाशकम् इति। वास्तवं परमार्थभूतं वस्तु वेद्यम्। वास्तवशब्देन परमार्थभूतवस्तु, वस्तुनः अंशः जीवः, वस्तुनः शक्तिः माया, वस्तुनः कार्यं जगच्च इत्येतत्सर्वं वस्त्वेव भवति इति टीकाकाराः वदन्ति। तद् वस्तु एव वेद्यम्। एतदेव अद्वैतं श्रीमद्भागवतानुमतम्।

मानवानां श्रेष्ठः धर्मः कः? मानवमात्रस्य कल्याणं कथं स्यात्? किमवलम्ब्य मानवः परमपदं प्राप्तुं शक्नुयात्? इत्याशङ्कायां निगदितं श्रीमद्भागवते-

**स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे।**

**अहैतुक्यप्रतिहता ययात्मा संप्रसीदति॥ (श्रीमद्भागवते १.२.६)**

धर्मः द्विविधः भवति- प्रवृत्तिपरकः, निवृत्तिपरकश्च । स्वर्गाद्यर्थः प्रवृत्तिपरकस्त्वपरः धर्मः। निवृत्तिपरके धर्मे श्रवणादिलक्षणा भक्तिः भवति। सः परो धर्मः। एतद् ऐकान्तिकं श्रेयः। कथं भूता भक्तिः इति जिज्ञासायाम् उच्यते- फलासंधानरहिता, विघ्नैः अनभिभूता भक्तिः इति। तन्नाम, पुसां स एव परो धर्मो येन वासुदेवे परा भक्तिः भवेत्।

धर्मस्य किं प्रयोजनम्? तत्रोच्यते मोक्ष इति। अन्ये तु मन्यन्ते यद् धर्मस्य फलम् अर्थः, अर्थस्य फलं कामः, कामस्य फलम् इन्द्रियप्रीतिः, इन्द्रियप्रीतेश्च फलं पुनरपि धर्मार्थादिपरंपरा इति। भागवत्कारस्तु एतद् निराकरोति। अस्य मते धर्मस्य फलम् अपवर्गः एव, न तु अर्थः। अर्थस्य अपि प्रयोजनं धर्माचरणम् एव, न तु कामः। कामस्य च नेन्द्रियप्रीतिः फलं भवति, अपि तु यावता जीवनं सुशकं तावतैव कामेन लाभः। जीवनपर्याप्तः एव कामः सेव्यः इत्यर्थः। जीवानां जीवनस्य किं प्रयोजनम्? तत्र आह- तत्त्वजिज्ञासा एव। यथा-

**धर्मस्य ह्यापवर्गस्य नार्थोऽर्थायोपकल्पते।**

**नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः॥**

**कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता।**

**जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः॥ (श्रीमद्भागवते १.२.९,१०)**

किं नाम तत्त्वमिति जिज्ञासायां तत्त्वविदस्तु तदेव तत्त्वं वदन्ति यत् ज्ञानम् अद्वयं द्वैतरहितम् इति। अद्वयमेव औपनिषदैः ब्रह्मेति, हैरण्यगर्भैः परमात्मेति, सात्वतैः भगवानित्यभिधीयते। यथा-

**वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञामद्वयम्।**

**ब्रह्मेति परमात्मेति भगवानिति शब्यते॥ (श्रीमद्भागवते -१.२.११)**

एतदेव अद्वयं ब्रह्म एव श्रीमद्भागवतस्य तत्त्वं प्रधानप्रतिपाद्यविषयश्चैव। तस्यैव विमर्शः नानायुक्तिभिः प्रस्तूयतेऽत्र । प्रथमस्कन्धस्य तृतीयाध्याये निर्विशेषस्य सदसद्विलक्षणस्य मायावरणरहितस्य निर्गुणस्य ब्रह्मणः संकेतः कृतः व्यासदेवेन, तद्यथा-

**यत्रेमे सदसद्रूपे प्रतिसिद्धे स्वसंविदा।**

**अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम्॥ (श्रीमद्भागवते १.३.३३)**

एवं च वस्तुतस्तु परब्रह्म ईश्वरो वा अकर्ता अभोक्ता अजन्मा चास्ति। तथापि लोकहिताय तस्य जन्मरहितस्य अपि जन्मकर्मणी पूर्ववर्तिभिः कविभिः वर्णितानि। ब्रह्मा स्वस्तुतौ भगवन्तं कथयति यत् हे देव ममानुग्रहः यस्माज्जातः तस्य स्वेच्छामयस्य तव देहस्य महिमानं ज्ञातुं न समर्थोऽस्मि। यतो हि तव देहः भूतमयः नास्ति। त्वं भक्तेच्छानुसारेण स्वेच्छया वा आविर्भवसि। तद्यथा-**अस्यापि देववपुषो मदनुग्रहस्य**

**स्वेच्छामयस्य न तु भूतमयस्य कोऽपि।**





**नेशे महि त्ववसितुं मनसान्तरेण**

**साक्षात्तवैव किमुतात्मसुखानुभूतेः॥ (श्रीमद्भागवते १०.१४.२)**

भगवतः स्वरूपम् अतर्क्यम् असाधारणमहिमयुक्तं स्वयंप्रकाशं मायारहितं च विद्यते। अत एव वेदान्तोऽपि ब्रह्मव्यतिरिक्तनिरसनमुखेन तस्य ब्रह्मणः कश्चित् संकेतं करोति। अत एव कथितं शुकदेवमुनिना-

**इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके।**

**परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ॥**

**अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति**

**चछादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम्॥ (श्रीमद्भागवते १०.१३.५७)**

अन्यत्रापि प्रतिपादितम् अद्वयं ब्रह्म। तद्यथा-

**तत्रोद्वहत् पशुपवंशशिशुत्वनाट्यं**

**ब्रह्माद्वयं परमनन्तमगाधबोधम्।**

**वत्सान्सखीनिव पुरा परितो विचिन्व-**

**देकं सपाणिकवलं परमेष्ठ्यचष्ट॥ (श्रीमद्भागवते १०.१३.६१)**

**अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शित-**

**मेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि।**

**तावन्तोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासिता-**

**स्तावन्त्येव जगन्त्यभूस्तदमितं ब्रह्माद्वयं शिष्यते॥ (श्रीमद्भागवते १०.१४.१८)**

तत्त्वमसीत्यादिभ्यः महावाक्येभ्यः जीवब्रह्मणोः ऐक्यं अभेदो वा वेदान्तादिषु सुप्रकाशितः। पुराणेषु अपि सत्तत्त्वस्य परमार्थस्य ब्रह्मणः साक्षात्कारः एव मानवजीवनस्य मौलिभूतं प्रयोजनम् इति विज्ञापितम्। गजेन्द्रमोक्षप्रसङ्गे वर्णितं यत् विभुः भगवान् स्वयं ज्योतिःस्वरूपः तमसः पारे अभिविराजते। यस्य स्वरूपं देवैः ऋषिभिः न ज्ञातम्। यद् ज्ञातुं सर्वे देवर्षयः सततं यतन्ते। तत् परात्परं ज्ञातुं जीवः अविद्यावशवर्ती अज्ञानं हित्वा निरुपाधिकं निर्विकल्पकज्ञानं यदा समुपादत्ते तदैव तस्य परेशस्य अनन्तशक्तेः आश्चर्यकर्मणः साक्षात्कारः सम्भवति। तद्यथा-

**तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये।**

**अरूपायोरुरूपाय नम आश्चर्यकर्मणे॥**

**नम आत्मप्रदीपाय साक्षिणे परमात्मने।**

**नमो गिरां विदूराय मनसश्चेतसामपि॥ (श्रीमद्भागवते ८.३.९,१०)**

जगदिदम् आत्मनि कल्पितं व्याप्तं च वर्तते। अस्मात् कारणादेव जनाः संसारम् आत्मस्वरूपं मन्यन्ते। तेनैव रूपेण व्यवहरन्ति च। यथा सुवर्णेन निर्मितानि भूषणानि सुवर्णम् एव भवति। जगदिदं उत्पत्तेः पूर्वं नासीत् प्रलयान्तेऽपि न स्थास्यति। अत एव अनेन सिद्ध्यति यत् मध्येऽपि दृश्यमानमेतद् असद्रूपात्मकं एव वर्तते। यथा मृत्तिकासु घटः अयस्सु अस्त्राणि सुवर्णेषु

कुण्डलं नाममात्रमेव। वस्तुतः एते मृत्तिका अयः सुवर्णं चैव भवन्ति। तथैव ईश्वरे वर्णितं जगत् नाममात्रमेव। श्रीमद्भागवते जीवस्य स्वरूपम् अपि विवेचितम्। भगवान् शासकः, जीवश्च तेन शासितः भवति। ईश्वरः नियामकः जीवश्च तेन नियम्यः। यथा समुद्रे नद्यः सम्मिलन्ति तथैव जीवः ईश्वरे सम्मिलति। जीवे ईश्वरे च वस्तुतः ऐक्यमेव। परन्तु संसारदशायां द्वयोः भेदः वर्तते। जीवः मायया बद्धः। ईश्वरस्तु मुक्तः। जीवः ऐश्वर्यहीनः। ईश्वरस्तु ऐश्वर्यसम्पन्नः भवतीति।

वेदान्तदर्शने 'अहं ब्रह्मास्मि' इति ज्ञानं सर्वोत्कृष्टं मन्यते। श्रीमद्भागवतेऽपि पुराणस्यास्य श्रवणावसाने द्वादशस्कन्धे मुनिः शुकदेवः राजानं परीक्षितमवदत् यत्, "हे नृप! साधकः ज्ञानरूपिणा खड्गेन आत्मनः आवरकं बन्धनकरिणं मिथ्याभूतमहङ्कारं छित्त्वा आत्मस्वरूपे स्थितः सन् परमात्मतत्त्वमनुभवति अयमेव एव पुराणेषु आत्यन्तिकप्रलयः उच्यते। यथा-

**यदैवेमेतेन विवेकहेतिना**

**मायामयाहङ्करणात्मबन्धनम्।**

**छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते**

**तमाहुरात्यन्तिकमङ्गसंप्लवम्॥ (श्रीमद्भागवते १२.४.४३)**

सद्धर्मदर्शिनां विदुषां कथनमस्ति यत् ब्रह्मणः आरभ्य स्थावरपर्यन्तं सर्वेषां प्राणिनां नित्यं सृष्टिप्रलयौ भवतः। यस्य ज्ञानं नदीप्रवाहः इव, दीपज्योतिरिव वा नानुभूयते। देहे बाल्ययौवनादीनां नित्यं परिवर्तनेन अपि जायमानस्य नित्यप्रलयस्य अनुभवो न भवति। अत्यन्तं दुस्तरस्य संसारसमुद्रस्य पारं गन्तुकामस्य दुःखाकुलस्य जनस्य भगवतो लीलाकथासेवनातिरिक्तं किमप्युत्तमं साधनं नास्ति। अतः भगवतः चरितश्रवणम् एव सर्वेषां श्रेयस्करम्। तथा चोक्तं श्रीमता शुकदेवमुनिना-

**संसारसिन्धुमतिदुस्तरमुत्तितीर्षोः**

**नान्यः प्लवो भगवतः पुरुषोत्तमस्य।**

**लीलाकथारसनिषेवणमन्तरेण**

**पुंसो भवेद्विविधदुःखदवार्दितस्य॥ (श्रीमद्भागवते १२.४.४०)**

श्रीमद्भागवतकथाश्रवणानन्तरम् अमलात्मा व्यासपुत्रः श्रीशुकदेवमुनिः महाराजं परीक्षितं प्रोवाच- राजन्! यन्मया श्रीमद्भागवते भगवतः मङ्गलमयं चरितं तुभ्यं श्रावितं तेन सह सः दयालुः भगवान् तव हृदये प्रविष्टः विराजते। कुत इदानीं ते मृत्योः भयं? त्वं भगवतः कृपया कृतार्थो जातः। अतः ज्ञानदृष्ट्या स्वहृदये बहिर्वा सर्वप्राणिषु विद्यमानं भगवत्स्वरूपम् अवलोक्य अहं मरिष्ये इति अज्ञानिनां बुद्धिं जहि। इदमपि जानीहि, यत् देहवदात्मनः नाशो न भवति, बीजाङ्कुरवद् पुत्रपौत्रादिरूपेण एकस्माद् देहात् द्वितीयो देहः उत्पद्यते। काष्ठान्तर्गतः अग्निर्यथा काष्ठात् पृथग्वर्तते तथैव देहे व्याप्तः आत्मा अपि देहात् सर्वथा पृथगेवास्ति। एतेन स्पष्टमेवास्ति यद् द्रष्टा आत्मा देहो नास्ति। स देहान्नूनं पृथगेवास्ति।

**त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि।**

**न जातः प्राग्भूतोऽद्य देहवत्त्वं न नङ्क्षसि॥**

**न भविष्यति भूत्वा त्वं पुत्रपौत्रादिरूपवान्।**

**बीजाङ्कुरवद्देहादेर्व्यतिरिक्तो यथानलः॥ (श्रीमद्भागवते १२.५.२,३)**



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV ISSN 976-8645

आत्मनः जन्ममरणे न भवतः। यथा घटे नष्टे घटाकाशं महाकाशे विलीयते तथा देहे नष्टे जीवोऽपि ब्रह्मणि लीनो भवति। उक्तं च-

**स्वप्ने यथा शिरश्छेदं पञ्चत्वाद्यात्मनः स्वयम्।**

**यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः॥**

**घटे नष्टे यथाकाश आकाशः स्याद् यथा पुरा।**

**एवं देहे मृते जीवो ब्रह्म सम्पद्यते पुनः॥ (श्रीमद्भागवते १२.५.४,५)**

मायासृष्टः जीवस्य संसारः न वास्तविकः। दीपज्योतिरिव आत्मा न नश्यति। त्वं भगवतः ध्यानं कृत्वा अन्तर्दृष्ट्या आत्मानं पश्य। शरीरचिन्तनं त्यज। एवं तक्षको मृत्युर्वा तव किमपि अनिष्टं कर्तुं न प्रभविष्यति। "अहं ब्रह्मास्मि" इति भावनां कुरु। तेन ते शोकाग्निः नंक्ष्यति। अनन्तरं ब्रह्माहमिति भावनया ब्रह्मणः साक्षात्कारो भविष्यति। तदा आत्मनः पृथक् शरीरस्य, विश्वस्य वा सत्ता न स्थास्यति। दशतः तक्षकस्य सर्पस्य भानं ते न भविष्यति।

**अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्।**

**एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले॥**

**दशन्तं तक्षकं पादे लेलिहानं विषाननैः।**

**न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः॥ (श्रीमद्भागवते १२.५.११,१२)**

सर्वम् एतत् निशम्य राजा परीक्षित् नतेन मूर्ध्ना बद्धाञ्जलिः सन् मुनिम् प्रार्थयामास-

**सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना।**

**श्रावितो यच्च मे साक्षादनादिनिधनो हरिः॥**

**अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया।**

**भवता दर्शितं क्षेमं परं भगवतः पदम्॥ (श्रीमद्भागवते १२.६.२,७)**

तदनन्तरं राजा परीक्षित् गङ्गातटे उदङ्मुखः उपविश्य आत्मानम् एव आत्मनि संधाय वृक्षवत् निश्चलो जातः। तथा तस्य सर्वे संशयाः छिन्नाः। स च ब्रह्मीभूतः। तस्य देहः तत्कालमेव भस्मसाद् बभूव। ततः सर्वत्र हाहाकारो जातः। व्योम्नि देवगन्धर्वाप्सरसां दुन्दुभयः अवाद्यन्त। पुष्पाणां वृष्टयश्चाजायन्त। एवं वेदान्तदर्शनप्रक्रियया राजा परीक्षित् ब्रह्म बभूव।

दर्शनज्ञानपुरस्सरं भक्तिरससमन्वितं एतद्पुराणं संस्कृतजगति विद्यावतां विपश्चितां कृते परीक्षकत्वम् आदधाति। अत एव स्मरामि भागवतविषयकमाभणकमेतद्-

**धनञ्जये हाटकसंपरीक्षा**

**रणाजिरे शस्त्रभृतां परीक्षा।**

**विपत्तिकाले गृहिणीपरीक्षा**

**विद्यावतां भागवते परीक्षा॥**

*****************************************************************************

# ज्योतिषशास्त्र की दृष्टि में नेत्र रोग एवं उसका उपचार

हरिनारायणधरद्विवेदी[१७०]

प्रकाशार्थक द्युत् से (द्युत + इसुन् प्रत्यय तथा द् का ज् आदेश एवं उकार का 'ओ' गुण) निष्पन्न ''ज्योतिष'' शब्द ग्रह-नक्षत्र का वाचक है। इसी प्रकार 'ज्योतिष' शब्द (ज्योतिष् + अच्) ग्रहनक्षत्रों की स्थिति-गति तथा उनके शुभाशुभ फल का विवेचन करने वाला शास्त्र हैं। इसे वेद का नेत्र कहा गया है।[1]

जगत् के प्रत्येक प्रदेश और सम्प्रदाम में यह सिद्धान्त माना गया है कि संसार के प्रत्येक (चराचर) प्राणियों की शुभाशुभ स्थिति गमनगत ग्रह-किरणों के संयोगवश होती है। जीवमात्र के पाञ्चभौतिक देहपिण्ड पर उन पञ्चभूताधिप ग्रहों का जैसा सम्बन्ध रहता है तदनुसार जीवों को सुख-दु:खादि भोगने पड़ते हैं। शरीर अनेक कार्य-कारण वश सुखी और दु:खी हो सकता है किन्तु शरीरदु:ख में मुज्यकारण एकमात्र छठास्थान शत्रुभाव (रोगभाव) ही है जिससे रोगों के द्वारा, आध्यात्मिक दृष्टि से काम, आदि छ: शत्रुओं के द्वारा ही शरीर को दु:ख प्राप्त होता है। कुछ रोग शरीरस्थ दोषों (त्रिदोषों, वात-पित-कफ) के प्रभाव से होते है तथा कुछरोग पूर्वजन्म के कर्मो के प्रभाव से होते हैं।[2] त्रिदोषजन्य रोगों का निदान चिकित्साविज्ञान (आयुर्वेद) द्वारा हो जाता है, किन्तु पूर्वजन्म के कर्मो के परिणाम स्वरुप जो कुछ (शुभाशुभ) इस जन्म में प्राप्तव्य है, इसे जानने के लिए ज्योतिष एवं धर्मशास्त्र की आवश्यकता होती है। इस जन्म के प्राप्तव्य को ज्योतिषशास्त्र उसी प्रकार दिखला देता है, जैसे अन्धेरे में रखी हुई वस्तु को दीपक का प्रकाश दिखला देता है।[3] जन्मकुण्डली के सूक्ष्मनिरीक्षण से विभिन्न समयों में प्राप्त होने वाले राजयोगों या रोगों को समय से पूर्व ही जाना जा सकता है।

जन्म कुण्डली के बारहभाव शारीरिक अंगों को व्यक्त करते हैं। जिनमें द्वितीय और द्वादशभाव क्रमश: दक्षिणनेत्र एवं वामनेत्र कहे गये हैं। आचार्य नारायणभट्ट के अनुसार व्ययभाव में सूर्य-चन्द्रमा के स्थित होने से जातक को नेत्रदोष (नेत्रपीड़ा) होती है। व्यय-भावस्थ सूर्य-चन्द्रमा, षष्ठभाव (रोगभाव) से दृष्टिसम्बन्ध होने के कारण उक्त रोग उत्पन्न करेगें।[4]

आचार्य मन्त्रेश्वर के अनुसार नेत्ररोग विचार-

किसी भी रोग के विषय में निम्नलिखित ग्रहों से विचार करना चाहिए।

---

१७० सहा. आचार्य (ज्यो.), रा.सं.सं. (मा.वि.वि.), श्री वेदव्यासपरिसर बलाहर, कांगड़ा (हि. प्र.)





1. षष्ठभावस्थग्रह से, 2. अष्टमभावस्थग्रह से, 3. व्ययभावस्थग्रहसे, 4. षष्ठेश से, 5. षष्ठेश से युति करने वाले ग्रह से। इस प्रकार उक्तग्रहों के विचार से दो या तीन प्रकार से जब एक ही रोग निर्दिष्ट हो तब वह रोग होगा।[5] यथा-

यदि सूर्य-चन्द्रमा बारहवे या दूसरे स्थान में तो तथा उनको मंगल और शनि देखते हों तो नेत्ररोग होता है। यहाँ ध्यातव्य है कि यदि सूर्य-चन्द्र दोनों एक साथ या एक दूसरे के घर में हो और उनको मंगल व शनि पूर्णदृष्टि से देखते हो तो संभवत: उस आँख की ज्योति पूर्णत: चली जाए। नेत्रस्थान में बैठे हुए सूर्य-चन्द्र को केवल मंगल या केवल शनि देखें तो थोड़ा-कष्ट और यदि मंगल व शनि दोनों देखें तो विशेष कष्ट समझना चाहिए। इस प्रकार यह संभव है कि नेत्र स्थान में सूर्य-चन्द्र का अभाव होने एवं केवल पापग्रहों के होने से या पापग्रहों की नेत्रभाव (नेत्रस्थान) पर दृष्टि होने से भी नेत्र की ज्योति में कमी हो सकती है।[6]

आचार्य वैद्यनाथ के अनुसार शुक्र-चन्द्र और धनेश तीनों एकत्र हो तो जातक निशांध होता है, एवं सूर्य-शुक्र और लग्नेश अस्त (अदृश्यभावगत) हो तो मध्यम दृष्टि वाला होता है।[7]

लग्नेश, धनेश, सप्तमेश, नवमेश, पञ्चमेश यदि त्रिक (6, 8, 12) भाव में प्राप्त हों और शुक्र लग्न से सम्बन्ध करता हो तो जातक नेत्रहीन होता है।[8] शुक्र, पञ्चमेश और षष्ठेश के साथ लग्न में हो तो जातक को राजा को कोप से नेत्रविकार होता है।[9]

द्वितीयेश शनि, मंगल तथा गुलिक से युक्त हो तो जातक नेत्ररोगी होता है। धनस्थान में बहुत पापग्रहों का योग हो एवं धनस्थान को शनि देखता हो तो जातक नेत्ररोगी होता है।[10] आचार्य वराहमिहिर के अनुसार जिस जातक के जन्मकाल में सूर्य, चन्द्रमा, मंगल, शनैश्चर जिस किसी तरह जन्मलग्न से अष्टम, षष्ठ, द्वितीय, और द्वादश भाव में स्थित हो अर्थात् उक्त चारों स्थानों में से किसी एक स्थान में सूर्य, द्वितीय में चन्द्रमा, तृतीयस्थान में मंगल, चतुर्थ में शनैश्चर बैठा हो तो इन चारों ग्रहों में जो बली हो उसका जो धातु उसके कोप से जातकनेत्रहीन होता है।[11] आचार्यगणेश-दैवज्ञानुसार द्वितीयेश और द्वादशेश शुक्र एवं लग्न से युक्त होकर त्रिक-(6, 8, 12) भाव में हों तो जातक नेत्रहीन होता है। इसी तरह चन्द्रमा पापग्रह और शुक्र से युक्त होकर धनभावस्थ हो तो मनुष्य अन्धा होता है।[12] किसी जातक के जन्मकाल में चन्द्रमा सहित शुक्र त्रिक (6, 8, 12) स्थान में हो तो वह जातक रात को अन्धा होता है। अर्थात उसे रतौंधी होती है। सूर्य एवं शुक्र के सहित लग्नेश यदि त्रिक-स्थान में हो तो वह जातक जन्मान्ध होता है। इसी तरह दशम, तृतीय, चतुर्थ, पंचम, सप्तम स्थान के स्वामी सूर्य शुक्र और चन्द्रमा से युक्त होकर यदि त्रिकस्थान में हों तो क्रम से पिता, भाई, माता, पुत्र, स्त्री को अन्धे होने का योग होता है।[13] लग्नपति मंगल या बुध की राशि में स्थित हो और मंगल या बुध से दृष्ट हो तो जातक नेत्ररोगी होता है। अथवा किसी भी राशि में स्थित लग्नेश मंगल याा बुध से दृष्ट हो तो

जातक नेत्र रोगी होता है।[14] इसी तरह लग्नेश या अष्टमेश षष्ठभाव हों तो मनुष्य के बायें नेत्र में और शुक्र हो तो दाहिने नेत्र में रोग होता है।[15]

यदि धर्मशास्त्रीय दृष्टि से नेत्ररोग का विचार करें तो, आचार्य के अनुसार दीपक चुराने वाला अन्ध होता है।


जन्मतिथि-25-11-1998

जन्मसमय-11 बजे दिन में

जन्मस्थान-फैजाबाद

अक्षांश-26-46 उत्तर

देशान्तर-82-08 पूर्व




उपर्युक्त जन्मचक्र किसी जातिका का है। जिसके दोनों आँखों से दिखाई नही देता है। इस जन्मचक्र में ज्योतिषशास्त्र के अनुसार अन्धकत्व (नेतत्ररोग) योग प्राप्त है। यथा-

लग्नपति शनैश्चर, मंगल की राशि में स्थित होकर मंगल से पूर्ण दृष्ट है, जिसके कारण उक्त योग बन रहा है।

ज्योतिषशास्त्र की गणना से व्यक्ति का रोग सुनिश्चित किया जाता है। परन्तु यह गणना उसी के लिए प्रभावकारी होती है। जो नियम-धर्म का पालन करने वाला हो, परन्तु जो प्राणीनियम-धर्म के विरूद्ध आचरण करने वाले हैं ऐसे लोगों के लिए ज्योतिषशास्त्र की गणना नहीं है। धर्माचरण से युक्त लोगों के लिए ग्रह भी कल्याणकारी होते हैं। इस प्रकार का ऋषि वचन हैं। जैसे-

**देवब्राह्मण वन्दनाद् गुरुवचः संपादनात्प्रत्यहं-**
**साधूनामभिभाषणाच्छुतिरवाछ्रेयः कथाकर्णनात्।**
**होमादध्वरदर्शनाच्छुचिमनो, भावाज्जपाद्दानतो-**
**नोकुर्वन्ति कदाचिदेवपुरुषस्यैवं ग्रहाः पीडनम्।।**

**विचार एवं अनुभव-**

वर्तमान समय में असमय नेत्ररोगियों की संज्या में लगातार वृद्धि होती जा रही है, कम उम्र के बच्चे भी अधिकाधिक पावर के उपनेत्र (चश्वा) लगाये देखे जाते हैं। कुछ का उपचार (औषधीय) कराने से नेत्र विकार ठीक हो जाता है, लेकिन कुछ का आजीवन उपचार चलता रहता है। इसका कारण चाहे मिथ्याहार-विहार हो या कुछ और परन्तु एक प्रत्यक्ष कारण, शास्त्रीय परज़राओं (संस्कारों से प्रमाद या अनभिज्ञता) से समाज का दूर होना भी प्रतीत होता है। प्रायः बच्चे जन्म के समय हि किसी न किसी रोग से ग्रसित होते है





जिसके कारण असमय उनका निष्क्रमण संस्कार हो जाता है। ऐसे बहुत कम ही बच्चे होगे जिनके जातकर्मादि संस्कार किये जाते हों। जैसे-शास्त्रानुसार बच्चे का निष्क्रमण संस्कार जन्म से तीनमाह (90 दिन) बाद चतुर्थ महीने में अपेक्षित मुहूर्त में करने का विधान है।[16] उक्त समय में ही सूर्य-चन्द्रमा का दर्शन बच्चे को कराया जाना चाहिए।[17] क्योंकि जन्म से जितने दिन तक सूर्य के किरणों के प्रभाव से बच्चा दूर रहेगा संभवतः उतने वर्ष तक बच्चे की आँख में कोई विकार नहीं होगा। इसी कारण हमारे ऋषियों (पूर्वाचार्यो) ने संस्कारों का विधान किया होगा।

**उपचार-**

जिन ग्रहों से अन्धकत्वयोग (नेत्ररोग) प्राप्त हो उन ग्रहों के शान्त्यर्थ मन्त्रजप एवं रत्नधारण के द्वारा अथवा सूर्य की आराधना से नेत्ररोग का आध्यात्मिक उपचार किया जासकता है। क्योंकि सूर्य समस्त संसार की आँख (दीपक) है, समस्त संसार इसी से प्रकाशित होता है। अतः नेत्ररोगियों के लिए रविवार का व्रत करना, नित्य सूर्यार्घ्य देना, आदित्यहृदय या चाक्षुषीविद्या का पाठ करना श्रेयस्कर होता है। कोई अन्ध व्यक्ति यदि चाक्षुषीविद्या का पाठ करने में असमर्थ हो तो परिवार का कोई व्यक्ति पाठ करके सुना सकता है। इसके फल श्रुति से ही यह ज्ञात होता है कि यदि परिवार का कोई व्यक्ति चाक्षुषीविद्या का पाठ करता है तो उसके कुल में कोई नेत्ररोगी या अन्धा नही होता। ऐसा देखा जाता है कि जो लोग सूर्य की आराधना करते हैं वे लोग शरीर से नीरोग रहते हैं। नेत्ररोगियों के कल्याणार्थ चाक्षुषीविद्या का उल्लेख कर निबन्ध को विराम दे रहा हूँ।

।। ऊँ नमो भगवते भुवनभास्कराय।।

।। अथ चाक्षुषोपनिषद्।।

ऊँ अथ हंसाङ्कृतिर्भगवानादित्यलोकं जगाम। तस्मादित्यं नत्वा चाक्षुष्मती विद्यया तमस्तुवन्।

ऊँ अथातश्चाक्षुर्षी पठितां सिद्धां विद्यां चक्षूरोगहरां व्याज्यास्यामो यथा चक्षूरोगाः सर्वतो नश्यन्ति चक्षुषो दीप्तिर्भवतीति।।

**विनियोगः**

ऊँ अस्याश्चाक्षुषीविद्याया अहिर्बुध्न्यऋषिर्गायत्री छन्दः श्री सूर्योदेवता चक्षुरोग निवृत्तये जपे विनियोगः।

**(अथ चाक्षुष्मती विद्यया)**

ऊँ चक्षुश्च चक्षुश्च चक्षुस्तेजः स्थिरो भव। मां पाहि मां पाहि। त्वरितं चक्षुरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथाऽहम् अन्धो न स्यां तथा कल्पय कल्पय कल्याणं कुरु कुरु। यानि मम पूर्व जन्मोपार्जितानि चक्षुः प्रतिरोधकदुष्कृतानि तानि सर्वाणि निर्मूलय निर्मूलय। ऊँ नमः चक्षुस्तेजोदात्रे दिव्यभास्कराय।

ऊँ नमः कल्याण करायामृताय।

ऊँ नमः सूर्याय।

ऊँ नमः भगवते श्रीसूर्याक्षितेजसेनमः

ऊँ खेचराय नमः। ऊँ महासेनाय नमः।

ऊँ महते नमः। ऊँ तमसे नमः।

ऊँ रजसे नमः। ऊँ सत्वाय नमः।

ऊँ असतो मा सद्गमय। तमसोमाज्योतिर्गमयमृत्योयर्मा अमृतं गमय। उष्णो भगवान् शुचीरुपः। हंसो भगवान् शुचीरूपः प्रतीरूपः। विश्वरूपं घृणिनं जातवेदसं

हिरण्मयं ज्योतिरूपं तपन्तम्।

शहस्त्ररश्मिः शतधा वर्तमानः

परः पुरुषः प्रजामामुदयत्येष सूर्यः।।

ऊँ नमो भगवते श्री सूर्यायादित्यायाक्षितेजसो हो वाहिनि वाहिनि स्वाहेति। एवं चाक्षुष्मतीविद्यया स्तुतः श्रीसूर्यनारायणः सुप्रीतोऽब्रवीत्। य इमां चाक्षुष्मतीं विद्या ब्रह्मणो नित्यमधीते न तस्याक्षिरोगो भवति न तस्य कुलेऽन्धो भवति। अष्टौ ब्राह्मणान् ग्राह्ययित्वा अथ विद्यासिद्धिर्भवति। य एवं वेद स महान् भवतीति।

**इति चात्रुष्मती विद्या )**

ऊं वयः सुपर्णा उपसेन्दुरिन्द्रं

प्रियमेधा ऋषयो नाधमनाः।

अपध्वान्तमूर्णू हि पूर्द्धि

चक्षुर्मुमुग्ध्यस्मान्निधयेव विद्वान्।

ऊँ पुण्डरीकाक्षाय नमः। ऊँ पुष्करेक्षणाय नमः।

ऊँ अमलेक्षणाय नमः। ऊँ कमलेक्षणाय नमः।

ऊँ विश्वरुपाय नमः। ऊँ महाविष्णवे नमः।

शान्ति पाठः

ऊँ सह नाववतुं। सहनौ भुनक्तु। सह वीर्यं करवाव है।

तेजस्वि नावधीतमस्तु। मा विद्विषावहै।

ऊँ शान्तिः शान्तिः शान्तिः

।। इति चाक्षुषोपनिषत् सम्पूर्णा।।





**सन्दर्भ सङ्केत**

1. वेद चक्षुः कि लेदं स्मृतं ज्योतिषम्। (शि. सि. 1-11)
2. कर्मजाव्याधयः केचित् दोषजा सन्ति चापरे। (च. सं. 2-40)
   जन्मान्तर कृतं पापं व्याधिरुपेण जायते। (उ. प्र. भा. 13-36)
3. यदुपाचितमन्यजन्मनि तस्य शुभाशुभ कर्मणः पक्तिम्।
   व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।। (ल. जा. 1.3)
4. रविर्द्वादशेनेत्र दोषं करोति।
   शशी द्वादशे शत्रुनेत्रादि चिन्ता (च.चि.म.)
5. रोगस्यचिन्तमपि रोगभावास्थितैग्रहैर्वाव्यय मृत्यु संस्थैः।
   रोगेश्वरेणापि तदान्वितैर्वा द्वित्र्यादि सञ्ज्ञादवशाद्वदन्तु।। (फ. दी.अ.14 श्लो 1)
6. मन्दारान्वित वीक्षिते व्ययधने चन्द्रारूणौ चाक्षिरुक्। (फ.दी.अ. 14 श्लो. 10)
7. शुक्रेन्दुनयनाधीशैरेकस्थैस्तु निशान्धकः।
   सूर्यशुक्रविलग्नेशैरदृश्यैर्मध्यलोचनः।। (जा. पा. भा.फ.श्लो. 65)
8. विलग्नवित्तास्त तपः सुतेशा रिपुव्ययच्छिद्रगृहोपयाताः।
   विलग्न सञ्ज्ञन्धकरः सितश्चेद्विलोचनाभावमुपैतिजातः। (ज.पा.भा.फ. श्लो 66)
9. सितः सुतारीशयुतो विलग्ने, नरेशकोपान्नयनप्रमादः। (जा.पा.भा.फ.श्लो. 67)
10. शन्यारयोगे गुलिकेन युक्ते नेत्रेश्वरे तत्र तु नेत्ररोगः।
    नेत्रे यदा पापबहुत्वयोगे यमेनदृष्टे सति रुग्ण नेत्रः।। (जा.पा.भा.फ. श्लो 68)
11. निधनारिधनव्यस्थिता रविचन्द्रारयमा यथा तथा।
    बलवद् ग्रहदोषकारणैर्मनुजानां जनयन्त्यनेत्रताम्।। (वृ.जा.अ.अ.श्लो. 10)
12. स्वान्त्यधीशौ त्रिकस्थौ कवितनुपयुतौस्यात्तदानेत्रहीनः।
    चन्द्र पापेन युक्तो धनभवनगतः शुक्रयुङनेत्रहीनः।। (जा.लं.जा.अ.श्लो. 5)
13. शुक्रः सेन्दुस्त्रि कस्थो जनुषि निशिनरः
    प्राप्नुयादन्धकत्वं
    जन्मान्धः सार्क शुक्र स्तनुभवनपतिः
    स्यात्तदानीं मनुष्यः।

एवं तातानुजाज्ञा सुतनिजगृहिणी स्थाननाथाः स्थिाश्चेत्।
आदेश्यं तत्र तेषां प्रवरमतियुतैरन्धकत्वं तदानीम्।।(जा.लं.भा.अ. श्लो 6)

14. तनुपतिर्भौमवित्क्षेसंस्थः।
आज्यामालोकितः सन् भवति हि कतिचित्स्थानगो वा तदानीं।
नेत्रे रोगी नरः स्यात्। (जा. लं. भा.फ.श्लो.–18)

15. तनुनिधनपती शत्रुभावस्थितौ ना।
नेत्रे वामेतरे स्यादसुर कुलगुरुः।। (जा.लं.भा.अ. श्लो–19)

16. चतुर्थे मासि निष्क्रमणिका। (पा.गृ.सू. 1.17.5)

17. तृतीये वा चतुर्थे वा मासिनिष्क्रमणं भवेत्।
ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्।
चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम्।। (ज्यो. नि.)

18. दीपहर्ता भवेदन्धः। (मनु. अ. 11 श्लो. 52)





## प्राचीनार्वाचीनयोः उपकारयित्रिनव्यन्यायभाषायाः वर्तमानकालिकीस्थितिः

बिपिनकुमारझा[171]

Key words-
संस्कृतसाहित्यम्, ई-टेक्स्ट, नव्यन्यायभाषा, तर्कसङ्ग्रहः, पण्डितराजजगन्नाथः, पृथ्वी.

*************************************************************************************

भारतीयज्ञानपरम्परेयम्प्राचीनकालादारभ्याधुनिकप्रौद्योगिकियुगं यावत् अनवरतहसन्ती-लसन्ती-नदीवत्प्रवहन्तीहलोकपरलोकार्थमुपकुर्वन्ती वर्तते। तस्मिन्नेवोषित्वा अलोलुपाः कुम्भीधान्याः मनीषिणः ज्ञानसागरमस्मदर्थं निर्मितवन्तः। उक्तमपि महाभाष्ये-

**प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तन्नाशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण**[172]।

भारतवर्षेऽस्मिन् विविधेषु प्रान्तेषु आचार्याः विविधेषु शास्त्रेषु पाण्डित्यपूर्णं गभीरं चिन्तनं विधाय ग्रन्थप्रणयनपूर्वकं शास्त्ररक्षणं कृतवन्तः। अद्यत्वे तेषामर्जितपुण्यप्रतापेन अस्माकं देशः भारतवर्षोऽयं विश्वगुरुपदवीसमलङ्कृतः सन् मणिमुकुटरिव राराजते।

हन्त! साम्प्रतिके काले संरक्षणमध्ययनाध्यापनञ्चाप्यासन्नमृत्युरेवेति वर्तते तेषां शास्त्राणां समुचितं बिना। संस्कृतजगति मूर्द्धस्थेन राष्ट्रियसंस्कृत-संस्थानेन विविधग्रन्थानां संरक्षणाय सान्द्रमुद्रणं विहितम्। तदनु साम्प्रतिके काले ई-टेक्स्ट उपक्रमद्वारा संरक्षणं क्रियते[173]। इतोऽपि द्रुतगतित्त्वमपेक्षते कार्येऽस्मिन्।

एवमेव मिथिलाप्रसूतेन आचार्यगङ्गेशोपाध्यायेन[174] विदुषां मध्ये नव्यन्यायभाषा आनीता[175]। कालान्तरे[176] तु एषा बङ्गे पुष्पिता-पल्लविता च। एतस्य दर्शनं विविधेषु ग्रन्थेषु भूरिशः दृश्यते। एतस्याः भाषायाः वैशिष्ट्यं वर्तते व्यतिक्रमराहित्यं संशयराहित्यञ्चेति। एतस्मात् कारणादेव संगणकीयदृशा एषा संरचना महनीया वर्तते।

---

[171] साहित्यविगाध्यापकः (अनु.), वेदव्यासपरिसरः, राष्ट्रियसंस्कृतसंस्थानम्, बलाहरः, कांगरा, हि.प्र., शोधच्छात्रः (2009-14)-Cell for Indian Sciences and Technology in Sanskrit, IIT, Mumbai.

[172] पातञ्जलमहाभाष्यम् 1.1.1


[173] www.sanskrit.nic.in

[174] तत्त्वचिन्तामणिः इति ग्रन्थप्रणेता।

[175] द्वादश्यां शताब्याम्।

[176] षोडशशताब्यनन्तरम्।

अस्मिन् शोधपत्रे एतस्याः भाषायाः महत्त्वख्यापनपुरस्सरं विकासस्यारेखप्रस्तुतिः अपि च नव्यन्यायदृशालक्षणसमन्वयः कथं सञ्जातम् एतेषां सर्वेषां प्रश्नानां समाधानप्रदानार्थं यत्नो वर्तते।








पण्डितराजजगन्नाथः स्वकीये महनीये रसगङ्गाधराख्ये ग्रन्थे महता प्रयत्नेन विविधशङ्कानिवारणपूर्वकस्वरचितोदाहरणयुतकाव्यशास्त्रीयविवेचनं नव्यन्यायशैलीमनुसृत्य कृतवान्। अस्मिन् शोधपत्रे एकम् एव वाक्यं तस्यैव गुरुभ्रातु[177]ग्रन्थात् तर्कसंग्रहाद्दुधृत्य नव्यन्यायभाषा कथं व्यतिक्रमरहिता संशयरहिता च वर्तते इति एव विचारणा क्रियते। अस्तु 'गन्धवती पृथ्वी' इति वाक्यस्य व्याख्यानम्[178] इह प्रस्तूयते-

अत्र गन्धो गुणः, पृथ्वी द्रव्यम्।गन्धः निरूपकः पृथ्वी निरूपिता। गुणः आधेयः पृथ्वी आधाररूपा। गन्धे आधेयता पृथिव्याम् आधारता। अतो गन्धनिष्ठा आधेयता निरूपितपृथ्वीनिष्ठा अधिकरणता अथवा गन्धनिष्ठा आधेयता निरूपित अधिकरणता इति पृथिव्याः लक्षणम्। एतस्य लक्षणस्य समन्वयः एवं भवितुमर्हति गन्धनिष्ठा या आधेयता, पृथिव्यां गन्धोऽस्तीतिप्रसिद्धा गन्धनिष्ठा आधेयता तन्निरूपिता या अधिकरणता पृथ्वीनिष्ठा अधिकरणता तदाश्रयत्वं पृथिव्यां वर्तते इति लक्षणसमन्वयः। इदानीं पृथ्वीलक्षणस्य कालेऽतिव्याप्तिः। तथा हि- सर्वाधारः कालः इति प्रतीत्या सर्वेषां पदार्थानां काले कालिकसम्बन्धत्वेन् विद्यमानत्त्वात् गन्धस्याऽपि सर्वपदार्थेष्वन्यतमत्त्वात् गन्धनिष्ठा या आधेयता इति चेत् कालिकसम्बन्धावच्छिन्ना गन्धनिष्ठा आधेयता स्वीक्रियते तन्निरूपिता या अधिकरणता कालनिष्ठा अधिकरणता तदाश्रयत्वं काले वर्तते इति पृथ्वीलक्षणस्य काले अतिव्याप्तिः। अतः गन्धनिष्ठ आधेयता निरूपित अधिकरणताश्रयत्वं पृथिव्याः लक्षणम् इति पृथ्वीलक्षणस्य कालेऽतिव्याप्तिवारणाय गन्धनिष्ठ-आधेयतायां समवायसम्बन्धावच्छिन्नत्त्वं इति विशेषणम् अपि वक्तव्यम्। तथा च समवायसम्बन्धावच्छिन्न गन्धनिष्ठ आधेयता निरूपित अधिकरणताश्रयत्वं पृथिव्याः लक्षणं फलति। समवायसम्बन्धावच्छिन्ना गन्धनिष्ठा या आधेयता इति चेत् पृथिव्यां समवायसम्बन्धेनैव गन्ध एव अस्ति इत्याकारक प्रतीत्या समवायसम्बन्धावच्छिन्ना गन्धनिष्ठा या आधेयता तन्निरूपिता या अधिकरणता पृथ्वीनिष्ठा अधिकरणता न तु कालनिष्ठा अधिकरणता। कुतः काले कालिकसम्बन्धेन गन्धस्य सत्त्वेऽपि समवायसम्बन्धेन गन्धस्याभावात् । अतः पृथिव्यां लक्षणसमन्वयः कालेनाऽतिव्याप्तिश्च। इदानीं समवायसम्बन्धावच्छिन्न गन्धनिष्ठ आधेयता निरूपित अधिकरणताश्रयत्वं पृथिव्याः लक्षणं यत् वर्तते एतस्य लक्षणस्य जले अतिव्याप्तिः तथा हि गन्धे द्वे आधेयेते वर्तेते एका गन्धत्वावच्छिन्नाऽऽधेयता अपरा गुणत्वावच्छिनाऽऽधेयता। एकधर्मावच्छिन्नाऽऽधेयता एका एव ग्राह्या इति न्यायात् समवायसम्बन्धावच्छिन्ना गन्धनिष्ठा या आधेयता इति चेत् समवायसम्बन्धावच्छिन्ना शीतस्पर्शरूपगुणत्त्वावच्छिन्नाऽऽधेयता स्वीक्रियते तन्निरूपिताऽधिकरणताश्रयत्त्वं जले वर्तते इति कृत्त्वा पृथ्वीलक्षणस्य जले अतिव्याप्तिः। इत्थमेव वायौ, तेजसि इत्यत्र अतिव्याप्तिदर्शन-उतपन्ननष्टेघटेऽअव्याप्तिवारणपुरस्सरं पृथिव्याः लक्षणं भवति-. समवायसमबन्धावच्छिन्न-गन्धत्वावच्छिन्न-गन्धत्वेतरधर्मानवच्छिन्न-गन्धनिष्ठ-आधेयतानिरूपित-अधिकरणतावद्वृत्तिद्रव्यव्याप्यपृथ्वीत्वजातिमत्त्वम्। एतावन्तं महान्तं निगूढं गभीरं दृढं शास्त्रीयं सिद्धान्तं मनसि निधाय अन्नंभट्टः लिखति- तत्र गन्धवती पृथ्वी इति।

[177] अन्नमभट्टेति।

[178] एतद्व्याख्यानं प्रातस्मरणीयानां वेदादिविविधविद्याविशारदानां नितान्तनिर्मलान्तःकरणानां डा. कोड्डिपतिवेङ्कटसोमयाजुलुमहोदयानामनुकम्पावशात् तेभ्यः एवाध्ययनपुरस्सरमङ्गीकृता मया।

रसगंगाधरादिग्रन्थानामालोकनेनेदं कथयितुं शक्यते यत् साहित्यादिशास्त्रदृशानव्यन्यायस्यमहत्त्वम् अस्ति इति निर्विवादः किन्तु एतस्य एतादृशी अध्ययनाऽध्यापनपरम्परा जिविता अस्ति न वा इति विचारणीयो प्रश्नः। अङ्गुलिगण्याः एव जनाः सन्ति ये ज्ञानवृद्धाः अपि च वयोवृद्धाः सन्ति येषां साहाय्येन एव एतासां परम्पराणां संरक्षणं भवितुमर्हति अन्यथा नतद्दिनं दूरं यदा स्मृतिपथि एवेषा नरीनृत्यमाना भविष्यति। सङ्गणकदृशा तु नव्यन्यायस्यमहत्त्वम् इतोऽपि महनीयं वर्तते । अत्रास्माभिः दृष्टं यत् लक्षणं तदैव सम्यक् भवति यत्र दोषस्य आगमनं न स्यात्। तर्हि एव तत्र यूनिकनेस इति समागच्छति यत् अभीष्टम् अस्ति संगणकीयानुप्रयोग सन्दर्भे। एतद् ज्ञात्वाऽमूलभूतग्रन्थानामवहेलना जायते इति महान्तं क्लेशं जनयति। शास्त्ररुपिवृक्षस्य फलानामुपयोगः तदैव कर्त्तुं शक्यते यदि वृक्षः जीवितः स्यात्। संगणकसन्दर्भेऽपि प्रश्नः स एव, यावत् एतस्याः परम्परायाः संरक्षणं न भविष्यति तावत् कथमेतस्याः प्रयोगो विविध संगणकीयानुप्रयोगेषु भवितुमर्हति इति चिन्तनीयो विषयः।

उपसंहृतिः-

काणादं पाणिनीयञ्चेति कथं सुतरां समीचीना एव। वर्तमानकालिके विश्वेऽपि पाणिनेः अष्टाध्याय्याः संरचना अपि च नव्यन्यायस्य भाषासंरचना नूनमेवाद्वितीयतां भजतः। तत्र साहित्यसंरक्षणं स्यात् आहोस्वित् संगणकीयानुप्रयोगः स्यात्, सर्वत्र एतद्वयस्य अपेक्षा अनुभूयते। अतो नूनमेव उभयोः व्यावहारिकधरातले एतद्वयस्य संरक्षणं कर्त्तव्यम्। तत्राऽपि नव्यन्यायस्याध्ययनाध्यापनस्य परिपाटी तु विलुप्तप्राया एव तस्याः संरक्षणं विशेषरूपेण भवेत् इति एव मदीया चिन्तनवीथिः।

## परामृष्टग्रन्थाः


- ✓ झा, पण्डित मदनमोहन, रसगंगाधरः (प्रथमाननम्), चौखम्बा विद्याभवन, वाराणसी, १९८७
- ✓ झा, पण्डित मदनमोहन, रसगंगाधरः (द्वितीयमाननम्), चौखम्बा विद्याभवन, वाराणसी, १९८७
- ✓ शर्मा, डा. रामाधार, रसगंगाधरः (प्रथमाननम्), भारतीय विद्या प्रकाशन, दिल्ली, २०११
- ✓ मिश्रः, डा. पङ्कजकुमारः, अन्नमभट्टप्रणीतः तर्कसङ्ग्रहः, परिमलपब्लिकेशन्स, दिल्ली, 2001
- ✓ अग्निहोत्री, डा. प्रभुदयाल, पतञ्जलिकालीन भारत, ईस्टर्न बुक लिंकर्स, दिल्ली, 2007
- ✓ शुक्ल, आचार्य रामचन्द्र, हिन्दी साहित्य का इतिहास, चन्द्रालोक प्रकाशन, कानपुर, 2002
- ✓ Dubey, C.: Study of Effectiveness of Educational Material Related to Indian National Heritage for the Students of Class VIII. Ph.D. (Edu.), University of Lucknow, 2004.


*********************





# श्रृङ्खला

# । । चिन्तनवीथिः । ।

अज्ञानान्धकारविनाशिने ज्ञानवपुषे नमः

अर्जुनगतौला[179]

मानवीयमनीषा हि नैरन्तर्येण निखिलतत्वाधिगमावाप्तये सततं प्रयत्नशीला , हेतोरस्मादेव विश्वस्मिन् नूतनसिद्धान्तानां नवीनविचाराणां च अहर्दिवं प्रसवो जायत एव । प्राचीनकालेपि भारतीयविदुषां महता प्रयासेन तादृशसूक्ष्मतत्वानामन्वेषणमभूत् । जगत् यत्पुरोदृश्यमानं वर्तते तावदेव न, अपि तु मानवीयेन्द्रियातीतान्यपि तदृशवस्तूनि सन्ति यानि मनुष्यः स्वकीयमेधया अनुमातुं न क्षमः । प्रसङ्गेस्मिन् यद्वक्तव्यमस्ति तदित्थं यत् मानवः स्वीयमेधया यावत्कर्तुं शक्नोति तावत् तु कर्तव्यमेवासीत् परन्तु सांप्रतम् इह अवनीतले मनुष्याः सर्वमपि वस्तु केवलं भोगार्थमेव सृष्टमिति कुमनीषया ग्रस्ताः , अत एव विद्यमानेष्वपि ज्ञानप्रदायकेषु महत्सु साधनेषु निरीहा अवलोक्यन्ते । भारतवर्षसन्दर्भे तु विषयोयमितोऽपि महत्वपूर्णः । यतो हि भारतं नाम हि देश महतां वैज्ञानिकानाम् विविधदार्शनिकानामिति अद्यतना वयं नूनमेव विस्मरणं कृतवन्तः । अतो हेतोः सर्वदैव अभावग्रस्तान् स्वान् मन्यमानाः सदैव दुखमोहसंजाले निमग्ना भूत्वा यदासीत् प्राप्तं तदपि लब्धुं नैव क्षमाः । अस्तु ! प्रकृतमनुसरामः। ज्ञानविज्ञानपरिपूरितानि सनातनशास्त्राणि संत्यद्यापि । एतेषामध्ययनाध्यापनमेवापि कर्तुं पारयामश्चेत् तदपि बहु भवेत् । व्यावहारिकसाफल्यं नाम किमिति चिन्तयामश्चेत् निश्चप्रचमेव सिद्धान्ततत्वज्ञानम् अन्तरा न कथमपि कौशल्यमवाप्नुमः । कारणादेतस्मात् प्राथम्येन वयं स्वकीयक्षमताम् अवजानीमः , एतदनन्तरं वैदुष्यलब्धौ प्रयासं कुर्मः । वैदुष्यं नाम तदुच्यते येन वयं जागतिकसमग्रविषयवस्तूनां संज्ञानपूर्वकं सिद्धान्तव्यवहारयोरुभयोरपि सन्दर्भे कुशला भवेम । एतदर्थं सर्वतः पूर्वं तत्वप्रतिपादकानां सनातनज्ञानविज्ञानस्त्रोतोभूतानां महतां ग्रन्थानां सम्यक् अध्यवसायमाचरामः । ततः परं मानवीयहितसाधनाय संनद्धा भवेम । ज्ञानावाप्तये अस्माकं कृते सर्वमपि तादृशं साधनमद्यापि विद्यते ! परन्तु - **यद्विना सांप्रतं नूनमस्माकं निष्फलो जनिः । अयि भोः ! मानवी मेधे ! क्व गतं तव वैभवम् ।।** ।। इत्यलमनेनवीथिभ्रमणेन ।।

[179] व्याकरणदर्शनविषये शोधरतः, राष्ट्रियसंस्कृतसंस्थानम् लखनऊ परिसरः, लखनऊ उत्तरप्रदेश



A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 13th & 14th , Vol - IV | ISSN 976-8645

## ॥ मङ्गलसन्देशसङ्कलनम्॥

1. अद्यतनयुगे संस्कृतप्रसाराय प्रचाराय च कञ्चन नवीन पन्थानम् आश्रयन्ति संस्कृतविद्वांसः। तं वयं सुतराम् अभिनन्दामः.....।

   संस्कृतक्षेत्रेऽपि उपयोगमानीयमानोऽयं पन्थाः सर्वेषां हिताय स्यात् इति नात्र कश्चन संदेहः। जाह्नव्याः प्रकाशनम् एतद्दिशायां सर्वथा अभनन्दनार्हम् इति। नापेक्ष्यते बहु वचः।

   **ज्ञानपीठ-पद्मश्री-राष्ट्रपतिसम्मानपुरस्कृतः, महामहोपाध्यायः, विद्यावाचस्पतिः, विद्यामार्तण्डः, प्रो० सत्यव्रत शास्त्री**

   Honorary prof. SCSS, JNU, Formerly prof and HOD (Sanskrit) –DU, Ex VC SJSU, Puri

2. इयं जाह्नवी नाम ज्ञानगङ्गा त्रिपथगा इव संस्कृताभिमानिनां कर्णेषु प्रवहतु । संस्कृतं गङ्गेति प्रत्यक्षमुपायनद्वयं देवलोकात् भूमेः कृते । उभयमपि भुक्तिमुक्तिदं पापनाशकम् । संस्कृतशब्दानां अर्थानाञ्च संबन्धः औत्सर्गिकः । गङ्गायां पापनाशकत्वशक्तिरपि औत्सर्गिकी । अन्यनदीनां मध्ये गङ्गायाः स्थानं यथा तथैव अन्यभाषाणां मध्ये संस्कृतस्य च । सोऽयं सन्देशः विश्वगुरुश्रीमध्वाचार्याणाम् अङ्गुलिद्वयसन्देश इवाऽऽभाति । अस्तु अन्यत् सर्वमप्रत्यक्षम् । प्रत्यक्षं गङ्गाद्वयं स्वीकुर्मः । बिहारतः प्रवहमाणे अस्मिन् गङ्गाद्वये सर्वे संस्कृतज्ञाः विहरन्तु । जाह्नवी जगद्व्यापिनी भूयात् ।

   **श्री श्री सुगुणेन्द्रतीर्थश्रीपादाः**, उडुपि श्रीपुत्तिगे मठः, जगद्गुरु-श्रीमध्वाचार्य-मूलमहासंस्थानम्, उडुपि, कर्णाटकम्

3. वर्तमानप्रौद्योगिकयुगे संस्कृतवाङ्मयस्य प्रसारार्थं जाह्नवीति अन्तर्जालशोधपत्रिकायाः महत्प्रभावो वर्तते......।

   **संस्कृतवार्ताः**, दूर्दर्शन दिल्ली, 10th Feb 2011, 06:55 AM

4. दुनियाभर में किये जा रहे शोधों को इण्टर्नेट के जरिये प्रसारित करने मे संस्कृत पत्रिका जाह्नवी का खास योगदान है।

   **डा. बी० के महापात्र**, कुलसचिव, लालबहादुर विद्यापीठ नई दिल्ली

5. जनसंचार माध्यमों मे संस्कृत भाषा और शोध के प्रचार प्रासार के लिये जाह्नवी पत्रिका आज के समय की मांग है।

   **प्रो० कमला भारद्वाज**, लालबहादुर विद्यापीठ नई दिल्ली

6. यद्यपि संस्कृतमाहात्म्यवशीकृतचेतनाः पाश्चात्या विपश्चितः प्रागेव तां विश्वभाषां घोषितवन्तः परन्तु सा खलु घोषणा सार्थवती न जाता मिथस्सम्वादहीनतया। सम्प्रति जाह्नव्याः प्रकाशनेन स खलूक्तयो याथार्थ्यं सार्थकताञ्च भजत इत्यहं मन्ये...।

   **मिश्रोऽभिराजराजेन्द्रः**। पूर्वकुलपतिः, सं०सं० विश्वविद्यालयः

7. एषा पत्रिका उत्तरोत्तरं वृद्धिं गच्छेत् इति भगवतः सप्ताचलाधिपतेः श्रीश्रीवेङ्कटनायकस्य पवित्रचरणकमलतले सन्ततं प्रार्थये।

   **प्रो० हरेकृष्ण सत्पथी**, कुलपतिः, तिरुपति राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालयः

8. अत्याधुनिकयुगेऽस्मिन्.... अनया प्रचेष्टया समस्याह्वानं प्रत्यक्षीकृत्य संस्कृत शिक्षायाः द्रुतविकासाय नूतन साहित्याभिवृद्धये च नूनं समर्था भवेम वयम् इति...।

**डा० सत्यनारायण आचार्यः**, उपाचार्यः विभागमुख्यश्च, साहित्यसंस्कृतिसंकायः, तिरुपति राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालयः

9. On behalf of all Sanskrit lovers in Australia I convey my best wishes on the launch of an important Sanskrit publication – Jahnavi…

   My expectations from this journal are great and I feel confident that young India will meet these expectations and more.

   **Prof. Himanshu Pota**, Australia

10. संस्कृत ज्ञान-विज्ञान संवाहकम्। शुद्धबुद्धिसंवर्द्धकम्। अजरामरं संस्कृतम्। बहुप्राचीनमपि नित्यनूतनम्। एतादृशस्य संस्कृतस्य यद्यपि बहव्यः पत्रिका कार्यरतास्सन्ति तथापि अन्तर्जालीयसंस्कृतपत्रिकाभावेन विश्वस्य विविधेषु राष्ट्रेषु विद्यमानाः संस्कृत प्रियाः हतोत्साहिनो भवन्तीति धिक्। एतादृशीं न्यूनतां दूरी कर्तुं…..।

    **Dr. C.U Rao** , Ex-chairperson SCSS, JNU, Associate professor & Project Director

11. जाह्नवी नाम्ना जालयन्त्रद्वारा प्रसारिता पत्रिका रसभरनमिताङ्गी नानातन्त्रतत्वबिन्दुभरा विद्वन्मनोरंजनचातुरी प्रसन्नपदगम्भीरा गीर्वाणभारती सुरताभ्युदय विधात्री प्रतिभोन्मुखारंजयतु…।

    **Dr. K.E. Dharaneedharan**, Siromani Nyay, Reader & Head Dpt Sanskrit, Pondicherry University

12. संस्कृत प्रचार-प्रसाराय शोधक्षेत्रे योगदानाय च प्रकाश्यमानां जाह्नवीं ज्ञात्वा मोमुद्यते मे मनः….। वस्तुतः संस्कृते विद्यमानानां विषयाणां नूतनतथ्यात्मकरूपेण जाह्नवी इति पत्रिकाप्रकाशनं एकं श्लाघ्यं कार्यं विद्यते।

    **प्रो० सुखदेव भोई**, Dean sahity & sanskriti, LBS Deemd University Delhi

13. नवनवोन्मेषी यह जाह्नवी शोधपत्रिका संस्कृतजगत में निर्बाध निस्सरित होती रहे यह मेरी शुभकामना है।

    **डा. सत्येन्द्र कुमार मिश्र**, सम्पादक, विश्वपंचांग, BHU

14. जाह्नवी पत्रिका का सम्पादन विषय का गाम्भीर्य एवं संस्कृत के जिज्ञासुओं के लिये एक महत्वपूर्ण कार्य है……..।

    **प्रो० चन्द्रमा पाण्डेय**, ज्योतिष विभाग, BHU

15. एतादृशानां संस्कृतच्छात्राणां सत्प्रयासेन संस्कृतस्य प्रचारः प्रसारश्चावश्यं भविष्यत इति मे विश्वासः…।

    **प्रो० रमेशचन्द्रपण्डाः**, संकायप्रमुखः , काशीहिन्दूविश्वविद्यालयः

16. …भगवन्तं विश्वेश्वरं प्रार्थये यदियं 'जाह्नवी' जाह्नवीव सततं प्रवाहमाना लोककल्याणं साधयतु।

    **प्रो० कृष्णकान्त शर्मा**, Ex- Dean Faculty of SVDV, Ex- Hony Director Malaviy bhavan, BHU

17. आधुनिकरीत्या विज्ञानस्योपलब्धीनाम् उपयोगेन संस्कृतभाषायां जाह्नवी नाम्ना ई- त्रैमासिकी शोधपत्रिका प्रकाशतामेतीति ज्ञात्वा मोमुद्यते मे मनः।… अस्मिन् कर्मणि सर्वान् साधुवाक्यैः संभूष्य पत्रिकेयं निरन्तरं कौमुदीव सहृदयमनप्रह्लादनक्षमाभूय भगवन्तं सप्तगिरिसनाथं वेंकटेश्वरं संप्रार्थये।





**Prof. K. R. Menon**, Dean Faculty of Education, Co-ordinator UGC SAP (Edu)

18. जाह्नवी पत्रिका न केवलं सामान्यच्छात्राणां कृते परमोपादेया भविष्यति अपितु ये संस्कृतानुरागिणो वर्तन्ते तेषां समेषां कृते अवश्यमेव लाभप्रदो भवितुमर्हतीति मे मति…।

    **Prof Brajesha Kumar**, Lucknow University

19. सूचनाप्रौद्योगिके युगेऽस्मिन्नेतादृक् पत्रिकाया प्रकाशनं संस्कृतजिज्ञासूनां शोधछात्राणां च कृते महदुपकाराय भवितेति मे विश्वासः।

    **Prof Prema Kumar Sharma**, HOD Dpt. Jyotish, LBS New Delhi, Programa co-ordinator SAP DRS, Editor Vidyapith Panchang

20. जाह्नवीनाम्नी त्रैमासिकी शोधपत्रिका जाह्नवीव आचन्द्रतारार्कं प्रचलतु, ज्ञानपिपासां पूरयन्तु….।

    **डा० के० आर० सूर्यनारायण**, Dean, Faculty of Sahity & Saskriti, तिरुपति राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालयः

21. बहूनां छात्राणां ऋषीणां गुरूणां आचार्याणामुपदेश परम्परागतानि तत्त्वानि सत्यवचनानि जाह्नवी पत्रिकाद्वारा अन्तर्जाले निक्षिप्तानि बहूनां छात्राणां शोधकर्तृणां चान्तोपयोगाय भवेदिति विश्वस्मि।

    **Prof. T.V. Raghvacharyulu,** तिरुपति राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालयः

22. जाह्नवी के प्रकाशन से संस्कृत वाङ्मय के दुर्लभ खजाने का लाभ सभी प्राप्त कर सकेंगे, यह परम सन्तोष का विषय है। सम्पूर्ण दुनियाँ में इसके माध्यम से सही तथ्य प्रसारित हो सकेगा।

    **प्रो० सच्चिदानन्द मिश्रा,** HOD, Faculty of samskritvidyadharmagam, BHU

23. गवेषणात्मिका पत्रिकेयं समेषां गवेषकानां समुन्नतये तथा च जगतः श्रेयसे अग्रे सरिष्यतीति दृढं मे विश्वासः।

    **Dr.Prabhat Kumar Mohapatra**, HoD (Jyotish), Puri

24. संस्कृतसाहित्यसागरे विद्यमानानां ज्ञान रत्नानां प्रकाशनमियं जाह्नवी अभिनवशैल्या अति द्रुतगत्या सर्वत्र करिष्यतीति मे दृढो विश्वासः।

    **प्रो० राधाकान्त ठाकुरः**, Ex- Dean Faculty of Ved-Vedangas, तिरुपति राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालयः

25. जाह्नवी पत्रिकायाःसुयशार्थे मम ईश्वरं प्रति प्रार्थनाः, स्वकीयाः सदिच्छा च सन्ति एव।

    **श्रीपादनामा अभ्यंकरेत्युपाव्हः**, मुम्बई स्थितः अभियान्त्रिकः

26. जाह्नवी संस्कृत ई-पत्रिका उत्तरोत्तर् सफलता हेतु मेरी शुभकामनाएं…।

    **डा० गिरिजा शंकर शास्त्री,** HOD, Dpt Sanskrit, Ishvar Sharan Degree College, Allahabad

# Important dates for next Issue-

- ✓ DEADLINE FOR SUBMISSION 1ST JUNE, 2013
- ✓ NOTIFICATION FOR ACCEPTANCE 10TH JULY, 2013
- ✓ INAUGRATION- LAST WEEK OF JULY, 2013.



## Submit your unpublished research Articles to



jahnavisanskritjournal@gmail.com